Barcode : 2030020016385
Title - Vikramora~vashii trotakama~ Chatura~tha Sanskarand-ama~
Author -
Language - Sanskrit
Pages - 151
Publication Year - 1925
Barcode EAN.UCC-13



UNIVERSAL
LIBRARY
OU_184560

विक्रमोर्वशी ।

[वे[illegible]म्]

महाकवि श्रीकालिदासविरचिता ।

पण्डितकुलपतिना,

वि, ए, उपाधिधारिणा

श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण

विरचितया व्याख्यया परिशोभिता ।

तदात्मजाभ्यां

पण्डित-श्रीआशुबोध-विद्याभूषण-

पण्डित-श्रीनित्यबोध-विद्यारत्नाभ्यां

परिवर्द्धितटीकयाऽलङ्कृत्य संस्कृत्य च प्रकाशिता ।

चतुर्थं संस्करणम् ।

कलिकातामहानगर्य्याम्

वाचस्पत्ययन्त्रे

मुद्रिता ।

प्रकाशक— पण्डित-श्रीआशुबोध-विद्याभूषण
तथा
पण्डित-श्रीनित्यबोध-विद्यारत्न ।

प्राप्तिस्थान— २न०, रमानाथ मजुमदार ष्ट्रीट्, आम्हार्ष्ट-ष्ट्रीट् पोष्ट-अफिस । कलिकाता ।

प्रिण्टर—वि, वि, मुखर्जी ।

२ न०, रमानाथ मजुमदार ष्ट्रीट्, कलिकाता ।

विक्रमोर्वशी ।

प्रथमोऽङ्कः ।

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥ (१)

नान्द्यन्ते (२) सूत्रधारः ।

---

(१) वेदान्तेष्विति ।—वेदान्तेषु उपनिषत्सु यं देवं रोदसी द्यावापृथिव्यौ व्याप्य स्थितं सर्वव्यापिनमित्यर्थः । एकपुरुषम् अद्वितीयमाहुः वर्णयन्तीत्यर्थः । "अस्मिन् द्यौः पृथिवी चान्तरीक्षमोतं मनः सह प्राणैश्च सर्वैः तमेवैकं जानीथ आत्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुः" । इति श्रुतिः । तथा, नास्ति अन्यस्तादृग्नः कश्चित् विषयो वाच्यो यस्य स तथाभूतः ईश्वर इति शब्दः यस्मिन् देवे यथार्थाक्षरः सार्थकः अणिमाद्यष्टैश्वर्यसद्भावादित्यर्थः । तथा, नियमिताः अन्तर्निरुद्धाः प्राणादयो प्राणापानसमानोदानव्यानाख्याः पञ्च शरीरवायवः यैस्तैस्तथाभूतैर्मुमुक्षुभिर्मुक्तिमिच्छुभिर्योगिभिरित्यर्थः । यश्च अन्तरात्मनि मृग्यते अन्विष्यते । "एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति । तमात्मस्थं ये तु पश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्" इति । तस्यात्मनि दर्शनोपदेशः । स्थिरा अचला या भक्तिस्तस्याः योगेन सम्पर्केण सुलभः सुप्रापः सुगम इत्यर्थः । स स्थाणुः शिवः वो युष्माकं निःश्रेयसाय क्षेमाय अस्तु, मुक्तिप्रदो भवतु इत्यर्थः । शार्दूलविक्रीडितं छन्दः ।

(२) नान्द्यन्ते इति ।—नान्दीलक्षणं यथा,—"आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते । देवद्विजनृपादीनां तस्मात् नान्दीति संज्ञिता ।"

सूत्र। अलमतिविस्तरेण। [नेपथ्याभिमुखमवलोक्य]। मारिष! परिषदेषा पूर्वेषां कवीनां दृष्टरसप्रबन्धा; अहमस्यां कालिदास-ग्रथितवस्तुना नवेन त्रोटकेन उपस्थास्ये, तदुच्यतां पात्रवर्गः, स्वेषु स्थानेषु अवहितैर्भवितव्यं भवद्भिरिति। (२)

नटः। [प्रविश्य] यथाज्ञापयति देवः।

सूत्र। यावदस्यामार्य्यविदग्धमिश्रान् शिरसा प्रणिपत्य विज्ञापयामि।—

प्रणयिषु दाक्षिण्यवशादथवा सहस्तुबहुमानात्।
शृणुत जना! अवधानात् क्रियामिमां कालिदासस्य॥ (४)

नेपथ्ये। [अज्ञा। परिवायध परिवायध]। (क)

सूत्र। अये! किमयमकस्माद्विमानचारिणामाकाशे करुण-ध्वनिः श्रूयते? [विचिन्त्य]। आं ज्ञातम्, भवतु।—

ऊरूद्भवा नरसखस्य मुनेः सुरस्त्री
कैलासनाथमुपसृत्य निवर्त्तमाना।

(क) आर्य्याः! परिवायध्वं परिवायध्वम्।

---

(२) मारिष इति सूत्रधारकृतं पारिपार्श्विकसम्बोधनम्। "सूत्रधारं वटेत्याह इति वै पारिपार्श्विकः। सूत्रधारो मारिषेति" इत्यादि दर्पणे। परिषत् सभा, दृष्टरसप्रबन्धा दृष्टो रसप्रबन्धः शृङ्गारादिरसबहुलः प्रबन्धः सन्दर्भः यया। त्रोटकेन त्रोटकाख्यदृश्यकाव्येन इत्यर्थः। तल्लक्षणं यथा—"सप्ताष्टनवपञ्चाङ्कं दिव्य-मानुषसंश्रयम्। त्रोटकं नाम तत् प्राहुः प्रत्यङ्गं सविदूषकम्॥" इति दर्पणकारधृत-वचनम्। पात्रवर्गः नटसम्प्रदायः। स्वेषु स्थानेषु स्वकीयेषु कर्त्तव्यपदेषु इत्यर्थः। अवहितैः अप्रमत्तैः।

(४) प्रणयिष्विति।—प्रणयिषु सुहृत्सु याचकेषु वा। दाक्षिण्यं परच्छन्दानु-वर्त्तित्वं, तदधात् तद्धेतोः अस्मासु अनुग्रहबुद्धेरिति भावः। सहस्तुबहुमानात् सत् दोषरहितं यदस्तु इतिवृत्तं तत्किन् बहुमानं सप्रादरः तस्मात्। अन्यत् स्पष्टम्।

वन्दीकृता विबुधशत्रुभिरर्द्धमार्गे
क्रन्दत्यतः शरणमप्सरसां गणोऽयम् ॥ (५)

[इति निष्क्रान्तौ]।

प्रस्तावना (६)।

[ततः प्रविशन्ति अपटीक्षेपेण अप्सरसः]। (७)

अप्सरसः। अज्जा ! परित्ताअध परित्ताअध, जो अमरपक्खवादी, जस्स वा अम्बरदले गदी अत्थि। (ख)

[ततः प्रविशति अपटीक्षेपेण रथारूढो राजा सूतश्च।]

राजा। अलमाक्रन्दितेन ; सूर्य्योपस्थानमन्निवृत्तं पुरूरवसं मामेत्य कथ्यतां, कुतो भवत्यः परित्रातव्याः इति। (८)

रम्भा। असुरावलेवादो। (ग)

(ख) आर्य्याः ! परित्रायध्वं परित्रायध्वं, योऽमरपक्षपाती, यस्य वा अम्बरतले गतिरसि।

(ग) असुरावलेपात्।

---

(५) ऊरुङ्गवा इति।—नरस्य तन्नामधेयस्य मुनेः सखा तस्य मुनेः नारायणस्य ऊरुङ्गवा ऊरीकृत्यन्ना सुरस्त्री अप्सराः उर्वशीत्यर्थः। कैलासनाथं कुबेरम् उपस्तुत्य स्तुतिवन्दनादिकं कृत्वेत्यर्थः निवर्त्तमाना प्रत्यागच्छन्ती अर्द्धमार्गे अर्द्धपथे विबुधशत्रुभिः दानवैः वन्दीकृता धृता बद्धा वा, अतः कारणात् अयमप्सरसां गणः शरणं क्रन्दति, साहाय्यार्थं कमपि शरण्यमुद्दिश्य रोदिति इत्यर्थः। वसन्ततिलकं छन्दः।

(६) प्रस्तावनालक्षणं यथा।—"नटो विदूषको वापि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते। चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत् तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥"

(७) अपटीक्षेपेण यवनिकाऽपसारणं विनैव। पात्रप्रवेशावसरे यवनिकापसारणनियमः, अत्र तु अप्सरसां सम्भ्रमसाध्वसद्योतनाय यवनिकाऽपसारणं विनैव प्रवेशः। तदुक्तं,—"पटीक्षेपो न कर्त्तव्यः आर्त्तराजप्रवेशने" इति।

(८) सूर्य्योपस्थानात् सन्निवृत्तं सूर्य्यमुपास्य प्रत्यागच्छन्तमित्यर्थः।

राजा। किमसुरावलेपेन भवतीनामपराद्धम् ? (९)

रम्भा। सुणादु महाराओ; जा तवोविसेससङ्कितस्स सुउमारं पहरणं महेंदस्स, पच्चादेसो रूवगव्विदाए सिरि-गोरिए, अलङ्कारो सग्गस्स, सा णो पिअसही कुबेरभवणादो णिअत्तमाणा केणावि दाणवेण चित्तलेहादुदिआ अद्धपधज्जेव णिग्गिहिदा। (घ)

राजा। परिज्ञायते कतमेन दिग्विभागेन गतः स जाल्मः ?

अप्सरसः। इसाणीए दिसाए। (ङ)

राजा। तेन हि मुच्यतां विषादः, यतिष्ये वः सखी-प्रत्यानयनाय।

अप्सरसः। [सहर्षं] सरिसम् एदं सोमवंससम्भवस्स। (च)

राजा। क्व पुनर्मां भवत्यः प्रतिपालयिष्यन्ति ? (१०)

अप्सरसः। एदस्सिं हेमकूडसिहरे। (छ)

राजा। सूत! ऐशानीं दिशं प्रति प्रेरयाश्वानाभुगमनाय।

सूतः। यथा आज्ञापयति आयुष्मान्। [इति तथा करोति]।

(घ) गृणीत् महाराजः, या तपोविशेषशङ्कितस्य सुकुमारं प्रहरणं महेन्द्रस्य, प्रत्यादेशो रूपगर्वितायाः श्रीगौर्याः, अलङ्कारः स्वर्गस्य, सा नः प्रिय-सखी कुबेरभवनात् निवर्त्तमाना केनापि दानवेन चित्रलेखाद्वितीया अर्द्धपथ एव निगृहीता।

(ङ) ऐशान्या दिशा।

(च) सदृशमेतत् सोमवंशसम्भवस्य।

(छ) एतस्मिन् हेमकूटशिखरे।

---

(९) असुराणामवलेपेन गर्वेण किमपराद्धम् ? युष्माकं वा बाधा सम्पादिता इत्यर्थः।

(१०) प्रतिपालयिष्यन्ति मां प्रतीक्ष्य वर्त्तिष्यन्ते इत्यर्थः।

राजा। [रथवेगं रूपयित्वा]। साधु साधु, अनेन रथवेगेन पूर्वप्रस्थितं वैनतेयम् (११) अपि आसादयेयम्। मम हि—

अग्रे यान्ति रथस्य रेणुपदवीं चूर्णीभवन्तो घना-
श्चक्रभ्रान्तिररान्तरेषु वितनोत्यन्यामिवारावलीम्।
चित्रारम्भविनिश्चलं हयशिरस्यायामवच्चामरं
यन्मध्ये समवस्थितो ध्वजपटः प्रान्ते च वेगानिलात्॥ (१२)

[इति निष्क्रान्तौ राजा सूतश्च]।

सहजन्या। हला! गदो राएसी; ता अम्हेवि जधासंदिट्ठं पदेसं गच्छम्ह। (ज)

मेनका। सहि! एव्वं करेम्ह। (झ)

[इति हेमकूटशिखरे नाट्येन अधिरोहन्ति]।

(ज) अयि! गतो राजर्षिः, तत् वयमपि यथासन्दिष्टं प्रदेशं गच्छामः।

(झ) सखि! एवं कुर्मः।

---

(११) वैनतेयं विनतानन्दनं गरुडमपि।

(१२) रथस्य अग्रे समीपे चूर्णीभवन्तो जवात् आपतद्भिः चक्रैः प्रतिघातेन अश्वखुरोल्लेखनेन वा चोदीभवन्तो घना मेघाः रेणुपदवीं धूलिसादृश्यं यान्ति प्राप्नुवन्ति। तथा चक्राणां भ्रान्तिर्भ्रमणम् अराणां चक्रमध्यगतकाष्ठखण्डानाम् अन्तरेषु मध्येषु अन्यां द्वितीयाम् अरावलीम् अरपङ्क्तिं वितनोति विस्तारयति क्षिप्रभ्रमणेन निरन्तरारपङ्क्तिपूरितमिव तच्चक्रं प्रतिभातीति भावः। तथा चित्रः अद्भुतः विस्मयकर इत्यर्थः, य आरम्भः धावनक्रिया तेन निश्चलं निष्कम्पं चामरं हयशिरसि अश्वमूर्ध्नि आयामवत् दैर्घ्ययुक्तं वर्त्तते इति शेषः। वेगवशात् दीर्घतरात्मतिलक्ष्यते इति भावः। तथा वेगानिलात् वेगजातमारुतवशात् ध्वजपटः यस्य रथस्य मध्ये प्रान्ते च उभयोः पार्श्वयोश्च समवस्थितः। महावेग-समुत्थेन वातेन ध्वजपटः कदापि रथमध्ये कदापि प्रान्तयोः पतन् लुठतीति भावः। शार्दूलविक्रीडितं छन्दः।

रम्भा। अवि नाम सो राएसी उद्धरे णो हिअअ-सल्लम् ? (अ)

मेनका। सहि ! मा दे संसओ भोदु। (ट)

रम्भा। णं दुज्जआ दाणवा। (ठ)

मेनका। उअत्थिदसंपहारो (१३) महेंदो वि मज्झम-लोआदो सबहुमाणमाणाबिअ तं ज्जेव विबुधबिजआअ सेणामुहे णिओएदि। (ड)

रम्भा। सव्वधा बिजई भोदु। (ढ)

मेनका। [क्षणमात्रं स्थित्वा]। हला ! समस्सस्सध समस्सस्सध, एस उल्लसिदहरिणकेदणो तस्स राएसिणो सोमदत्तो रहो दीसदि ; ण एसो अकिदत्थो पडिणिउत्तिस्सदित्ति तक्केमि। (ण) [निमित्तं सूचयित्वा (१४) अवलोकयन्त्यः स्थिताः]।

[ततः प्रविशति रथारूढो राजा सूतश्च, अर्धनिमीलिताक्षी चित्र-लेखादक्षिणहस्तावलम्बिता उर्वशी च]।

(अ) अपि नाम स राजर्षिः उद्धरेत् नो हृदयशल्यम् ?

(ट) सखि। मा ते संशयो भवतु।

(ठ) ननु दुर्जया दानवाः।

(ड) उपस्थितसम्भारो महेन्द्रोऽपि मध्यमलोकात् सबहुमानमानाय्य तमेव विबुधविजयाय सेनामुखे नियोजयति।

(ढ) सर्वथा विजयी भवतु।

(ण) अयि। समाश्वसित समाश्वसित, एष उल्लसितहरिणकेतनः तस्य राजर्षेः सोमदत्तो रथो दृश्यते, नैषोऽकृतार्थः प्रतिनिवर्त्तिष्यते इति तर्कयामि।

---

(१३) उपस्थितः सम्भारः सङ्गामो यस्य सः।

(१४) निमित्तं सूचयित्वा—प्रियसम्भद्योतकानि भ्रूनासिकादिस्पन्दनादीनि मङ्गललक्षणानि निरूपयन्त्य इत्यर्थः।

चित्र । सहि ! समस्सस समस्सस । (त)

राजा । सुन्दरि ! समाश्वसिहि समाश्वसिहि ।—

गतं भयं भीरु ! सुरारिसम्भवं
त्रिलोकरक्षी महिमा हि वज्रिणः ।
तदेतदुन्मीलय चक्षुरायतं
निशाऽवसाने नलिनीव पङ्कजम् ॥ (१५)

चित्र । अम्महे, उस्सासिदमेत्तसम्भाविदजीविदा अज्जवि सस्सम् एसा ण पडिवज्जदि । (थ)

राजा । बलवदत्र ते सखी परित्रस्ता । (१६) तथा हि,—

मन्दारकुसुमदाम्ना गुरुरस्याः सूच्यते हृदयकम्पः ।
मुहुरुच्छ्वसता मध्ये परिणाहवतोः पयोधरयोः ॥ (१७)

चित्र । [सकरुणम्] । हला उव्वसि ! पज्जवत्थाबेहि अत्ताणअम्, अणच्छरा विअ पडिहासि । (द)

(त) सखि ! समाश्वसिहि समाश्वसिहि ।

(थ) आश्चर्यं, उच्छ्वसितमात्रसम्भावितजीविता अद्यापि संज्ञाम् एषा न प्रतिपद्यते ।

(द) अयि उर्वशि । पर्य्यवस्थापयात्मानम्, अनप्सरा इव प्रतिभासि ।

---

(१५) गतमिति ।—हे भीरु भयशीले । उर्वशि ! सुरारिसम्भवं दानवद्रोह-जनितं भयं भयकारणं गतं निरस्तम् । हि यतः वज्रिणः इन्द्रस्य महिमा विलोकरक्षी त्रिभुवनविपदुद्धारसमर्थ इत्यर्थः । तत् तस्मात् निशाऽवसाने रात्रिशेषे नलिनी पङ्कजमिव पद्मपलाशमिव एतत् आयतं सुविशालं चक्षुरुन्मीलय । वंशस्थविलं छन्दः ।

(१६) बलवत् परित्रस्ता नितरां भीतेत्यर्थः ।

(१७) परिणाहवतोः सुविशालयोः पीनयोरित्यर्थः पयोधरयोः स्तनयोः मध्ये अन्तरप्रदेशे मुहुर्वारंवारम् उच्छ्वसता प्रकम्पिना मन्दारकुसुमदाम्ना मन्दार-पुष्पविरचितया स्रजा अस्याः गुरुर्बलवान् हृदयकम्पः सूच्यते द्योत्यते । आर्य्या छन्दः ।

राजा।—

मुञ्चति न तावदस्या भयकम्पः कुसुमकोमलं हृदयम्।
सिचयान्तेन कथञ्चित् स्तनमध्योच्छ्वासिना कथितः॥ (१८)

उर्वशी। [चैतन्यं प्रत्यागच्छति]।

राजा। [सहर्षम्]। चित्रलेखे! दिष्ट्या वर्द्धसे, प्रकृतिमापन्ना (१९) ति प्रियसखी। पश्य,—

आविर्भूते शशिनि तमसा रिच्यमानेव रात्रि-
र्नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा।
मोहेनान्तर्वरतनुरियं लक्ष्यते मुच्यमाना,
गङ्गा रोधःपतनकलुषा गच्छतीव प्रसादम्॥ (२०)

चित्र। हला उव्वसि! विस्सत्था होहि, आवसाणु-कम्पिणा महाराएण पराहदा खु ते तिदसपरिबंधिणो हदासा दाणवा। (ध)

(ध) अयि उर्वशि। विश्वस्ता भव, आपन्नानुकम्पिना महाराजेन पराहताः खलु ते विदशपरिपन्थिनो हताशा दानवाः।

(१८) स्तनमध्योच्छ्वासिना स्तनान्तरे कम्पमानेन सिचयान्तेन वस्त्राञ्चलेन कथञ्चित् कृच्छ्रेण कथितः सूचितः भयकम्पः दानववासजनितः कम्पः अस्याः कुसुमकोमलं पुष्पसुकुमारं हृदय न मुञ्चति तावत् अद्यापि न प्रशाम्यतीति भावः। आर्य्याच्छन्दः।

(१९) प्रकृतिमापन्ना चैतन्यं प्राप्ता इत्यर्थः।

(२०) अन्तर्मध्ये मोहेन मुच्यमाना शनैः शनैश्चैतन्यमधिगच्छन्तीत्यर्थः इयं वरतनुः उर्वशी। अशिनि चन्द्रे आविर्भूते उदितवति तमसा अन्धकारेण रिच्यमाना मुच्यमाना रात्रिरिव, तथा छिन्नभूयिष्ठधूमा अपगतबहुलधूमा भास्वरा नैशस्य रात्रौ प्रद्योतितस्य हुतभुजः अग्नेः अर्चिः शिखेव लक्ष्यते। अथवा रोधःपतनेन पतिततीरभूमिसङ्घयोगेन कलुषा आविला गङ्गा भागीरथीव पश्चात् प्रसादं गच्छति, तद्वल्लक्ष्यते इति भावः। मन्दाक्रान्ता छन्दः।

उर्व । [उन्मील्य चक्षुषी] किं सम्यहारदंसिणा महेंदेण अब्भुववण्णाम्हि ? (न)

चित्र । ण महेंदेण ; महेंदसरिसाणुभावेण राएसिणा पुरूरवसेण । (प)

उर्व । [राजानमवलोक्यात्मगतम्] । उवकिदं खु मे दाणवेंदसम्भमेण । (फ)

राजा । [उर्वशीं विलोक्यात्मगतम्] । स्थाने खलु नारायणमृषिं विलोभयन्त्य ऊरुसम्भवामिमां विलोक्य व्रीड़िताः सर्वा अप्सरसः । अथवा, नैयं तपस्विनः सृष्टिरित्यवैमि । कुतः ?—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः ?
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ? ।
वेदाभ्यासजड़ः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ? ॥ (२१)

(न) किं सम्यहारदर्शिना महेन्द्रेण अभ्युपपन्नास्मि ?

(प) न महेन्द्रेण, महेन्द्रसदृशानुभावेन राजर्षिणा पुरूरवसा ।

(फ) उपकृतं खलु मे दानवेन्द्रसम्भ्रमेण ।

---

(२१) अस्याः उर्वश्याः सर्गविधौ सृष्टिक्रियायां कान्तिप्रदः लावण्यप्रदाता चन्द्रः प्रजापतिः स्रष्टा अभूत् ? नु इति प्रश्ने, अभूत् किमित्यर्थः । "स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृग् विधिः" इत्यमरः । किं वा शृङ्गार एव एको मुख्यो रसो यस्य स शृङ्गारैकरसो मदनः स्वयं नु किं प्रजापतिः स्रष्टा अभूत् ? अथवा पुष्पाणां कुसुमानाम् आकरः कुसुमयोनिरित्यर्थः । मासः चैत्रः किं नु प्रजापतिः अभूदिति शेषः । कथमियं जिज्ञासा, इत्याशङ्क्याह,—वेदाभ्यासजड़ इति । अन्यथा वेदाभ्यासजडः निरन्तरवेदपाठेन विषयबोधरहित इत्यर्थः । तथा विषयेभ्य इन्द्रियग्राह्येभ्यो रूपरसादिभ्यो व्यावृत्तं प्रतिनिवृत्तं कौतूहलं लालसा यस्य, भोगवासनाविरत इत्यर्थः, एवम्भूतः पुराणो मुनिः कथं केन प्रकारेण इदं मनोहरं रूपं निर्मातुं

उर्व। हला चित्तलेहे ! सहीअणो कहिं क्खु भवे ? (ब)

चित्र। अभअप्पदाई महाराओ जाणादि। (भ)

राजा। [उर्वशीं विलोक्य]। महति विषादे वर्त्तते ते सखीजनः ; पश्यतु भवती।—

यदृच्छया त्वं सकृदप्यबन्ध्ययोः
पथि स्थिता सुन्दरि ! यस्य नेत्रयोः।
त्वया विना सोऽपि समुत्सुको भवेत्
सखीजनस्ते किमु रूढसौहृदः ? ॥ (२२)

उर्व। [आत्मगतम्] अमिअं क्खु दे वअणं ; अधवा, चंदादो अमिअं त्ति किम् एत्थ अच्छरीयम्॥ [प्रकाशम्]। अदो ज्जेव मे तुवरदि हिअअम्। (म)

राजा। [हस्तेन दर्शयन्]।—

(ब) अयि चित्रलेखे ! सखीजनः कुत्र खलु भवेत् ?

(भ) अभयप्रदायी महाराजो जानाति।

(म) अमृतं खलु ते वचनम् ; अथवा चन्द्रतोऽमृतमिति किमत्राश्चर्यम्॥ अत एव मे त्वरते हृदयम्।

प्रभवेत् ? क्व वा रसज्ञानविरहितः पुराणो मुनिः ? क्व चैतत् सौकुमार्यम् ? सर्वथा नेयं निर्मितिः जराजीर्णप्रकृतेः वेदाभ्यासनियतहृतचेतसो नारायणमुनेः, अपि तु कस्यापि चन्द्रमदनादिकस्य सुकुमारतरस्य विलसितमेतदिति भावः। आर्द्रूलविक्रीडितं छन्दः।

(२२) हे सुन्दरि ! त्वं यदृच्छया अनिर्दिष्टकारणेन सकृदपि एकवारमपि यस्य अबन्ध्ययोः सार्थकयोः त्वद्दर्शनलाभादिति भावः। नेत्रयोः पथि गोचरे स्थिता भवसि, यस्य दर्शनपथं गच्छसीत्यर्थः। सोऽपि त्वया विना समुत्सुकः पुनस्त्वद्दर्शनाकाङ्क्षया उत्कण्ठितो भवेत्। किमु कृढसौहृदः बद्धसख्यस्ते सखीजनः ? चिरपरिचितः सखीजनस्त्वद्दर्शनाग्रया यत् समुत्सुको भवेत्, तत्र किं वक्तव्यमित्यर्थः। वंशस्थविलं छन्दः।

एताः सुतनु ! मुखं ते सख्यः पश्यन्ति हेमकूटगताः।
उत्सुकनयना लोकाश्चन्द्रमिवोपप्लवान्मुक्तम् ॥ (२३)

उर्वशी। [साभिलाषं पश्यति]।

चित्र। हला ! किं पेक्खसि ? (य)

उर्व। समदुक्खसुहो पीवीअदि लोअणेहिं। (र)

चित्र। [सस्मितम्] अइ ! को ? (ल)

उर्व। णं पणइअणो। (व)

मेनका। [सहर्षमवलोक्य] हला ! एसो चित्तलेहादुदिअं पिअसहीम् उव्वसीं गेण्हिअ, बिसाहासहिदो विअ भअवं सोमो उवट्ठिदो सो राएसी। (श)

सभा। [निर्वर्ण्य] दुवेवि एत्थ पिआ उवगदा, जं सही पच्चाणीदा, जं च अपरिक्खदसरीरो राएसी दीसदि। (ष)

सहजन्या। सहि ! तुमं भणासि दुज्जओ दाणवो त्ति। (स)

(य) अयि ! किं प्रेक्षसे ?

(र) समदुःखसुखः पीयते लोचनाभ्याम्।

(ल) अयि ! कः ?

(व) ननु प्रणयिजनः।

(श) अयि ! एष चित्रलेखाद्वितीयां प्रियसखीम् उर्वशीं गृहीत्वा विशाखा-सहित इव भगवान् सोमः उपस्थितः स राजर्षिः।

(ष) हे अपि अत्र प्रिये उपगते, यत् सखी प्रत्यानीता, यच्च अपरिक्षत-शरीरो राजर्षिर्दृश्यते।

(स) सखि ! त्वं भणसि दुर्जयो दानव इति।

---

(२३) हे सुतनु ! उत्सुकनयनाः कौतूहलाविष्टनेवा लोकाः उपप्लवात् राहुग्रासात् मुक्तं चन्द्रमिव चन्द्रं यथा पश्यन्तीत्यर्थः तद्वत् हेमकूटगता एताः सख्यः ते मुखं पश्यन्ति।

राजा। सूत! इदं तच्छैलशिखरम्, अवतारय रथम्।

सूतः। यथाज्ञापयति आयुष्मान्। [इति तथा करोमि]।

उर्वशी। [रथावतारक्षोभं नाटयन्ती सत्रासं राजानमवलम्बते]।

राजा। [सगर्वम्]। हन्त हन्त, सफलो मे विप्रयाव-

सारः। (२४)—

यदिदं रथसंक्षोभादङ्गेनाङ्गं ममायतेक्षणया।
स्पृष्टं सरोमकण्टकमङ्कुरितं मनसिजेनेव॥ (२५)

उर्वं। [सव्रीडा]। (२६) हला! किञ्चिदवरतो ओसर (ह)।

चित्र। णाहं णाहं सक्का (च)।

रम्भा। एव्वं पिअआरिणं सम्भावेम्ह (२७) राएसिं। (क)

अप्सरसः। एव्वं करेम्ह (ख) [इत्युपसर्पन्ति]।

राजा। सूत! उपश्लेषय रथम्। (२८)—

यावत् पुनरियं सुभ्रूरुत्सुकाभिः समुत्सुका।
सखीभिर्याति सम्पर्कं लताभिः श्रीरिवार्त्तवी॥ (२९)

(ह) सखि! किञ्चिदपरतोऽपसर।

(च) नाहं नाहं शक्ता।

(क) एवं प्रियकारिणं सम्भावयामो राजर्षिम्।

(ख) एवं कुर्मः।

---

(२४) विषये उर्वशीप्रत्यानयनरूपविषये देशे वा अवतारः अवतरणम्, आगमनं वा किंवा इन्द्रियग्राह्यरूपरसादिभोगे अवतरणं मानवजन्मधारणमिति यावत्।

(२५) रथसंक्षोभात् इदं मम अङ्गम् आयतेक्षणायाः अङ्गेन स्पृष्टं सत् यत् सरोमकण्टकं जातं, तत् मनसिजेन अङ्कुरितमिव मन्ये। दर्शनादन्तःसञ्जातमनसिजेन स्पर्शनादङ्कुरितं पुलकच्छलेन बहिरुद्भिन्नमिति भावः। आर्या छन्दः।

(२६) पुलकादिकं राज्ञो भावं दृष्ट्वा सलज्जा इति भावः।

(२७) सम्भावयामः प्रत्युद्गमनप्रियसम्भाषणादिना सत्कुर्मः।

(२८) उपश्लेषय भूमौ अवस्थापय इत्यर्थः।

(२९) यावत् पुनः समुत्सुका उत्कण्ठिता इयं सुभ्रूः उत्सुकाभिः सखीभिः

सूतः । तथा । [इति रथं स्थापयति]।

अप्सरसः । दिट्ठिआ महाराओ विजएण वड्ढदि । (ग)

राजा । भवत्यश्च सखीसमागमेन ।

उर्वं । [चित्रलेखादत्तहस्तावलम्बा रथादवतीर्य]। हला ! बलियं परिस्सअध मं, ण क्खु मे आसि आसंसा जधा पुणो वि सव्वं सहीअणं पेक्खिस्सं । (घ)

सख्यः । [परिष्वजन्ते]।

मेनका । [साशंसं]। सव्वधा महाराओ पुहवीं पालयंतो भोदु । (ङ)

सूतः । आयुष्मन् ! महता रथवंशेनोद्दर्भितम्, (३०)—

अयञ्च गगनात् कोऽपि तप्तचामीकराङ्गदः ।

अधिरोहति शैलाग्रं तड़ित्वानिव तोयदः ॥ (३१)

अप्सरसः । अम्मो ! चित्तरहो ! । (च)

(ग) दिष्ट्या महाराजो विजयेन वर्द्धते ।

(घ) अयि ! बलवत् परिष्वजध्वं मा, न खलु मे आसीत् आशंसा, यथा पुनरपि सर्वं सखीजनं प्रेक्षिष्ये ।

(ङ) सर्वथा महाराजः पृथिवीं पालयन् भवतु ।

(च) अहो ! चित्ररथः ! ।

सम्यक् याति मिलति इत्यर्थः । किम्भूता ? आर्त्तवी श्रीः वसन्तलक्ष्मीः लताभिरिव, यथा लताभिः सह मिलति तद्वदित्यर्थः । वसन्तलक्ष्मीर्यथा लताभिः सङ्गता सती प्रसूनादिना लतानां शोभातिशय्यम् उत्पादयति, तथा उर्वशी तासां विकाशकारणं भवतीति भावः । अनुष्टुप् छन्दः ।

(३०) रथवंशेन पताकादण्डेन, उद्दर्भितं सूचितम ।

(३१) तप्तेन सद्यो गलितेन इव चामीकरेण सुवर्णेन निर्मितम अङ्गदं यस्य सः तप्तचामीकराङ्गदः अयं कोऽपि तड़ित्वान् विद्युल्लेखाविराजितश्रीयदो मेघः इव, विद्युत्वान् मेघो यथा शैलाग्रमधिरोहति तद्वदित्यर्थः । अङ्गदोल्लेखत्वात्तड़ित्व विशेषणं सार्थकितम् । अनुष्टुप् छन्दः ।

[ततः प्रविशति चित्ररथः]।

चित्ररथः। [राजानमुपसृत्य]। दिष्ट्या महोपकारपर्य्याप्तेन विक्रममहिम्ना वर्द्धसे।

राजा। अये! गन्धर्वराजः! [रथादवतीर्य]। स्वागतं प्रियसुहृदे। [अन्योऽन्यं हस्तं स्पृशतः]।

चित्ररथः। वयस्य! केशिना अपहृतामुर्वशीमुपश्रुत्य प्रत्याहरणार्थमस्याः शतक्रतुना गन्धर्वसेनाः समादिष्टाः। अनन्तरं विमानचारिभ्यस्त्वदीयम्,—

यज्ञोराग्निमुपश्रुत्य त्वामिहस्थमुपागतः।
भवानिमां समादाय महेन्द्रं द्रष्टुमर्हति॥ (३२)

महत् खलु त्वया तत्प्रियमनुष्ठितम्। पश्य,—

पुरा नारायणेनेयमभिसृष्टा मरुत्वतः।
दैत्यहस्तादवाच्छिद्य सुहृदा सम्प्रति त्वया॥ (३३)

राजा। सखे! मैवम्,—

ननु! वज्रिण एव वीर्य्यमेतत् विजयन्ते द्विषतो यदस्य पक्षाः।
वसुधाधरकन्दराविसर्पी प्रतिशब्दो हि हरेर्हिनस्ति नागान्॥ (३४)

---

(३२) उपश्रुत्य समाकर्ण्य। इहस्थ हेमकूटाग्रखरस्थम। उपागतः सम्प्राप्तः, त्वत्समीपमागत इत्यर्थः। इमाम् उर्वशीम्। अनुष्टुप् छन्दः।

(३३) नारायणेन नारायणाख्यमुनिना। मरुत्वतः इन्द्रस्य निमित्तम् इन्द्रार्थमित्यर्थः, अभिसृष्टा दत्ता। दैत्यहस्तात् अवाच्छिद्य आच्छिद्य त्वया पुनरभिसृष्टा। अनुष्टुप् छन्दः।

(३४) ननु भोः! वज्रिणः इन्द्रस्य एव एतत् वीर्य्यं माहात्म्यं, यत् अस्य इन्द्रस्य पक्षाः सहचरा द्विषतः अरीन् विजयन्ते। तथा हि हरेः सिंहस्य वसुधाधरकन्दराविसर्पी वसुधाधरस्य भूधरस्य कन्दरा गुहां विसर्पति गच्छति गिरिगह्वरव्यापीत्यर्थः, प्रतिशब्दः प्रतिध्वनिः, नागान् करीन् हिनस्ति पराभवति। सिंहध्वानादेव करिणो दूरं पलायन्ते इति भावः। वयन्तु ध्वानसमा इति तात्पर्य्यम्। औपच्छन्दसिकं वृत्तम्।

चित्ररथः । युक्तम् ; अनुत्सुकता खलु विक्रमालङ्कारः । (३५)

राजा । सखे ! नायमवसरः शतक्रतुं द्रष्टुम् ; अतस्त्वमेव अत्रभवतीं प्रभोरन्तिकं प्रापय । (३६)

चित्ररथः । यथा भवान् मन्यते । इत इतो भवत्यः ।

[इति अप्सरसः प्रस्थिताः]।

उर्वं । [जनान्तिकम्]। (३७) हला चित्तलेहे ! उअआरिणं राएसिं ण सक्कणोमि आमंतिदुं, ता तुमं मे मुहं होहि । (छ)

चित्र । [राजानमुपसृत्य]। महाराअ ! उव्वसी विण्णवेदि, महाराएण अब्भणुण्णादा इच्छामि पिआं विअ महाराअस्स कित्तिअं सुरलोअं णेदुम् । (ज)

राजा । गम्यतां पुनर्दर्शनाय ।

[इति सर्वाः सगन्धर्वा आकाशयानं रूपयन्ति]। (३८)

(छ) अयि चित्रलेखे ! उपकारिणं राजर्षिं न शक्नोमि आमन्त्रयितुं, तत् त्वं मे मुख भव ।

(ज) महाराज ! उर्वशी विज्ञापयति, महाराजेन अभ्यनुज्ञाता इच्छामि प्रियामिव महाराजस्य कीर्त्तिं सुरलोकं नेतुम् ।

---

(३५) अनुत्सुकता स्वर्गौरवलाभकौतूहलराहित्यम् । सैव विक्रमालङ्कारः पराक्रमस्य भूषणम् ।

(३६) आत्मनः प्रशंसालापश्रवणे औदासीन्यात्, न तु इन्द्रस्य उपरि अवमाननया इति भावः । मनस्विताया लक्षणमेतत् ।

(३७) विपताकाकरेण मुखमाच्छाद्य यत् परस्परसम्भाषणं तत् जनान्तिकम् । तल्लक्षणं यथा ;—"विपताकाकरेणान्यानपवार्य्यान्तरा कथाम् । अन्योऽन्यामन्त्रणं यत् स्यात् जनान्ते तज्जनान्तिकम् ॥" इति ।

(३८) आकाशयानं रूपयन्ति आकाशगमनं नाटयन्ति इत्यर्थः ।

उर्व। [उत्पतनभङ्गं रूपयित्वा]। अम्मो! लदाविड़बे एंआवली बेजअंतिआ मे लग्गा! (३९) [सव्याजमुपसृत्य राजानं पश्यन्ती]। सहि चित्तलेहे! मोआवेहि दाव णं। (भ)

चित्र। [विलोक्य विहस्य च]। आं, अइ! दिट्ठं क्खु लग्गा, ण सक्कणोमि मोआविदुं। (ञ)

उर्व। अलं पडिहासेण, मोआवेहि दाव णं। (ट)

चित्र। आं, दुम्मोआ विअ मे पड़िहादि, तधाबि मोआविस्सं दाव। (ठ)

उर्व। [स्मितं कृत्वा]। पिअसहि! सुमरेसि क्खु एदं अत्तणो वअणं। (ड)

राजा।—

प्रियमाचरितं लते! त्वया मे गमनेऽस्याः क्षणविघ्नमाचरन्त्या।
यदियं पुनरप्यरालनेत्रा परिवृत्तार्द्धमुखी मयाऽद्य दृष्टा॥ (४०)

चित्रलेखा। [मोचयति]।

उर्वशी। [राजानमालोकयन्ती सनिश्वासं सखीजनमुत्पतन्तं पश्यति]।

(भ) अहो! लताविटपे एकावली वैजयन्तिका मे लग्ना। सखि चित्रलेखे। मोचय तावदेनाम।

(ञ) आं, अयि! दृढं खलु लग्ना, न शक्नोमि मोचयितुम्।

(ट) अलं परिहासेन, मोचय तावदेनाम्।

(ठ) आं, दुर्मोच्येव मे प्रतिभाति, तथापि मोचयिष्यामि तावत्।

(ड) प्रियसखि! स्मरसि खलु एतदात्मनो वचनम्।

---

(३९) एकावली एकयष्टिका वैजयन्तिका पञ्चवर्णमयी जानुपर्य्यन्तलम्बिता माला, वैजयन्तिकायी एकावलीत्वाद्दीर्घत्वाच्च प्राखायसंलग्ने विशिष्टोपयोगित्वं व्यज्यते।

(४०) क्षणविघ्नमाचरन्त्या क्षणकालं गमनबाधां जनयन्त्या। अरालनेत्रा अक्षिनयना। औपच्छन्दसिकं वृत्तम्।

सूतः । आयुष्मन् !—

अधः सुरेन्द्रस्य कृतापराधान्
प्रक्षिप्य दैत्यान् लवणाम्बुराशौ ।
वायव्यमस्त्रं शरधिं पुनस्ते
महोरगः स्वभ्रमिव प्रविष्टम् ॥ (४१)

राजा । तेन हि उपस्थापय रथं यावदारोहामि ।

सूतः । [तथा करोति] ।

राजा । [नाट्येनाधिरोहति] ।

उर्वं । [सस्पृहं राजानमवलोकयन्ती] । अवि णाम पुणो वि उअआरिणं एदं पेक्खिस्सं ? । (ढ)

[इति सगन्धर्वा सह सखीभिर्निष्क्रान्ता] ।

राजा । [उर्वशीवर्त्मोन्मुखः] । अहो ! दुर्लभाभिलाषी मदनः ।—

एषा मनो मे प्रसभं शरीरात्
पितुः पदं मध्यममुत्पतन्ती ।
सुराङ्गना कर्षति खण्डिताग्रात्
सूत्रं मृणालादिव राजहंसी ॥ (४२)

[इति निष्क्रान्ताः सर्वे] ।

इति प्रथमोऽङ्कः ।

(ढ) अपि नाम पुनरप्युपकारिणमेतं प्रेक्षिष्ये ? ।

---

(४१) ते तव वायुव्यम् अस्त्रं सुरेन्द्रस्य इन्द्रस्य कृतापराधान् इन्द्रापराद्धानित्यर्थः दैत्यान् अधः लवणाम्बुराशौ लवणसमुद्रे प्रक्षिप्य पुनः शरधिं तूणीरं प्रविष्टम् ; किमिव इत्याह,—महोरगः महासर्पः स्वभ्रमिव बिलमिव । "रन्ध्रं स्वभ्र वपा शुषिः" इत्यमरः, सर्पो यथा बिलं प्रविशति तद्वदित्यर्थः । उपजातिः वृत्तम् ।

(४२) पितुः नारायणस्य मध्यमं पदम् आकाशम् । "अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः" इति रघुः । उत्पतन्ती वियन्मार्गेण गच्छन्तीत्यर्थः । एषा सुराङ्गना अप्सराः प्रसभं बलेन मे मम शरीरात् मनः कर्षति ।

द्वितीयोऽङ्कः ।

[ततः प्रविशति विदूषकः]। (१)

विदू। अविद अविद भो! णिमंतणिओ परमण्णेण विअ राअरहस्सेण फुटमाणेण ण सक्कणोमि जणाइण्णे अत्तणो जीहं धारिदुं; ता जाव सो राआ धम्मासणगदो भवे, दाव इमस्सिं विरलजणसंपादे देवच्छंदप्पासादे अहिरुहिअ चिट्ठिस्सं। (क) (२) [परिक्रम्योपविश्य पाणिभ्यां मुखं पिधाय स्थितः]।

[ततः प्रविशति चेटी]।

चेटी। आसत्तम्हि देईए कासिराअदुहिदाए, जधा,—

(क) अविद अविद भोः! निमन्त्रणिकः परमान्नेनेव राजरहस्येन स्फुटता न शक्नोमि जनाकीर्णे आत्मनो जिह्वां धारयितुं, तद्यावत् स राजा धर्मासनगतो भवेत्, तावदस्मिन् विरलजनसम्पाते देवच्छन्दप्रासादे अधिरुह्य स्थास्यामि।

किमिवेत्याह—खण्डितायादिति।—राजहंसी खण्डितायात् वृन्तितमुखात् मृणालात् सूत्रमिव। पूर्वरागे हि दशधा दशा प्रोक्ता, अत्र तु सूत्रग्रहणकथनात् मनःसङ्कल्पा राज्ञो द्वितीया दशा सूचिता। तदुक्तं दर्पणे—"दृङ्मनःसङ्गसङ्कल्पाः" इति। उपजातिः वृत्तम्।

---

(१) विदूषकलक्षणं यथा दर्पणे,—"कुसुमवसन्तादभिधः कामंवपुर्वेशभाषाद्यैः। हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः॥" इति।

(२) अविद अविद इति सम्भ्रमसूचकम् अव्ययम्। "सर्वमप्यौदरिकाणामभ्यवहार एव पर्य्यवस्यति" इति कारणादुदरम्भरिर्विदूषकः अभीष्टपदद्वयेन मनोभावं व्यनक्ति, निमन्त्रणिकः निमन्त्रितः स्फुटता अत्युष्णेन इत्यर्थः परमान्नेन हेतुना परमान्नभोजनलोभात् आत्मनो जिह्वां धारयितुं लालायितत्वात् यथा न शक्नोति, तथा अहमपि अन्तःस्फुटता राजरहस्येन जिह्वा धारयितुं न शक्नोमि, राजरहस्यं गोपयितुं न पारयामीत्यर्थः।

"हञ्जे णिउणिए! जदो पहुदि भअवदो सुज्जस्स उअत्थाणं कदुअ पडिणिउत्तो महाराओ, तदो पहुदि सुसंहिअओ विअ लक्खीअदि; ता तुमंपि अज्जमाणवअादो जाणाहि से उक्कण्ठाकारणं" त्ति। ता कधं सो बम्हबंधू अब्भत्थिदव्वो? अधवा तिणलग्गं विअ ओसाअसलिलं ण तस्सिं राअरहस्सं चिरं चिट्ठिस्सदि त्ति तक्केमि; ता जाव णं अण्णेसामि। [परिक्रम्य दृष्ट्वा]। अम्महे! आलेक्खबाणरो विअ किंपि मंतअंतो णिंहुदो अज्जमाणवओ चिट्ठदि; ता जाव णं उपसप्पामि। [उपसृत्य]। अज्ज! वंदामि। (ख) (३)

विदू। सोत्थि भोदिए। [स्वगतम्]। एदं दुट्ठचेलिअं पेक्खिअ तं राअरहस्सं हिअअं भिंदिअ णिक्कमदि विअ। [किञ्चिन्मुखं संहृत्य प्रकाशम्]। भोदि णिउणिए! सङ्कीदवावारं उज्झिअ कहिं पउत्तासि?। (ग) (४)

(ख) आज्ञप्ताऽस्मि देव्या काश्मीराजदुहित्रा, यथा,—"अयि निपुणिके! यतः प्रभृति भगवतः सूर्यस्य उपस्थानं कृत्वा प्रतिनिवृत्तो महाराजः, ततः प्रभृति शून्यहृदय इव लक्ष्यते, तस्मात् त्वमपि आर्य्यमाणवकात् जानीहि तस्य उत्कण्ठाकारणम्" इति। तत् कथं स ब्रह्मबन्धुरभ्यर्थितव्यः? अथवा तृणलग्नमिव अवश्यायसलिलं न तस्मिन् राजरहस्यं चिरं स्थास्यतीति तर्कयामि। तदुपावदेनमन्विष्यामि। अहो! आलेख्यवानर इव किमपि मन्त्रयन् निष्कुट आर्य्यमाणवकस्तिष्ठति, तदुपावदेनमुपसर्पामि। आर्य्य! वन्दे।

(ग) स्वस्ति भवत्यै। एनां दुष्टचेटिकां प्रेक्ष्य तद्राजरहस्यं हृदयं भित्त्वा निष्क्रामतीव। भवति निपुणिके! सङ्गीतव्यापारमुज्झित्वा कुत्र प्रवृत्ताऽसि?।

---

(३) आर्य्यमाणवकादिति।—माणवक इति विदूषकस्य नाम। ब्रह्मबन्धुः कुत्सितब्राह्मणः। अभ्यर्थितव्यः किंरूपया अभ्यर्थनया तस्माद्राजरहस्यं ज्ञातव्यमित्यर्थः। अवश्यायसलिलं शिशिरजलम्।

(४) कुत्र प्रवृत्ताऽसि नियुक्ताऽसि? किमर्थं कुत्र गच्छसीत्यर्थः।

चेटी। देईए अअणेण अज्जं ज्जेव पेक्खदुं। (घ)

विदू। किं तत्थभोदी आणवेदि ?। (ङ)

चेटी। देई भणादि, जधा, अज्जस्स मम उअरि अदक्खिण्णं, ण मं अणुभूअवेअणं दुक्खिदं अवलोअदि त्ति। (च)(५)

विदू। णिडणिए! किं पिअवअस्सेण पडिकूलं किंपि समाचरिदं ?। (छ)

चेटी। जं णिमित्तं उण भट्टा उक्कण्ठिदो, ताए इत्थिआए णामेण भट्टिणा देई आलविदा। (ज) (६)

विदू। [स्वगतम्]। कधं सअंज्जेव तत्थभअदा बअस्सेण रहस्सभेओ किदो, किं दाणिं अहं बम्हणो जीहां रक्खिदुं समत्थोम्हि ? [प्रकाशम्]। आं, तत्थभोदी उब्बसि त्ति अच्छरा, ताए दंसणेण उम्मादिदो ण केवलं तं आआसेदि, मंपि बम्हणं असिदब्बविमुहं दिढं पीलेदि। (झ)

(घ) देव्या वचनेन आर्य्यमेव प्रेक्षितुम्।

(ङ) किं तत्रभवती आज्ञापयति ?।

(च) देवी भणति, यथा, आर्य्यस्य ममोपरि अदाक्षिण्यं, न मामनुभूतवेदनां दुःखितामवलोकयतीति।

(छ) निपुणिके! किं प्रियवयस्येन प्रतिकूलं किमपि समाचरितम् ?।

(ज) यन्निमित्तं पुनर्भर्त्ता उत्कण्ठितः तस्याः स्त्रिया नाम्ना भर्त्रा देवी आलपिता।

(झ) कथं स्वयमेव तत्रभवता वयस्येन रहस्यभेदः कृतः, किमिदानीमहं

---

(५) अदाक्षिण्यं, परच्छन्दानुवर्त्तित्वं दाक्षिण्यं, तद्राहित्यम् अदाक्षिण्यं, मन्मनोविपरीताचारीति भावः। यतः, अनुभूतवेदनाम् अनुभूता सञ्जीकृता वेदना पीड़ा यया सा; केनापि कारणेन सञ्जातां वेदनामहमनुभवामि, अत एव दुःखितां मां भवान् नावलोकयति। दुःखे दुःखानुभावो दूरमाशाम्, अन्तर्वेदनाजनितपीड़ां मां न पश्यसीति भावः।

(६) स्त्रीभ्रान्त्या तन्नाम्ना देवी अभ्दितेत्यर्थः।

चेटी। [स्वगतम्]। उववादिदो मए भेओ भट्टिणो रहस्सदुग्गस्स ; ता गदुअ देवीए एदं णिवेदेमि। (अ) (७)

[इति प्रस्थातुमुद्यता]।

विदू। णिउणिए! विस्सवेहि मम वअणेण कासिराअदुहिदरं, परिस्संतम्हि इमाए मिअतिस्साए पिअवअस्सं णिअत्तावेदुं, जइ भोदीए मुहकमलं पेक्खिस्सदि तदो णिअत्तिस्सदि त्ति। (ट)

चेटी। जं अज्जो आणवेदि। (ठ)

[इति निष्क्रान्ता]।

वैतालिकः। [नेपथ्ये पठति]। जयति जयति देवः।—

आ लोकान्तप्रतिहततमोवृत्तिरासां प्रजानां
तुल्योद्योगस्तव च सवितुश्चाधिकारो मतो नः।
तिष्ठत्येकक्षणमधिपतिर्ज्योतिषां व्योममध्ये
षष्ठे काले त्वमपि लभसे देव! विश्रान्तिमङ्कः॥ (८)

ब्राह्मणो जिह्वां रचितुं समर्थोऽस्मि? आ, तत्रभवती उर्वशीत्यस्मराः, तस्या दर्शनेन उन्मादितो न केवलं तामायासयति मामपि ब्राह्मणम् अग्नितव्यविमुखं दृढ़ पीडयति।

(अ) उपपादितो मया भेदो भर्तुः रहस्यदुर्गस्य, तद्गत्वा देव्यै एतत् निवेदयामि।

(ट) निपुणिके! विज्ञापय मम वचनेन काशीराजदुहितरं, परिश्रान्तोऽस्मि यस्या मृगतृष्णायाः प्रियवयस्यं निवर्त्तयितुं, यदि भवत्या मुखकमलं प्रेक्षिष्यते तदा निवर्त्तिष्यते इति।

(ठ) यदार्य्य आज्ञापयति।

---

(७) भर्तुः रहस्यदुर्गस्य भेदः उपपादितः, दुर्भेद्यस्य गोप्यस्य उद्भेदनं कृतमित्यर्थः।

(८) आ लोकान्तं भुवनान्तपर्य्यन्तं प्रतिहता निराकृता तमसः अन्धकारस्य वृत्तिर्व्यापारो येन सूर्य्येण। रवेरुदयमात्रेण निरस्ततमो जगत् जातमिति भावः। राजपक्षे,—आलोकान्तात् दर्शनमात्रात्, (अत्र तु अन्तशब्दो विषयवाची, "अन्तः स्वरूपे

विदू। [कर्णं दत्त्वा]। एसो उण पिअवअस्सो धम्मासणादो समुत्थिदो इधज्जेव आअच्छदि, ता जाव पासपरिवत्तो होमि। (ङ)

[इति निष्क्रान्तः]।

[प्रवेशकः]। (९)

[ततः प्रविशति उत्कण्ठितो राजा विदूषकश्च]।

राजा।—

आ दर्शनात् प्रविष्टा सा मे सुरलोकसुन्दरी हृदयम्।
बाणेन मकरकेतोः कृतमार्गमवन्ध्यपातेन ॥ (१०)

विदू। सपीड़ा क्खु जादा तत्थभोदी कासिराअ-दुहिदा। (ढ)

राजा। [गिरीक्ष्य]। रक्ष्यते भवता रहस्यनिक्षेपः ?।

(ङ) एष पुनः प्रियवयस्यो धर्मासनात् समुत्थित इहैवागच्छति, तदहमपि पार्श्वपरिवर्त्ती भवामि।

(ढ) सपीडा खलु जाता तत्रभवती काशीराजदुहिता।

निकटे प्राप्ते निश्चयनाशयोः" इति हेमचन्द्रः) प्रतिहता निरस्ता तमसो ग्लानेर्व्याप्तिर्व्यापारो येन, तमस्तु ज्ञानवैपरीत्यं, तदत्र ग्लानिरित्यनुमीयते, न तु अज्ञानं, रागदर्शनभावेऽज्ञाननाशस्यासम्भवात्। आसां प्रजानां सम्बन्धे तव सवितुश्च तुल्योद्योगः सदृशारम्भः; सदृशकार्यकारिणौ उभौ इत्यर्थः। तथा ज्योतिषां ग्रहनक्षत्राणामधिपतिः सूर्यः व्योममध्ये एकक्षणं तिष्ठति, मध्याह्नक्षणं विश्रान्तिसमयः सूर्यस्य। हे देव! त्वमपि अस्मिन् दिवसस्य षष्ठे काले षड्भागे विश्रान्तिं लभसे। मन्दाक्रान्ता वृत्तम्।

(९) प्रवेशकलक्षणं यथा दर्पणे—"प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः। अङ्कद्वयान्तर्विज्ञेयः प्रेक्षं विष्कम्भके यथा ॥" इति।

(१०) सा सुरलोकसुन्दरी उर्वशी या दर्शनात् दर्शनावधि दर्शनमात्रमेव इत्यर्थः अवन्ध्यपातेन सार्थकपतनेन मकरकेतोः कन्दर्पस्य बाणेन कृतमार्गं कृतद्वारं मे मम हृदयं प्रविष्टा। आर्या वृत्तम्।

विदू। [आत्मगतम्]। वञ्चिदम्हि दासीए धीआए णिउणिआए, अण्णधा कधं विअ संपुच्छदि वअस्सो ?। (ण)

राजा। किं भवान् तूष्णीमास्ते ?।

विदू। भो! एव्वं मए जीहा संजंतिदा, जेण भवदो वि णत्थि पडिवअणं। (त)

राजा। युक्तम्; अथ केन इदानीमात्मानं विनोदयामि ?।

विदू। भो! महाणसं (११) गच्छम्ह। (थ)

राजा। किं तत्र ?।

विदू। तहिं पञ्चविहस्स अब्भवहारस्स उत्तमण्णसंभारस्स भोअणं, मोअअसक्करपप्पूलेहिं उक्कण्ठं विणोदेदु। (द) (१२)

राजा। तत्र ईप्सितरससन्निधानाङ्गवता रंस्यते; मया पुनः कथमसुलभप्रार्थयितव्य आत्मा विनोदयितव्यः ?।

विदू। णं भवंपि तत्थभोदीए उव्वसीए दंसणपधं गदो ?। (ध)

(ण) वञ्चितोऽस्मि दास्याः दुहित्रा निपुणिकया, अन्यथा कथमिव संपृच्छति वयस्यः ?।

(त) भोः। एवं मया जिह्वा संयन्त्रिता, येन भवतोऽपि नास्ति प्रतिवचनम्।

(थ) भोः! महानसं गच्छामः।

(द) तत्र पञ्चविधस्य अभ्यवहारस्य उत्तमान्नसम्भारस्य भोजनं, मोदकशर्करा-पर्पटैः उत्कण्ठां विनोदयतु।

(ध) ननु भवानपि तवभवत्या उर्वश्या दर्शनपथं गतः ?।

---

(११) महानसं पाकशालाम्।

(१२) अभ्यवहारस्य भोज्यस्य। पर्पटः पिष्टकविशेषः (पाँपर इति भाषा) "पर्पटास्ते सदाङ्गारभृष्टाः परमरोचकाः। दीपनाः पाचका रुच्या गुरवः किञ्चिदीरिताः॥ मौद्गाश्च तद्गुणाः प्रोक्ता विशेषाल्लघवो हिताः। चणकस्य गुणैर्युक्ताः पर्पटाश्चणकोद्भवाः॥ स्नेहे भृष्टास्तु ते सर्वे भवेयुर्मध्यमा गुणैः॥" इति भावप्रकाशः।

राजा। ततः किम् ?।

विदू। ण क्खु दे दुल्लह त्ति तक्केमि। (न)

राजा। पक्षपातोऽपि तस्याः रूपस्यालौकिक एव। (१३)

विदू। एव्वं! वट्टदि कोदूहलं, किं दाव तत्थभोदीए उव्वसीए रूएण अहं ज्जेव दुदिओ निरूपिदो ?। (प) (१४)

राजा। प्रत्यवयववर्णना तु न ज्ञता मया, तेन हि श्रूयतां समासतः। (१५)

विदू। भो! अवहिदोम्हि। (फ)

राजा। वयस्य!—

आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः।
उपमानस्यापि सखे! प्रत्युपमानं वपुस्तस्याः॥ (१६)

(न) न खलु ते दुर्लभेति तर्कयामि।

(प) एवं! वर्त्तते कौतूहलं, किं तावत् तत्रभवत्या उर्वश्या रूपेण अहमेव द्वितीयो निरूपितः ?।

(फ) भोः! अवहितोऽस्मि।

---

(१३) त्वमपि सदृशाधिकरूपवान्, त्वद्दर्शनेन सा समुत्सुका स्वयमेव त्वां वृणुते इति विदूषकस्याभिप्रायं ज्ञात्वा राजाह,—वयस्य! किं बहुना "पक्षपातोऽपि तस्या रूपस्यालौकिक एव।" अलौकिकः साधारणज्ञानैरननुमेय इतरजनज्ञानवैभवादहिरवस्थित इत्यर्थः। मादृशा हि साधारणाः, अत एव तद्रूपपक्षपातित्वेऽपि नास्माकमधिकारः, कथमस्मदीयं रूपं तद्रूपाहरणे प्रभवति ? सर्वमप्येतत् व्यर्थम्। अन्यत् सर्वं विमुच्य हृदयेन तत्पक्षावलम्बन पक्षपातः।

(१४) एवं। कौतूहलं वर्त्तते, दर्शनायेति शेषः। वयस्य! कथमुर्वश्या रूपेण अहं द्वितीयो निरूपितः ? अहं यादृग्रूपवान्, कथमुर्वशी तादृग्रूपवती ? रूपसादृश्यमावयोः साम्यं किम् ?।

(१५) प्रत्यवयववर्णना प्रत्यङ्गवर्णना। समासतः संक्षेपेण।

(१६) शोभाप्रदम् आभरणं तदङ्गविन्यस्तं सत् स्वयमेव शोभते न तु शोभयति; तदाह, तस्या वपुः आभरणस्याभरणम्, आभरणस्यानं प्रत्येकं हृद्यः

विदू। इदं दाव मिअतिसारसाहिलासिणा चाँदएण विअ दिव्वरसाहिलासिणा भअदा चारुरूअत्तणं परिग्गहिदं। (ब) (१७)

राजा। विविधशिशिरोपचारान्नान्यत् शरणमस्ति, (१८) तद्भवान् प्रमदवनमार्गमादेशयतु।

विदू। [स्वगतम्]। का गदी? [प्रकाशम्]। इदो इदो भवं। [इति परिक्रामतः]। एसो पमदवणपरिसरो अणालविदोवि पत्तुवगदो (१९) आअंतुणा दक्खिणमारुएण। (भ)

राजा। उपपन्नं विशेषणमस्य वायोः, अयं हि,—

(ब) इदं तावन्मृगतृष्णारसाभिलाषिणा चन्द्रेणेव दिव्यरसाभिलाषिणा भवता चारुरूपत्वं परिगृहीतम्।

(भ) का गतिः? इत इतो भवान्। एष प्रमदवनपरिसरोऽनालपितोऽपि प्रत्युपगत आगन्तुना दक्षिणमारुतेन।

पदादिकमपि ईदृशं मनोहारि, यत् किमपि अलङ्करणं तदलङ्करणे नालं, परन्तु तदङ्गपरिहितत्वादलङ्करणानि एव अलङ्क्रियन्ते इति भावः। कान्तिप्रद प्रसाधन वेशविन्यासादिकमपि तदत्। सर्वाङ्गन्तु किमिव मनोहारि, तन्न जाने; जगति न किमपीदृशञ्च पश्यामि, येन तदङ्गमुपमीयते, तदेव जगति मनोहरवस्तूनामुपमानम्। आर्य्या छन्दः।

(१७) सागरजलाकर्षणाभिलाषी चन्द्रमा जलभ्रमात् मृगतृष्णिकायां जलमाकृष्टमना यथा विफलकामो भवति, चन्द्राकर्षणतः सागरेषु जलवृद्धिर्भवति, ["चन्द्रोदयारम्भ इवाम्बुराशिः" उच्छलतीति शेषः।] तदश्चन्द्रवपुस्त्वमपि दुष्प्राप्यदिव्यरसाभिलाषी सन् विफलकामो भविष्यसि। चारुरूपत्व परिगृहीतमर्थात् वृथाचिन्तया आकृतिस्ते पाण्डुवर्णा सैव मधुरा। मृगतृष्णिकानां रात्रावसम्भवात् दिवासमुदितचन्द्रवत पाण्डुभावमापन्न इत्यर्थः।

(१८) विविधशिशिरोपचारात् नानाविधशीतलद्रव्यसेवनात् अन्यत् अपरं शरणं नास्ति; दुर्लभत्वादेव मदङ्गं नितरां दह्यते।

(१९) प्रमदवनपरिसरः प्रमदवनस्य परिसरः सीमा, प्रान्तदेश इत्यर्थः। प्रत्युपगतः प्राप्तः।

निषिञ्चन् माधवीं लक्ष्मीं लतां कौन्दीञ्च लासयन् ।
स्नेहदाक्षिण्ययोर्योगात् कामीव प्रतिभाति मे ॥ (२०)

विदू० । ईदिसो ज्जेव अहिणिवेसो भोदु । [इति परिक्रामन्] ।

इदं पमदवणं, पविसदु भवं । (म)

राजा । वयस्य ! प्रविश अग्रतः ।

उभौ । [प्रवेशं नाटयतः] ।

राजा । [सर्वं दृष्ट्वेव] । वयस्य ! साधु मनसा समर्थितः आपत्प्रतीकारः किल मम उद्यानप्रवेशः, तच्च अन्यथैव उपपन्नम् ।—

विविक्षोर्यदिदं नूनमुद्यानं नाद्य शाल्यते ।
स्रोतसेवोह्यमानस्य प्रतीपतरणं महत् ॥ (२१)

विदू० । कधं विअ ? । (य)

राजा ।—

इदमसुलभवस्तुप्रार्थनादुर्निवारं
प्रथममपि मनो मे पञ्चबाणः क्षिणोति ।

(म) दृष्टम एवाभिनिवेशो भवतु । इदं प्रमदवन, प्रविशतु भवान् ।

(य) कथमिव ? ।

---

(२०) माधवीं लक्ष्मीं निषिञ्चन् वसन्तशोभां वर्द्धयन् । पक्षान्तरे—एकया नायिकया सङ्गच्छमानः, लतां कौन्दीञ्च लासयन् पुष्पादिना विकासयन्, अन्यत्र—हास्यकौतुकादिना अन्याञ्च उल्लासयन् । स्नेहदाक्षिण्ययोर्योगात्, वायुपक्षे—स्नेहस्य शैत्योपयोगिनो जलतुषारशीकरादिकस्य तथा दाक्षिण्यस्य दक्षिणदिग्वर्त्तित्वस्य तयोः योगात् । पक्षान्तरे—स्नेहः आसक्तिस्तथा दाक्षिण्यम् अनुकूलता तयोर्योगः, सर्वत्र समस्नेहदाक्षिण्यसम्पन्न इत्यर्थः । कामिन एव कामोपभोगार्थं सर्वनायिकासु समदृष्टयो भवन्ति, न तु प्रणयिन इति कामिशब्दतात्पर्यम् । अनुष्टुप् छन्दः ।

(२१) विविक्षोः प्रवेष्टुमिच्छोः, समेति शेषः । इदं माधवीलक्ष्मी-सन्दर्शनम् । उह्यमानस्य नीयमानस्य । प्रतीपतरणं प्रतिकूलसन्तरणं, प्रतिकूलस्रोतसा सन्तरणं यथा दुःखावहं तथा मम उद्यानप्रवेशोऽपि इति निष्कर्षः ।

किमुत मलयवातोन्मूलितापाण्डुपत्रै-
रुपवनसहकारैर्दर्शितेष्वङ्कुरेषु ? ॥ (२२)

विदू। अलं भवदो परिदेविदेण, अइरेण इच्छिदसंपादओ अणंगो ज्जेव दे सहाओ हुविस्सदि त्ति। (र)

राजा। प्रतिगृहीतं ब्राह्मणवचनम्।

[इति परिक्रामतः]।

विदू। पेक्खदु पेक्खदु भवं वसंतावदारसूअअस्स अहि-रामत्तणं (२३) पमदवणस्स। (ल)

राजा। ननु ! प्रतिपदमेव तावदवलोकयामि। अत्र हि।—

अग्रे स्त्रीनखपाटलं कुरुवकं श्यामं द्वयोर्भागयो-
र्बालाशोकमुपोढ़रागसुभगं भेदोन्मुखं तिष्ठति।
ईषद्धूसरजःकणाग्रकपिशा चूते नवा मञ्जरी
मुग्धत्वस्य च यौवनस्य च सखे ! मध्ये मधुश्रीः स्थिता॥ (२४)

(र) अलं भवतः परिदेवितेन, अचिरेण इष्टसम्पादकोऽनङ्ग एव ते सहायो भविष्यतीति।

(ल) प्रेक्षतां प्रेक्षतां भवान् वसन्तावतारसूचकस्य अभिरामत्वं प्रमदवनस्य।

---

(२२) पञ्चबाणः प्रथममपि उद्यानप्रवेशात् पूर्वमपि अमुलभवस्तुप्रार्थनासु दुष्प्राप्योर्वशीलाभरूपाभिलाषेषु दुर्निवारं निवारयितुमशक्य मे मनः क्षिणोति दुनोति। इदानीन्तु दक्षिणपवनापसारितपाण्डुपत्रैर्नवोद्भिन्नप्रवालोपलक्षितैः इत्यर्थः, उद्यान-सहकारैर्दर्शितेषु कन्दर्पनयनपथपातितेषु अङ्कुरेषु सत्सु किमुत ? कामस्तु निःसहाय एव एवं क्लेशप्रदायी, सहायवान् पुनः किं न करोति ? अत एव स्त्रीतोवेगं परिहर्तुमनसः प्रतीपतरमिव प्राग्वर्त्यमुद्यानप्रवेशो मे विशिष्टक्लेशप्रदायी जातः। वसन्ताभरणभूतचूताङ्कुरदर्शनादिना मनो मे द्विगुणं ज्वलतीति भावः। मालिनी छन्दः।

(२३) वसन्तस्य अवतारः आविर्भावः तस्य सूचकः द्योतकः। अभिरामत्वं मनोहरत्वम्।

(२४) हे सखे ! मधुश्रीः मुग्धत्वस्य च यौवनस्य च मध्ये स्थिता नातिव्यक्ता

विदू। भो! एसो कसणमणिसिलावट्टसणाहो (२५) माहवी-लदामंडओ भमरसंह-पअविहडिदेहिं कुसुमेहिं किदोवआरो विअ अत्तभवदो वट्टदि; ता अणुग्गहीअदु एसो। (व)

राजा। यदभिरोचते भवते।

[इति उपविशतः]।

विदू। ता दाणिं इहासीणो ललिदलदालोहमाणलोअणो उव्वसीगदं उक्कंठं विणोदेदु भवं। (श)

(व) भोः। एष कषणमणिशिलापट्टसनाथो माधवीलतामण्डपो भ्रमरसङ्घपद-विघट्टितैः कुसुमैः कृतोपचार इव अत्रभवतो वर्त्तते; तदनुगृह्यतामेषः।

(श) तदिदानीमिहासीनो ललितलतालोभमानलोचन उर्वशीगतामुत्कण्ठां विनोदयतु भवान्।

मापि अन्यथा इति भावः। कथम्? अग्रे इत्यादिना तद्विवृणोति। अग्रे समन्तं, स्त्रीनखपाटलं. पाटलं पुष्पं स्त्रीनखसदृशमग्रे दृश्यते, कुरुवकं द्वयोर्भागयोः श्यामं, तटाकारस्वरूपवर्णनमेतत्। बालाशोकम् अनुद्भिन्नत्वात् उपोढरागसुभगं सञ्जात-लोहित्यात् सुन्दरं सत भेदोन्मुखं तिष्ठति, चूते आम्रवृक्षे नवा मञ्जरी ईषद्भरजःकणया अल्पसञ्जातपरागलेशेन अग्रकपिशा अग्रभागपांशुला। इत्यादिभिः कारणैः मधुश्रियो वसन्तलक्ष्म्या नातिव्यक्तिर्नापि अव्यक्तिर्व्यज्यते। मौग्ध्ययौवनान्तर्गतस्त्रीपक्षे तु,—अग्रे प्रथमं स्त्रीनखपाटलं यौवनारम्भे स्त्रीनखान्येव पाटलानि भवन्ति। कुरुवकं बालास्तनवत्, बालास्तनयोः कुरुवकाकारत्वादेव कुरुवकेणैव बालास्तनत्वमवगम्यते। कुरुवकस्य अर्थात् कुचयुगस्य भागद्वयं चुचुकद्वयस्याग्रभाग इति यावत्, श्यामम्। बालाशोकम् उपोढ़रागसुभगम् अन्तःसञ्जातानुरागेण सुन्दरम् अत एव अग्रोकं प्रफुल्लाकारं यथा तथा, यौवनोद्गमे बालास्तु सदैव प्रफुल्लाकारमुद्वहन्तीति दृष्टान्तात्; भेदोन्मुखं विकाशोन्मुखं तिष्ठति। पुनः किम्भूता? ईषद्भवद्भरजःकणा," स्पष्टार्थम्। चूते नवा नवोद्गता मञ्जरी अग्रकपिशा अग्रभागकपिशा। "चूते मञ्जरी" पद-द्वयमश्लीलत्वात् न व्याख्यातम्। शारदायां चूतशब्दार्थदर्शनादेव अर्थव्यक्तिर्भविष्यति। शार्दूलविक्रीडितं छन्दः।

(२५) यत्र उद्भूय सुवर्णस्य विशुद्धिः परिज्ञायते सा शिला निकषपाषाणादि-नाम्ना प्रसिद्धा। (कष्टिपाथर इति वङ्गभाषा)।

राजा। [निश्वस्य]।—

बहुकुसुमितास्वपि सखे! सोपवनलतासु रम्यविटपासु।
चक्षुर्बध्नाति धृतिं तदङ्गनालोकदुर्ललितम्॥ (२६)
तदुपायश्चिन्त्यतां यथा सफलप्रार्थनो भवेयम्।

विदू। [विहस्य]। भो भो! अहल्लाकामुअस्स इंदस्स वज्जो सचिवो, उव्वसीपज्जुसुअस्स भवदोवि अहं, दुवे वि एत्थ उम्मत्तआ। (ष) (२७)

राजा। न खलु चिन्तयति भवान्?।

विदू। [चिन्तयति]। एस चिंतेमि; मा उण परिदेविदेहिं समाधिं भंजिस्ससि। [निमिषं मूर्धयित्वा आत्मगतम्]। अहो! अहं कज्जदंसी। (स)

राजा।—

असुलभा सकलेन्दुमुखी च सा
किमपि चेदमनङ्गविचेष्टितम्।

(ष) भीः! भीः। अहल्याकामुकस्य इन्द्रस्य वज्र सचिवः, उर्वशीपर्युत्सुकस्य भवतोऽपि अहं, द्वावप्येव उन्मत्तौ।

(स) एष चिन्तयामि, मा पुनः परिदेवितैः समाधिं भङ्क्ष्यसि। अहो! अहं कार्यदर्शी।

---

(२६) तस्या अङ्गनायाः उर्वश्याः आलोकेन दर्शनेन दुर्ललितमस्थिरं तद्दर्शनेन मे प्रतिहतमस्ति इदानीं केष्वपि धृतिं न बध्नाति। आर्या छन्दः।

(२७) अहल्याकामुक इन्द्रोऽहल्यापाप्तिविषये यदि वज्रमयोजयिष्यत्, तदा तस्य यथा कार्यसिद्धिसम्भावना, तथैव मन्नियोगेन कार्यसिद्धिस्ते भविष्यति। द्वावप्यावामेव उन्मत्तौ एतत्कार्यज्ञानहीनौ। वज्रं हि शत्रुदलने क्षमम् अहमप्यन्यत्र, काऽऽवयोः क्षमता एतच्चिन्तने? अत्र नियोगे तु उन्मत्तवत् कार्यविध्वंसिनौ भवेव इति भावः।

(२८) सकलेन्दुमुखी पूर्णचन्द्रनिभानना सा उर्वशी असुलभा नितरां दुष्प्राप्या, किमपि च मयि इदमनङ्गविचेष्टितम् अनङ्गविक्रीडितं, तथापि

अभिमुखीष्विव वाञ्छितसिद्धिषु
व्रजति निर्वृतिमेकपदे मनः ॥ (२८)

[इति मदनोत्सुकमास्ते]।

[ततः प्रविशति आकाशयानेन उर्वशी चित्रलेखा च]।

चित्र। सहि उव्वसि! कहिं क्खु अणिद्दिट्ठकारणं गच्छीअदि ?। (ङ)

उर्व। [मदनवेदनामभिनीय सलज्जम्]। सहि! हेमकूडसिहरे लदाविडवे लग्गं वेजअंतिअं मोआवेहि त्ति मए भणिदा, तुए उण उअहसिअ भणिदाम्हि, दिढं क्खु लग्गा, ण सक्का मोआविदुं; दाणिं पुच्छसि, कहिं अणिद्दिट्ठकारणं गच्छीअदि ?। (च)

चित्र। किं णु क्खु तस्स राएसिणो पुरूरवस्स सआसं पत्थिदासि ?। (क)

उर्व। एसो सो अगणिदलज्जो ववसाओ। (ख) (२९)

चित्र। को उण सहीए पढमं तहिं पेसिदो ?। (ग)

उर्व। णं हिअओ। (घ)

(ङ) सखि उर्वशि। कुत्र खलु अनिर्दिष्टकारणं गम्यते ?।

(च) सखि। हेमकूटशिखरे लताविटपे लग्नां वैजयन्तिकां मोचयेति मया भणिता, त्वया पुनरुपहस्य भणिताऽस्मि, दृढं खलु लग्ना न शक्ता मोचयितुम्; इदानीं पृच्छसि कुत्र अनिर्दिष्टकारणं गम्यते ?।

(क) किं नु खलु तस्य राजर्षेः पुरूरवसः सकाशं प्रस्थिताऽसि ?।

(ख) एष सोऽगणितलज्जो व्यवसायः।

(ग) कः पुनः सख्या प्रथमं तत्र प्रेषितः ?।

(घ) ननु हृदयम्।

अभिमुखीषु वाञ्छितसिद्धिषु सम्पन्नोन्मुखीषु इष्टसिद्धिषु यथा मनस्तुष्टिर्जायते तद्वत् ममापि अद्य मनः एकपदे संशयराहित्येन निर्वृतिं सन्तोषमेति। द्रुतविलम्बितं छन्दः।

(२९) विना प्रार्थनया कामिनीनामभिसारी लज्जाराहित्यद्योतक इति भावः।

चिव। तधावि संपधारीअदु दाव। (ङ) (३०)

उवं। मअणो क्खु णिओएदि मं, कुदो संपधारणा ?। (च) (३१)

चिव। अदो अवरं णत्थि मे उत्तरं। (छ)

उवं। तेण आदिसदु मे पिअसही मग्गं, जेण तहिं गच्छंतीए ण अंतराओ भवे। (ज)

चिव। सहि ! वीसत्था होहि ; णं भअवदा देअगुरुणा अवराइदं णाम सिहाबंधणीं विज्जं उअदिसंतेण तिदसप्पडिपक्खस्स अलंघणीआ कदम्ह। (झ) (३२)

उवं। [सलज्जम्]। ताए पओअं सव्वं सुमरेसि ?। (ञ)

चिव। हिअओ एदं सव्वं जाणादि। (ट) (३३)

(ङ) तथापि सम्प्रधार्यतां तावत्।

(च) मदनः खलु नियोजयति मां, कुतः सम्प्रधारणा ?।

(छ) अतोऽपरं नास्ति मे उत्तरम्।

(ज) तेन आदिश्यतु मे प्रियसखी मार्गं, येन तव गच्छन्त्या न अन्तरायो भवेत्।

(झ) सखि। विस्रब्धा भव ; ननु भगवता देवगुरुणा अपराजितां नाम शिखाबन्धनीं विद्यामुपदिशता त्रिदशप्रतिपक्षस्य अलङ्घनीये कृते स्वः।

(ञ) तस्याः प्रयोगं सर्वं स्मरसि ?।

(ट) हृदयमेतत् सर्वं जानाति।

(३०) सम्प्रधार्यताम् आकृष्य स्वपदे स्थाप्यताम्।

(३१) मदननियोगे मत्प्रभुत्वस्यासम्भाव्यात्।

(३२) साम्प्रतिकापद्विमुक्तेः पुरन्दरसा तद्दैत्यहन्तादस्माकमुद्धारात् परतरं हि बृहस्पतिना अपराजिता नाम या शिखाबन्धनी विद्या नो दत्ता, तत्प्रभावेण असुराः पुनरस्मासु अपराद्धुमशक्ताः। शिखाबन्धनी बृहस्पतिदत्तमन्त्रोच्चारणेन केशांशबन्धनरूपा।

(३३) असुरावलेपात् क्लेशितेषु हृदयेषु तन्निखातनिर्व्याजे।

उर्व। सहि! हिअअं एदं सव्वं जाणादि ज्जेव; मम उण सधावि अदिभएण अणिच्चओ। (ठ) (२४)

उभे। [श्रवणं रूपयतः]।

चित्र। सहि! पेक्ख पेक्ख, एदं भअवदीए भाईरहीए जउणासंगमपावणेसु सलिलेसु पुण्णेसु अवलोअंतस्स विअ अत्ताणअं पइट्ठाणस्स सिहाभरणभूदं विअ तस्स राएसिणो भवणं उवगदम्ह। (ड) (२५)

उर्व। [सस्पृहमवलोक्य]। णं बोत्तव्वं ठाणांतरगदो सग्गो त्ति। हला! कहिं सो आवण्णाणुकंपो भवे?। (ढ) (२६)

चित्र। एदस्सिं णंदणवणेक्कप्पदेसे (२७) विअ पमदवणे ओदरिअ जाणिस्सामो। (ण)

(ठ) सखि! हृदयमेतत् सर्वं जानात्येव; मम पुनस्तथापि अतिभयेन अनिश्चयः।

(ड) सखि! पश्य पश्य, इदं भगवत्या भागीरथ्या यमुनासङ्गमपावनेषु सलिलेषु पुण्येषु अवलोकयत इवात्मानं प्रतिष्ठानस्य शिखाभरणभूतमिव तस्य राजर्षेर्भवनमुपगते स्वः।

(ढ) ननु वक्तव्यं स्थानान्तरगतः स्वर्ग इति। अयि! कुत्र स आपन्नानुकम्पी भवेत्?।

(ण) एतस्मिन् नन्दनवनैकप्रदेशे इव प्रमदवने अवतीर्य द्रक्ष्यामः।

---

(२४) सत्यं, किन्तु पूर्वभयसङ्कटनपर्य्यन्तं मेऽतिभयं समजनि। तत एव मे संशयः, मन्त्रमेतत् हृदयं सम्यक् स्मरति न वा संशयः।

(२५) पुण्येषु यमुनासङ्गमपावनेषु सलिलेषु आत्मानम् अवलोकयतः इव प्रतिष्ठानस्य तन्नामकस्य पुरूरवसो नगरस्य। सलिलानां प्रतिबिम्बग्रहणसामर्थ्यात् आत्मावलोकनम्। राज्ञो धर्म्मदर्शित्वात् पुरी विगतपापा, अत एव नामतः सलिलेषु वस्तुतस्तु पुण्यस्रोतःसु प्रतिबिम्बितम् आत्मानमवलोकयन्तीव स्थिता इति भावः।

(२६) आपन्नानुकम्पित्वेन पूर्वावस्थास्मरणं, तेन च मनस्तृप्तिः। प्रणयिन्यो हि अभीष्टनायकस्य गुणभागमेव पश्यन्ति। अथवा राजा आपन्नां मामद्य अनुकम्पत एव, यतः स आपन्नानुकम्पी।

उभे। [अवतरतः]।

चिव। [राजानं दृष्ट्वा सहर्षम्]। सहि! एसो पढ़मोदिदो बिअ भअवं चंदो कौमुदिं (३८) अवेक्खदि तुमं। (त)

उवं। [विलोक्य]। हला! दाणिं पढ़मदंसणादोवि सविसेसपिअदंसणो मे महाराओ पडिभादि। (थ)

चिव। जुज्जदि; ता एहि, उवसप्पम्ह। (द)

उवं। ण दाव उवसप्पिस्सं, तिरक्करिणीपच्छण्णा (३९) पास-परिवत्तिणी भविअ सुणिस्सं दाव पासपरिवर्त्तिणा वअस्सेण सह बिजणे किं मंतअंतो चिट्ठदि। (ध)

चिव। जधा दे रोअदि। (न)

उभे। [यथोक्तमनुतिष्ठतः]।

विदू। भो! चिंतिदो मए दुल्लहपणइजणस्स समागमो-बाओ। (प)

राजा। [तूष्णीमास्ते]।

(त) सखि! एष प्रथमोदित इव भगवान् चन्द्रः कौमुदीमपेक्षते त्वाम्।

(थ) अयि! इदानीं प्रथमदर्शनतोऽपि सविशेषप्रियदर्शनो मे महाराजः प्रतिभाति।

(द) युज्यते; तदेहि उपसर्पावः।

(ध) न तावदुपसर्प्यामि, तिरस्करिण्या प्रच्छन्ना पार्श्वपरिवर्त्तिनी भूत्वा श्रोष्यामि तावत् पार्श्वपरिवर्त्तिना वयस्येन सह विजने किं मन्त्रयंस्तिष्ठति।

(न) यथा ते रोचते।

(प) भोः! चिन्तितो मया दुर्लभप्रणयिजनस्य समागमोपायः।

---

(३७) इन्द्रस्य उपवनं नन्दनम्। "वनं तथा चैत्ररथं प्रसिद्धं तेष्वप्सरोनन्दन-नन्दनश्च" इति भास्कराचार्यः।

(३८) कौमुदीं ज्योत्स्नाम्। "को मोदन्ते जना यस्यां तेनासौ कौमुदी स्मृता

(३९) तिरस्कर्तुं शीलमस्याः इति तिरस्करिणी विद्याविशेषः।

उर्व। का उण धण्णा इत्थिआ, जा इमिणा परिमुग्गीअमाणा अत्ताणअं विणोदेदि ?। (फ)

चित्र। हला ! झाणस्स किं विलंबीअदि ?। (ब) (४०)

उर्व। सहि ! भीआमि क्खु सहसा पहावादो विस्सादुं। (भ) (४१)

विदू। भो ! णं भणामि चिंतिदो मए दुल्लहपणइजण-समागमोवाओ। (म)

राजा। वयस्य ! कथ्यताम्।

विदू। सिविणसमागमकारिणं णिद्दं सेवदु भवं ; अधवा तत्थभोदीए उव्वसीए पडिकिदिं चित्तफलए अहिलिहिअ आलोअंतो अत्ताणअं विणोदेदु। (य)

उर्व। हिअअ ! समस्सस। (र)

राजा। तदुभयमपि अनुपपन्नं, पश्य।—

हृदयमिषुभिः कामस्यान्तः सशल्यमिदं ततः
कथमुपलभे निद्रां स्वप्ने समागमकारिणीम्।
न च सुवदनामालेख्येऽपि प्रियां समवाप्य तां
मम नयनयोर्दृष्टाप्यत्वं सखे ! न भविष्यति ? ॥ (४२)

(फ) का पुनर्धन्या स्त्री, या अनेन परिमृग्यमाणा आत्मानं विनोदयति ?।

(ब) अयि ! ध्यानाय किं विलम्ब्यते ?।

(भ) सखि ! बिभेमि खलु सहसा प्रभावाद्विस्रातुम्।

(म) भोः ! ननु भणामि, चिन्तितो मया दुर्लभप्रणयिजनसमागमोपायः।

(य) स्वप्नसमागमकारिणीं निद्रां सेवतां भवान् ; अथवा तत्रभवत्या उर्वश्याः प्रतिकृतिं चित्रफलकेऽभिलिख्य आलोकयन्नात्मानं विनोदयतु।

(र) हृदय ! समाश्वसिहि।

---

(४०) ध्यानेन सर्वं यत् प्रत्यक्षवत् भाति, तदा ध्यानार्थं कथं विलम्ब्यते ?।

(४१) यदि नाहमेतत्स्वामीया भवेयं, तदा मे किं भवेत् ? सहसा प्रभाव-परिस्रंसने दुःखमेव भयहेतुः।

विव। सहि! सुदं तुए वअणं?। (ल)

उर्व। सुदं, ण पुण पज्जत्तं हिअअस्स। (व) (४३)

विदू। एत्तिको मे मदिविहवो। (श)

राजा। [निश्वस्य]।—

नितान्तकठिनां रुजं मम न वेद्य यो मानसीं
प्रभावविदितानुरागमवमन्यते वाऽपि माम्।
अवञ्झफलनीरसं प्रतिनिधाय तस्मिन् जने
समागममनोरथं भवतु पञ्चबाणः कृती॥ (४४)

उर्व। [सखीमवलोक्य]। हद्धी! हद्धी! मंपि एव्वं अवमच्छदि महाराओ; अहं उण असमत्थम्हि अग्गदो भविअ अत्ताणअं दंसइदुं, ता पहावणिम्मिदेण भुज्जवत्तेण लेहं संपादिअ अंतरा से खिविदुमिच्छामि। (ष)

(ल) सखि। श्रुतं त्वया वचनम्?।

(व) श्रुतं, न पुनः पर्याप्तं हृदयस्य।

(श) एतावान् मे मतिविभवः।

(ष) हा धिक्। हा धिक्। मामप्येवमवगच्छति महाराजः; अहं पुनर-

---

(४२) प्रकृतप्राप्तेः कथैव साऽस्तु, आलेख्येऽपि तां समवाप्य त्रिचपटेऽपि तां प्राप्य किं मे नयनयोरुद्वाष्पत्वं न भविष्यति? भविष्यत्येव। एतेन कृशता जागरणम् स्मृतिश्चेति विविधा कामदशा प्रकटिता। हरिणी छन्दः।

(४३) अनेन विज्ञा मम पुनर्याहक् हृदयमास्ते, न तत्पर्याप्तिकारणमेतद्वचनम् इति भावः।

(४४) यो जनः उर्वशीरूपः मम नितान्तकठिनां मानसीं रुजं न वेद न जानाति, वा अथवा प्रभावेण ध्यानबलेन विदितानुरागं ज्ञातप्रेमाणं मां अवमन्यते। पञ्चबाणः कामः तस्मिन् एवम्भूते जने अवञ्झफलनीरसं वैफल्यकठोरं समागममनोरथं प्रतिनिधाय प्रतिष्ठाप्य कृती भवतु। दुर्लभसमागमं जनं प्रति आसक्तिं जनयन् दहतु पीडयतु कृतकृत्यश्च भवतु इति भावः। एतेन क्रौर्यागान्मादरूपा कामदशा प्रख्यापिता। पृथ्वी छन्दः।

चित्र। अणुमदं मे। (स)

उर्व। [नाट्येनाभिलिख्य क्षिपति]।

विदू। अविद! भो! किस्सेदं? भुअंगणिम्मोअ (४५) किं खादिदुं मं णिवड़िदं?। (ङ)

राजा। [दृष्ट्वा]। नायं भुजङ्गनिर्मोकः, भूर्जपत्रगतोऽयमक्षरविन्यासः।

विदू। णं अदिट्ठाए उव्वसीए भवदो परिदेविअं सुणिअ भुज्जवत्ते महाणुराअसूअआ अक्खरा अहिलिहिअ विसज्जिआ भवे। (च)

राजा। नास्ति अशक्यं दैवस्य। [गृहीत्वा अनुवाच्य च सहर्षम्]। सखे! उपपन्नस्ते वितर्कः।

विदू। जं एत्थ अहिलिहिदं तं सुणिदुं इच्छामि। (क)

उर्व। साहु साहु अज्ज! णागरोसि। (ख)

राजा। श्रूयताम्। [इति वाचयति]।—

सामिअ! संभाविअ जह अहं तुए आअलिआ ण तहेअ।
अणुरत्तस्स अइ सुहअ! एअं एअ तुह णवरो ण॥ (ग) (४६)

समर्थोऽस्मि अप्सरो भूत्वा आत्मानं दर्शयितुम्; तत् प्रभावनिर्मितेन भूर्जपत्रेण लेखं सम्पाद्य अन्तरा अस्य क्षेप्तुमिच्छामि।

(स) अनुमत मे।

(ङ) अविद! भोः। किमिदम्? भुजङ्गनिर्मोकः किं खादितुं मां निपतितः?।

(च) ननु! अदृष्ट्वा उर्वश्या भवतः परिदेवितं श्रुत्वा भूर्जपत्रे महानुराग-सूचकानि अक्षराणि अभिलिख्य विसृष्टानि भवेयुः।

(क) यदत्र अभिलिखितं तत् श्रोतुमिच्छामि।

(ख) साधु साधु आर्ये! नागरीऽसि।

(ग) स्वामिन्! सम्भाव्य यथाऽहं त्वया आकलिता न तथैव।
अनुरक्तस्य अयि सुभग! एवमेव तव केवलं न॥

---

(४५) आवर्दति सम्भ्रमे। भुजङ्गनिर्मोकः सर्पत्वक्।

ण मे ललिअ-पारिजाअ-सअणिज्जम्मि पिअ ! होदि सुहं ।
णंदण वण-वाआवि हि सिहि विअ भांदि णिअसरीरए॥ (घ)(४७)

उर्व। किमु क्खु संपदं भणेदि ?। (ङ)

चित्र। किं ण भणिदं इमिणा मिलाण कमल-णाल-सरिसेहिं अंगेहिं ?। (च)

विदू। दिट्ठिआ मए बुभुक्खिदेण सोत्थिवाअणिअं विअ लद्धं भवदो समस्सासणकारणं। (छ)

(घ) न मे ललित-पारिजात-शयनीयमपि प्रिय। भवति सुखम्।
नन्दन-वनवाता अपि हि शिखिन इव भान्ति निजशरीरे॥

(ङ) किं नु खलु साम्प्रतं भणति ?।

(च) किं न भणितमनुना स्नानकमलनालसदृशैरङ्गैः ?।

(छ) दिष्ट्या मया बुभुक्षितेन स्वस्तिवाचनिकमिव लब्धं भवतः समाश्वासनकारणम्।

(४६-४७) हे स्वामिन्! हे पते! एतत्सम्बोधनपदेनैव व्यक्तीभूतमिङ्गितम्। स्वाङ्गदानप्रकटने हि नारीणां स्वामीति पदात् अन्यत् किमपि नास्ति प्रयोक्तव्यम्। त्वया सम्भाव्य अनुमाय अहं यथा यादृशी आकलिता निरूपिता, पराधीनत्वात् नास्ति ममावसरः तव मनोरथपूरणाय इत्येवं मत्स्वरूपमविज्ञाय यथा त्वयाऽहं निर्णीता, तथा तत् तेऽनुमानं न एव, यतः अहं खलु सर्वेषां स्वाधीना कामगामिनी च अन्यथा ममागमनं न सम्भवेदिति भावः। अयि सुभग! हे सुन्दर। हे प्रेमास्पदेत्यर्थः, अनुरक्तस्य अनुरागवतः सर्व्वस्यापि जनस्येत्यर्थः। एवमेव इत्थमनुमानमेव भवतीति शेषः, न केवलं तव। अथवा पूर्व्वरागवतोर्हि नायकनायिकयोः परस्परमप्राप्तौ नायिकायां नायकस्य यादृगनुमानं भवति, नायिकाया अपि नायकस्योपरि तादृश्येवानुमितिः सम्भवति, ततश्च अहमपि भवति एवमनुमिनोमि यत् त्वमपि स्वाधीनः, प्रथमदर्शनदिवसे मदभिप्रायश्च सम्यगज्ञासीः, स्वर्गारोहणपटुश्च भवान् तथापि मत्समीपे कथं न गतवान् इत्यादि। अतः परं केवलं तवैव कष्टातिशयो न सञ्जातः ममापि तथा इति प्रकटनायाह—हे प्रिय! मे मम ललितपारिजातशयनीयं कोमलपारिजातकुसुमशय्यापि न सुखं न सुखकरम्। नन्दन-वन-वाता अपि सुस्निग्धगन्धवहा अपि शिखिन इव बर्हय इव निजशरीरे भान्ति शोभन्ते, उद्दीपन-

राजा। समाश्वासनमिति किमुच्यते ? पश्य,—

तुल्यानुरागपिशुनं ललितार्थबन्धं
पत्रे निवेशितमुदाहरणं प्रियायाः।
उत्पक्ष्मलं मम सखे ! मदिरेक्षणाया-
स्तस्याः समागतमिवाननमाननेन ॥ (४८)

उर्व। एत्थ णो समविभागा मदी। (ज) (४९)

राजा। वयस्य ! अङ्गुलीस्वेदेन मे लुप्यन्ते अक्षराः, धार्यतामयं स्वहस्ते (५०) निक्षेपः प्रियायाः।

विदू। तदो किं दाणिं तत्थभोदी उव्वसी भवदो मणोरह-तरुकुसुमं दंसिअ फले विसंवददि ?। (झ)

उर्व। हला ! जाव उवत्थाणकादरं अत्ताणअं संढा-

(ज) अत्रावयोः समविभागा मतिः।

(झ) ततः किमिदानीं तवभवती उर्वशी भवतो मनोरथ-तरुकुसुमं दर्शयित्वा फले विसंवदति ?।

विभावत्वात् "कामश्चाष्टगुणः स्मृतः" इति वचनात्। प्रथमश्लोके आर्या वृत्तं, द्वितीये उद्गीतिर्नामार्याभेदः।

(४८) हे सखे! तुल्यानुरागस्य पिशुनं सूचकं ललितार्थबन्धं सुन्दरार्थप्रकाशकं पत्रे निवेशितं प्रियाया उदाहरणमवस्थानुयायिवृत्तान्तः मदिरेक्षणायास्तस्या उत्पक्ष्मलमाननमिव मम आननेन समायातम्। उदाहरणम् ईदृक्-सुन्दरार्थप्रकाशकं, यत् लेखोपलक्ष्येण तदवस्थासम्पन्नं तन्मुखमेव मन्मुखसङ्गतं सत् आत्मावस्थां कथयति। तदुक्तेर्मन्मुखोच्चारित्वात् तन्मुखस्य मन्मुखसङ्गतिः। मन्मुखे तन्मुखसङ्गत्या तस्या हर्षातिशयात् उत्पक्ष्मलत्वं, लज्जया मदिरेक्षणता च। प्रियतमायां यत् यत् आकाङ्क्षते तत् सर्वमत्रापि अस्ति इति प्रियापदोल्लेखः सार्थकितः। वसन्ततिलकं छन्दः।

(४९) लेखोपलक्ष्येण मदभिप्रायो यत्त्वया सुन्दरमवबुद्धस्तत्ते पाठभङ्ग्या प्रतीयते। अतो हि तवैतदुक्तिषु समापि अप्रियत्वमस्ति।

(५०) स्वहस्ते इति आदरातिशयद्योतकः।

वेमि, ताव तुमं अत्ताणअं दंसिअ जं मे अणुमदं, तं भणाहि। (अ) (५१)

चिव। तह। [इति तिरस्करिणीमपनीय राजानमुपसृत्य]। जेदु जेदु महाराओ। (ट)

राजा। [सम्भ्रमादरगर्भम्]। स्वागतं भवत्यै? [पार्श्वमवलोक्य]। भद्रे!—

न तथा नन्दयसि मां सख्या विरहिता तया।
सङ्गमे दृष्टपूर्वेव यमुना गङ्गया यथा॥ (५२)

चिव। णं पढ़मं मेहराई दीसदि, पच्छा बिज्जुलिआ। (ठ)

विदू। [अपवार्य]। कधं ण एसा उव्वसी उवगदा? सत्थभोदीए सहअरीए एदाए होदव्वं?। (ड) (५३)

(अ) अयि! यावदुपस्थानकातरमात्मानं संस्थापयामि, तावत् त्वमात्मानं दर्शयित्वा यन्मे अनुमतं तत् भण।

(ट) तथा। जयति जयति महाराजः।

(ठ) ननु प्रथमं मेघराजिर्दृश्यते, पश्चाद्विद्युल्लता।

(ड) कथं नैषा उर्वशी उपगता? तवभवत्याः सहचर्या एतया भवितव्यम्?।

---

(५१) उपस्थानाय सेवार्थं समीपगमनाय कातरं राज्ञः समीपगमनाय अधीरमात्मानं यावत् संस्थापयामि स्थैर्यं नयामि, तावत् त्वं प्रकाशीभूय मदनुमतं ब्रूहि। राजोक्तिश्रवणेन निरुत्तरया अप्रकाशितया च क्षणमपि स्थातुमशक्यम्। अतस्त्वं शीघ्रं गत्वा मदनुमतं कथय मा विलम्बिष्ठाः। प्रथम-मिलनकाले प्रियसमक्षं स्त्रीणां स्वत एव आत्माभिव्यक्तिः स्त्रीस्वभावविरोधिनी, अतो हि सखीसम्प्रेषणम्; "दूतीसम्प्रेषणैर्नार्यां भावाभिव्यक्तिरिष्यते" इति 'दूत्यः सखी नटी दासी' इति च साहित्यदर्पणे निर्देशात्।

(५२) गङ्गया यमुनेव प्रयागादितीर्थे गङ्गया मिलिता यमुना यथा दर्शकान् नन्दयति तया विरहिता च न नन्दयति एवं सङ्गमे सख्या सह सङ्गतावस्थायां दृष्टपूर्वा त्वं यथा आनन्दयः तया सख्या विरहिता त्वमिदानीं मां तथा न नन्दयसि।

(५३) किम् उर्वशी मतोऽप्यधिकरूपवती? इति तात्पर्यम्।

राजा। एतदासनमास्यताम्।

चिच। [उपविश्य]। उव्वसी महाराअं सिरसा पणमिअ विण्णवेदि—"। (ढ)

राजा। किमाज्ञापयति ?। (५४)

चिव। "—मम तस्सिं सुरारिसंभवे दुण्णए महाराओ जेव सरणं आसी, संपदं साहं तुह दंसणसमुत्थेण आआसिणा बलिअं बाधेयमाणा मअणेण पुणोवि महाराअस्स अणुकंपणीआ होमि। (ण) (५५)

राजा। अयि सखि!—

पर्य्युत्सुकां कथयसि प्रियदर्शनां ता-
मार्त्तिं न पश्यसि पुरूरवसस्तदर्थाम्।
साधारणोऽयमुभयोः प्रणयो यतस्त्व
त्तप्तेन तप्तमयसा घटनाय योग्यम्॥ (५६)

चिव। [उर्वशीमुपेत्य]। हला! इदो एहि, णिद्दअदरं भीसणमअणं पेक्खिअ पिअदमस्स दे दूईम्हि संवुत्ता। (त)

(ढ) उर्वशी महाराज शिरसा प्रणम्य विज्ञापयति—"।

(ण)"—मम तस्मिन् सुरारिसम्भवे दुर्नये महाराज एव शरणमासीत्, साम्प्रतं साहं तव दर्शनसमुत्थेन आयासिना बलवद्बाध्यमाना मदनेन पुनरपि महाराजस्य अनुकम्पनीया भवामि।

(त) अयि! इत एहि; निर्दयतरं भीषणमदनं प्रेक्ष्य प्रियतमस्य ते दूती अस्मि संवृत्ता।

---

(५४) रमणीनां दासत्वाङ्गीकरणं परमप्रणयवताम् उचितमेव।

(५५) पूर्वं निःसम्पर्कमेव त्वया अहमसुरहस्तात् रक्षिता, इदानीं पुनः त्वद्दर्शनसमुत्थेन ततोऽपि अधिकदारुणेन, बलवद्बाध्यमानत्वात्, मदनेन अहं क्लिश्यमाना। अधुना तत्ताड़नमपि उपशमय इति भावः।

(५६) अयि पक्षपातिनि! त्वत्सखीकृतां मम इमां यातनां न पश्यसि केवलं तदुत्सुकतामेव भाषसे, त्वं तव सखीपक्षे यत् किमपि कथयसि, सर्वेण एतेन तप्ताः

उर्व। [श्रीकात् सकम्पा ससाध्वसा]। अहं अणवत्थिदे! लहुं ज्जेव तुए परिच्चत्ता म्हि!। (य) (५७)

चित्र। [सस्मितम्]। एदस्सिं मुहुत्ते जाणिस्सामो का कं परिच्चईस्सदि त्ति। आआरं दाव पलिवज्ज। (द)

उर्व। [ससाध्वसमुपसृत्य सव्रीडम्]। जेदु जेदु महाराओ। (ध)

राजा। [सहर्षम्]। सुन्दरि!—

मया नाम जितं यस्य त्वया जय उदीर्य्यते।
जयशब्दः सहस्राक्षादागतः पुरुषान्तरम्॥ (५८)

[इति गृहीत्वा आसने उपवेशयति]।

चित्र। कीदिसी ट्ठिदी भोदिए? रण्णो पिअवअस्सी बम्हणी ण वंदीअदि?। (न) (५९)

उर्वशी। [सस्मितं प्रणमति]।

(य) अयि अनवस्थिते! लघु एव त्वया परित्यक्ताऽस्मि।।

(द) एतस्मिन् मुहूर्त्ते ज्ञास्यामः का कां परित्यक्ष्यतीति। आकारं तावत् प्रतिपद्यस्व।

(ध) जयति जयति महाराजः।

(न) कीदृशी स्थितिर्भवत्याः? राज्ञः प्रियवयस्यो ब्राह्मणी न वन्द्यते?।

पर्य्युत्सुकत्वमेव व्यज्यते, मम तु तदर्थं विषमार्त्तिर्जनिता, तत्र पश्यसि इति भावः। वसन्ततिलकं छन्दः।

(५७) अयि अव्यवस्थिते! कथं राज्ञो वचनमात्रेणैव तत्पक्षमवलम्ब्य त्वया अहं परित्यक्ता!।

(५८) त्वया यस्य मम जय उदीर्य्यते उच्चार्य्यते, तेन मया जितं नाम, नामेति हर्षसूचकं निश्चयार्थकं वा अव्ययम्। कथं मया जितम्? इत्याह, जयशब्दः त्वया उदीरितः जय इति शब्दः सहस्राक्षात् इन्द्रात् पुरुषान्तरम् अन्यपुरुषं, सामित्यर्थः, आगतः प्राप्तः। त्वदुच्चारितजयशब्दश्रवणे सुरपतिरेव एकमात्राधिकारी आसीत्, इदानीन्तु अहमपि तदधिकारी जातः अतो मया जितमिति भावः।

(५९) स्थितिः लोकमर्य्यादग्रता; यथा—स्थितिरवस्थानमुपवेशनमिति यावत्।

विदू। सोत्थि भोदिए। (प)

देवदूतः। [नेपथ्ये]। चित्रलेखे ! त्वरय उर्वशीम्।—

मुनिना भरतेन यः प्रयोगो भवतीष्वष्टरसाश्रयो निबद्धः।
ललिताभिनयं तमद्य भर्त्ता मरुतां द्रष्टुमनाः सलोकपालः॥

(६०)

सर्वे। [आकर्णयन्ति]।

उर्वशी। [विषादं रूपयति]।

चित्र। सुदं तुए देवदूअस्स वअणं? ता अणुजाणाहि दाव महाराअं। (फ)

उर्व। [निश्वस्य]। णत्थि मे वाआविहवो। (ब)

चित्र। महाराअ! उव्वसी विसंवेदि, परवसो अअं जणो, महाराएण अब्भणुण्णादा इच्छामि देवदेवस्स अणवरद्धं अत्ताणअं कादुं। (भ)(६१)

राजा। [कथंकथमपि वचनं संस्थाप्य]। नाहं भवत्योरीश्वर-नियोगहन्ता; किन्तु स्मर्त्तव्योऽयं जनः।

उर्वशी। [वियोगदुःखं रूपयित्वा राजानं पश्यन्ती सह सख्या निष्क्रान्ता]।

राजा। [सनिश्वासम्]। वैयर्थ्यमिव चक्षुषः सम्प्रति।

विदू। [पदं दर्शयितुकामः]। णं भुञ्ज—" [इत्यर्द्धोक्तेनात्मगतम्]।

(प) स्वस्ति भवत्यै।

(फ) श्रुतं त्वया देवदूतस्य वचनम्? तदनुज्ञापय तावत् महाराजम्।

(ब) नास्ति मे वाग्विभवः।

(भ) महाराज! उर्वशी विज्ञापयति, परवशोऽयं जनः, महाराजेन अभ्यनुज्ञाता इच्छामि देवदेवस्य अनपराद्धमात्मानं कर्त्तुम्।

---

(६०) प्रयोगः दृश्यकाव्यभेदः। भवतीषु निबद्धः निर्माय भवतीभ्योऽभिनयशिक्षार्थमर्पितवान् इत्यर्थः। औपच्छन्दसिकं छन्दः।

(६१) अनपराद्धमात्मानं कर्त्तुम् आज्ञालङ्घनापराधरहितं कर्त्तुमित्यर्थः।

अविद अविद ! (६२) भो ! उव्वसीदंसणविम्हिदेण मए तं भुज्जवत्तं पब्भट्ठं पि हत्तादो ण विसादं ! । (म)

राजा । किमसि वक्तुकामः ? ।

विदू । बअस्स ! इदम्हि बत्तुकामो, ण भवं अंगाइं मुंचदु ; दिढं खु तइ बद्धभावा उव्वसी, ण सा इदो गदुअ एदं अणुबंधं सिढिलीकरिस्सदि त्ति । (य) (६३)

राजा । ममापि एतदेव मनसि वर्त्तते ; तया खलु प्रस्थाने,—

अनीशया शरीरस्य हृदयं स्ववशं मयि ।

स्तनकम्पक्रियालक्ष्यैर्न्यस्तं निश्वसितैरिव ॥ (६४)

विदू । [स्वगतम्] । बेवदि मे हिअअं ; केत्तिअं बेलं तस्स भुज्जवत्तस्स अत्तभवदा बअस्सेण णामं गेण्हिदव्वं त्ति ? । (र)

राजा । वयस्य ! केनेदानीमुन्मनसमात्मानं विनोदयामि ?

[श्रुत्वा] । उपनय भूर्जपत्रम् ।

(म) ननु भूर्ज—"अविद अविद भोः ! उर्वशीदर्शनविस्मितेन मया तत् भूर्जपत्रं प्रभ्रष्टमपि हस्तात् न विज्ञातम् ! ।

(य) वयस्य ! इदमस्मि वक्तुकामः, न भवानङ्गानि मुञ्चतु ; दृढं खलु त्वयि बद्धभावा उर्वशी, न सा इतो गत्वा एतमनुबन्धं शिथिलीकरिष्यतीति ।

(र) वेपते मे हृदयं, कियतीं वेलां तस्य भूर्जपत्रस्य अत्तभवता वयस्येन नाम ग्रहीतव्यमिति ।

---

(६२) अविद अविदेति सम्भ्रमे ।

(६३) बद्धभावा आसक्तरतिः, सञ्जातपूर्वरागा इत्यर्थः । अनुबन्धम् आसक्तिम् । न शिथिलीकरिष्यति न श्लथयिष्यति, क्षीणानुरागा न भविष्यति इत्यर्थः ।

(६४) शरीरस्य आत्मनो देहस्य अनीशया प्रभोरादेशतः अन्यत्र क्वापि स्थातुमशक्तया इत्यर्थः । एवम्भूतया तया उर्वश्या स्तनयोः कम्पः उच्छ्वासः स्तनकम्प एव क्रिया तया लक्ष्यैः सूचितैः निश्वसितैः कारणैः स्ववशं स्वाधीनं हृदयं मयि न्यस्तमिव मम हस्ते अर्पितमिव । पराधीनत्वात् स्वदेहार्पणे असमर्थया हृदय मयि अर्पितमिव इत्यर्थः । अनुष्टुप् छन्दः ।

विदू। [सर्वतो दृष्ट्वा सविषादम्]। हा! कधं ण दीसदि! भो! दिव्वं खु तं भुज्जवत्तं गदं उव्वसीए मग्गेण। (ल) (६५)

राजा। [सास्यम्]। सर्वत्र प्रमादी वैधेयः। (६६)

विदू। णं विचीअतां। [उत्थाय]। इदो भवे एह्व वा भवे। [इति बहुविधं नृत्यति]। (व)

[ततः प्रविशति चौशीनरी, चेटी च, विभवतश्च परिवारः]।

चौशी। हंजे णिउणिए! सच्चं लदाघरं वीसंतो अज्ज-माणवअसहाओ दिट्ठो तुए महाराओ?। (श)

चेटी। अलिअं किं मए भट्टिणी विण्णविदपुव्वा?। (ष)

चौशी। तेण हि लदाविड़वंतरिदा सुणिस्सं दाव विस्सद्ध-मंतिदाइं, जं तुए कधिदं सच्चकं ण वेत्ति। (स)

चेटी। जं देईए रुच्चदि। (ह)

चौशी। [परिक्रम्य पुरस्तादवलोक्य च]। णिउणिए! किस्सेदं पत्तं णवचीरअं विअ इदो दक्खिणमारुदेण आणीअदि?। (क्ष)

(ल) हा! कथं न दृश्यते! भोः! दिव्यं खलु तज्जूर्जपत्रं गतम् उर्वश्या मार्गेण।

(व) भवतु! विचीयताम्। इतो भवेत् इह वा भवेत्।

(श) अयि निपुणिके! सत्यं लताग्रहं विश्रब्धं आर्यमाणवकसहायो दृष्टस्त्वया महाराजः?।

(ष) अलीकं किं मया भर्त्री विज्ञापितपूर्वा?।

(स) तेन हि लताविटपान्तरिता श्रोष्यामि तावत् विश्रब्धमन्त्रितानि, यत्त्वया कथितं सत्यकं न वेति।

(ह) यद्देव्यै रोचते।

(क्ष) निपुणिके! किमेतत् पत्रं नवचीरमिव इतो दक्षिणमारुतेन आनीयते?।

---

(६५) उर्वशीवत् भूर्जपत्रमपि गतम् इत्यर्थः।

(६६) वैधेयः मूर्खः। प्रमादी अनवहितः, "प्रमादोऽनवधानता" इत्यमरः।

चेटी । [विभाव्य]। भट्टिणि ! पलिवत्तणा-विभाविदक्खरं भुज्जवत्तं क्ख एदं । हंत ! कधं देईए ज्जेव णेउरपरिलग्गं ! [गृहीत्वा]। णं वाचीअदु एदं । (क) (६७)

भौमी । णं अवलोएहि दाव, जइ अविरुद्धं तदो सुणिस्सं । (ख)

चेटी । [तथा कृत्वा]। भट्टिणि ! तं ज्जेव एदं कोलीणअं विजिंभदि ; महाराअं उद्दिसिअ उव्वसीअक्खरअं कव्वबंधं त्ति तक्केमि, अज्जमाणवअ प्पमादादो (६८) अम्हाणं हत्थं आअदं त्ति । (ग)

भौमी । णं गहिदत्था होहि । (घ)

चेटी । [वाचयति]।

भौमी । हंजे ! एदेण ज्जेव उवहारेण तं अच्छराकामुअं पेक्खमह । (ङ)

चेटी । जं देई आणवेदि । (च)

(क) भट्टिनि ! परिवर्त्तनाविभावितात्तरं भूर्जपत्रं खलु एतत् । हन्त ! कथं देव्या एव नूपुरपरिलग्नम् ! ननु वाचयतु एतत ।

(ख) ननु अवलोकय तावत्, यदि अविरुद्धं तदा श्रोष्यामि ।

(ग) भट्टिनि ! तटेवेदं कौलीनं विजृम्भते ; महाराजमुद्दिश्य उर्वश्यप्सरसं काव्यबन्धमिति तर्कयामि, आर्य्यमाणवकप्रमादादस्माकं हस्तमागतमिति ।

(घ) ननु ! गृहीतार्था भव ।

(ङ) हञ्जे ! एतेनैवोपहारेण तमप्सरःकामुकं पश्यामः ।

(च) यत् देवी आज्ञापयति ।

---

(६७) परिवर्त्तना मातृतसञ्चालनेन यत् पार्श्वपरिवर्त्तनं तेन विभावितानि अक्षराणि यस्य तत् ।

(६८) कौलीनं लोकापवादः । काव्यबन्धं काव्यरचनम् । प्रमादोऽनवधानता ।

राजा। भगवन्! वसन्तसखे! मलयानिल!—

वासार्थं हर सम्भृतं सुरभितं पौष्पं रजो वीरुधां
किं कार्य्यं भवतो हृतेन दयितास्नेहस्वहस्तेन मे।
जानात्येव भवान् विनोदनपरैरेवंविधैर्धारितं
कामार्त्तं जनमङ्गसाभिभवितुं नालम्बिताश्वासनम्॥ (६९)

चेटी। देई! पेक्ख पेक्ख, एदस्स जेव भुज्जबत्तस्स अन्वेसणा वट्टदि। (छ)

पौरो। ता णं पेक्खम्ह दाव, तुसिं चिट्ठ। (ञ)

विदू। भो! किमु क्खु एदं? उम्मिल्लमाणणीलपंकजच्छविणा मउरपिच्छेण विप्पलद्धम्ह। (झ)

राजा। सर्वथा हतोऽस्मि मन्दभाग्यः।

पौरो। [सहसा उपसृत्य]। अज्जउत्त! अलं आवेएण; एदं तं भुज्जबत्तं। (ञ)

(छ) देवि! प्रेक्षस्व प्रेक्षस्व, एतस्यैव भूर्जपत्रस्य अन्वेषणा वर्त्तते।

(ञ) तत् ननु प्रेक्षावहै तावत्, तूष्णीं तिष्ठ।

(झ) भोः! किं नु खलु एतत्? उन्मीलन्नीलपङ्कजच्छविना मयूरपिच्छेन विप्रलब्धोऽस्मि।

(ञ) आर्य्यपुत्र! अलमावेगेन; एतत् तत् भूर्जपत्रम्।

---

(६९) भगवन् मलयानिल! वासार्थं सौरभार्थं सम्भृतं सञ्चितं सुरभितं सुगन्धं पौष्पं कुसुमसम्बन्धि रजः परागं हर, तत्र न केनापि बाधा जनयितव्या इत्यर्थः; परन्तु दयिताया: प्रियायाः स्नेहस्य प्रणयस्य स्वहस्तेन स्वहस्तलिखितप्रणयपत्रस्वरूपेण अनेन भूर्जपत्रेण हृतेन तव किं कार्य्यम्? अस्ति नः हृतेषु कुसुमपरागेषु ते सुगन्धलाभः, एतत्तु हृतं ते उपकाराय न प्रभविष्यति इत्यर्थः। एवंविधैः लिपिचित्रादिदर्शनरूपैः विनोदनपरैः धारितं कथमपि मरणात् रक्षितं तथा च आलम्बिताश्वासनं प्राप्ताश्वासं कामार्त्तं मदनव्यथापीड़ितं जनम् अङ्गसा बलेन अभिभवितुं भवान् न जानात्येव, न साधु मन्यते एव इत्याभासः। विरहिजनपीड़नं भवत्सदृशस्य शीतलोदाराशयस्य निरन्तरानभीष्टमिति भावः। आर्द्रलविक्रीड़ितं हृतम्।

राजा। [ससम्भ्रममात्मगतम्]। अये! देवी! [सवैलक्ष्यं प्रकाशम्]। स्वागतं देव्यै?।

श्रौश्री। दुरागदं दाणिं मे संवुत्तं। (ट)(७०)

राजा। [जनान्तिकम्]। वयस्य! कथमत्र प्रतिविधेयम्?।

विदू। [जनान्तिकम्]। लोत्तेण सुइदस्स कुंभिलअस्स णत्थि वाआ पलिविधाणं। (ठ) (७१)

राजा। [अपवार्य्य]। मूढ! नायं परिहासकालः। [प्रकाशम्]। नेदं पत्रं मया मृग्यते; तत् खलु मन्त्रपत्रं, यदन्वेषणाय ममायमारम्भः।

श्रौश्री। जुज्जइ अत्तणो सोहग्गं णिगूहिदुं। (ड)

विदू। भोदि! तुवरावेहि से भोअणं, जेण पित्तप्पसमणेण सुत्थो भोदि। (ढ)

श्रौश्री। णिउणिए! सोहणं क्खु आस्सासिदो पिअ-वअस्सो (७२) बम्हणेण; किं अस्सं, अस्सचिंताए आवेसिदो पिओ खिज्जदि। (ण)

(ट) दुरागतमिदानीं मे संवृत्तम्।

(ठ) लोप्त्रेण सूचितस्य कुम्भिलकस्य नास्ति वाचा प्रतिविधानम्।

(ड) युज्यते आत्मनः सौभाग्य निगूहितुम्।

(ढ) भवति! त्वरय अस्य भोजनं, येन पित्तप्रशमनेन सुस्थो भवति।

(ण) निपुणिके! शोभनं खलु आश्वासितः प्रियवयस्यो ब्राह्मणेन; किमन्यत्, अन्नचिन्तायामावेशितः प्रियः खिद्यते।

---

(७०) राजा स्वागतमिति प्रयोज्य कुशलं पृष्टवान्, देवी तु सुखेन आगतमिति तदर्थमवधार्य्य वक्रोक्तिचातुर्य्यम् ईर्ष्यामानञ्च सूचितवती। नायिका मध्याधीरा खण्डिता चेयम्।

(७१) लोप्त्रेण स्तेयधनेन। कुम्भिलकस्य चोरस्य।

(७२) विदूषकप्रियवयस्यो राजा।

विदू। णं पेक्ख सव्वो आस्सासिदो चित्तभोअणेण। (त)

राजा। मूर्ख! बलादपराधिनं मामापादयसि?।

चौथो। णत्थि प्पभवंतस्स अवराहो, अहं ज्जेव एत्थ अवरद्धा, जा पडिऊलदंसणा भविअ अग्गदो भवामि। णिउणिए! इदो एहि। (थ) [इति सकोपं प्रस्थातुमुद्यता]।

राजा।—

अपराधी नूनमहं प्रसीद रम्भोरु! विरम संरम्भात्।
सेव्यो जनस्य कुपितः कथं नु दासो निरपराधः?॥ (७३)

[इति पादयोः पतति]।

चौथो। किदव! लहुहिअआ क्खु अहं, अणुणअं ण गेण्हामि; किन्तु दक्खिणस्स दे किदपच्चात्तावस्स भाआमि। (द) (७४)

(त) ननु प्रेक्षस्व, सर्व आश्वासितः चित्रभोजनेन।

(थ) नास्ति प्रभवतोऽपराधः, अहमेवात्र अपराद्धा, या प्रतिकूलदर्शना भूत्वा अग्रतो भवामि। निपुणिके! इत एहि।

(द) कितव! लघुहृदया खलु अहम्, अनुनयं न ग्रहीष्यामि; किन्तु दक्षिणस्य ते कृतपश्चात्तापस्य बिभेमि।

---

(७३) अपराधी त्वयि कृतापराधः। विरम विरता भव, संरम्भात् कोपात्, क्रोधं त्यज इत्यर्थः। दासः निरपराधः, भवेदिति शेषः, कोपेन त्वयि प्रस्थितायां तव प्रसादनमन्तरेण दासोऽयं कथम् अपराधप्रमार्जनं कुर्यात्? इत्यर्थः। कुपितस्य प्रसादन कर्त्तव्यम्, अतो मा ग्राहि, अहं त्वां प्रसादयामीति भावः।

(७४) दक्षिणस्य वल्लिताधमनीरज्जानुवर्त्तिनः कृतपश्चात्तापस्य पादपतनेन मां प्रसादितवानिति भ्रातरहमायामुवंश्या किं वक्ष्यसि नितरामनुनयपरो भविष्यसीति भावः। किञ्च मयि अपराद्धेन भवता मच्चरणधारणं विधीयते, उर्वश्यामपराद्धेन भवता किं विधेयम्? पादपतनादभ्यधिकं हि नास्ति अनुनयोपायः इति सोत्प्रासव्रीडोक्तिः अत्र अनुसन्धेया। विशेषतश्च अहं मानवी स्वाधीनभर्तृका च उर्वशी तु

चेटी। इदो इदो देई। (ध) [इति राजानमपहाय सपरिजना देवी निष्क्रान्ता]।

विदू। पाउस-णई विअ अप्पसण्णा जेव तत्थभोदी गदा; ता उट्ठेहि उट्ठेहि। (न)

राजा। [उत्थाय]। वयस्य! नेदमुपपन्नम्। पश्य,—

प्रियवचनकृतोऽपि योषितां दयितजनानुनयो रसादृते।
प्रविशति हृदयं न तद्विदां मणिरिव कृत्रिमरागयोजितः॥ (७५)

विदू। अणुजलं जेव भवदो एदं वअणं; ण हि अक्खि-दुक्खिदो (७६) संमुहे दीवसिहं सहदि। (प)

राजा। मैवम्, उर्वशीगतमनसोऽपि मम देव्यां स एव बहुमानः; किन्तु प्रणिपातलङ्घनादहमपि तस्यां धैर्यमव-लम्बिष्ये। (७७)

विदू। भो! चिट्ठदु दाव देईकधा; बुभुक्खिदस्स मे

(ध) इत इतो देवी।

(न) प्रावृड्-नदीव अप्रसन्नैव तत्रभवती गता; तदुत्तिष्ठ उत्तिष्ठ।

(प) अनुकूलमेव भवत एतद्वचनम्; न हि अक्षिदुःखितः सम्मुखे दीपशिखां सहते।

स्वर्गीया स्वर्वेश्या च। अथ यदि मादृशीनाम् अनिपुणानां पादपतनं मानभञ्जनोपायः, तदा सुनिपुणानां वेश्यानां मानभञ्जने का गतिः स्यात्? इति अलङ्काररहस्यमपि अव रसविशेषभावनाचतुरैः अवगन्तव्यम्।

(७५) प्रियवचनकृतः "अपराधी नूनमहं प्रसीद रम्भोरु। विरम" इत्यादिभिः चाटूक्तिभिः सम्पादितः। रसादृते अनुरागं विना हृदयं न प्रविशति, हृदयग्राही न भवति। तद्विदां मणीनां गुणदोषविचारक्षमाणाम्। कृत्रिमरागयोजितः कल्पितवर्णचित्रितः। आर्या वृत्तम्।

(७६) अक्षिदुःखितः चक्षुरोगग्रस्तः।

(७७) अहमपि तस्यां धैर्यमवलम्बिष्ये अहमपि उपेक्षामवलम्बिष्ये।

जीविअं अवलंबदु भवं; समओ क्खु ह्राणभोअणं सेविदुं। (फ)

राजा। [ऊर्ध्वमवलोक्य]। कथमर्कं गतं दिवसस्य! अतः खलु।—

उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी
निर्भिद्योपरि कर्णिकारकुसुमान्याशेरते षट्पदाः।
तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते
क्रीड़ावेश्मनिवेशिपञ्जरशुकः क्लान्तो जलं याचते॥ (७८)

[इति निष्क्रान्तौ]।

इति द्वितीयोऽङ्कः।

तृतीयोऽङ्कः।

[ततः प्रविशतो भरतशिष्यौ]।

प्रथमः। सखे पैलव! अग्निशरणाद्गच्छता महेन्द्रमन्दिर-मुपाध्यायेन त्वमासनं ग्राहितः, अहमग्निशरणरक्षार्थं स्थापितः; ततः पृच्छामि गुरोः प्रयोगेण देवपरिषत् आराधिता न वेति।

द्वितीयः। गालव! ण आणे कधं आराहिदा भोदि; तस्सिं

(फ) भोक्ष्यते तावत् देवीकथा; बुभुक्षितस्य मे जीवितमवलम्बतां भवान्; समयः खलु स्नानभोजने सेवितुम्।

(७८) उष्णालुः ग्रीष्मतप्तः। षट्पदाः भ्रमराः। कर्णिकारकुसुमानि निर्भिद्य उपरि आशेरते। कारण्डवः दीर्घचरणकृष्णवर्णहंसविशेषः "खड़ाहाँस" इति भाषा। तप्तं वारि विहाय तीरनलिनीं सेवते। आर्द्रलविक्रीडितं वृत्तम्।

उण सरस्सईकिदकव्वबंधे लच्छीसअंबरे (१) उव्वसी तेसु तेसु रसंतरेसु उम्मादइदा आसी। (क)

प्र। दोषविकाश इव वाक्यशेषः।

द्वि। आं, ताए वअणं खलिदं आसी। (ख)

प्र। किमिव ?।

द्वि। लच्छीभूमिआए वत्तमाणा (२) उव्वसी वारुणी-भूमिआए वत्तमाणाए मेणआए पुच्छिदा, "समागदा तिल्लोअ-पुरिसा सकेसवा लोअवाला; कस्सिं दे हिअआहिणिवेसो ?" त्ति। (ग)

प्र। ततस्ततः ?।

द्वि। ताए पुरिसोत्तमे त्ति भणिदव्वे पुरूरवसि त्ति णिग्गदा वाणी। (घ)

प्र। भवितव्यतानुविधायीनि (३) बुद्धीन्द्रियाणि; न तामभिक्रुद्धो मुनिः ?।

द्वि। सत्ता उअज्झाएण; महिंदेण उण अणुग्गहिदा। (ङ)

(क) गालव! न जाने कथम् आराधिता भवति; तस्मिन् पुनः सरस्वतीकृत-काव्यबन्धे लक्ष्मीस्वयंवरे उर्वशी तेषु तेषु रसान्तरेषु उन्मादिता आसीत्।

(ख) आं, तस्या वचनं स्खलितमासीत्।

(ग) लक्ष्मीभूमिकायां वर्त्तमाना उर्वशी वारुणीभूमिकायां वर्त्तमानया मेनकया पृष्टा, "समागताः त्रिलोकपुरुषाः सकेशवा लोकपालाः; कस्मिन् ते हृदयाभिनिवेशः ?" इति।

(घ) तस्याः पुरुषोत्तमे इति भणितव्ये पुरूरवसि इति निर्गता वाणी।

(ङ) अस्मा उपाध्यायेन; महेन्द्रेण पुनरनुग्राहिता।

---

(१) लक्ष्मीस्वयंवरे तदाख्यदृश्यकाव्यप्रयोगे।

(२) लक्ष्मीभूमिकायां वर्त्तमाना अभिनयार्थं लक्ष्मीवेशधारिणी; "भूमिका रचनायां स्यान्मूर्त्त्यन्तरपरिग्रहे" इति विश्वः।

(३) भवितव्यतानुविधायीनि भवितव्यता निश्चितफलानामवश्यम्भावः तस्या

प्र। कथमिव ?

द्वि। "जेण तुए मम उवदेसो लंघिदो, तेण ण दे दिव्वं णाणं हुविस्सदि" त्ति उअज्झाअस्स सआसादो साओ। पुरंदरेण उण लज्जाओणदमुहिं उव्वसिं पेक्खिअ एव्वं भणिदं, "जस्सिं वल्लहावासि तुमं तस्स मे रणसहाअस्स राएसिणो पिअं करणिज्जं, ता तुमं पुरूरवसं जधाकामं उवचिट्ठ, जाव सो पडिट्ठिदसंदाणो भोदि" त्ति। (च)

प्र। सदृशं पुरुषान्तरवेदिनो (४) महेन्द्रस्य।

द्वि। [सूर्यमवलोक्य]। कधाप्पसंगेण अवरद्धा (५) अहि-सेअवेला, ता उअज्झाअस्स पासपलिवत्तिणो होम्ह। (छ)

[इति निष्क्रान्तौ]।

विष्कम्भकः। (६)

(च) "येन त्वया मम उपदेशो लङ्घितस्तेन न ते दिव्यं ज्ञानं भविष्यति" इति उपाध्यायस्य सकाशात् शापः। पुरन्दरेण पुनर्लज्जावनतमुखीमुर्वशीं प्रेक्ष्य एवं भणितं, "यस्मिन् वल्लभावासि त्वं तस्य मे रणसहायस्य राजर्षेः प्रियं करणीयम्; तस्मात् त्वं पुरूरवसं यथाकाममुपतिष्ठस्व, यावत् स प्रतिष्ठितसन्तानो भवति" इति।

(छ) कथाप्रसङ्गेन अपराह्णा अभिषेकवेला, तदुपाध्यायस्य पार्श्वपरिवर्तिनौ भवावः।

अनुविधायीनि अनुसारीणि। उर्वश्याः पुरूरवसा समागमः नियतः, अत एव गौरवस्खलनं तदनुसारि एव इति भावः।

(४) पुरुषान्तरवेदिनः स्वयं पुमान् सन् मदनव्यथाज्ञातरस्य पुरुषान्तरस्य दुःखं जानातीति भावः।

(५) अपराह्णा अतिक्रान्ता।

(६) विष्कम्भकलक्षणं यथा दर्पणे,—

"वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।

सङ्क्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥" इति।

[ततः प्रविशति कञ्चुकी]। (७)

कञ्चुकी।—

सर्वः कल्ये वयसि यतते लब्धुमर्थान् कुटुम्बी
पश्चात् पुत्त्रैरुपहितभरः कल्पते विश्रमाय।
अस्माकन्तु प्रतिदिनमियं सादयन्ती प्रतिष्ठां
सेवाकाकुः परिणतिरभूत् स्त्रीषु कष्टोऽधिकारः॥ (८)

आदिष्टोऽस्मि सनियमया काशिराजपुत्त्रया यथा—"व्रत-सम्पादनाय मया मानमुत्सृज्य निपुणिकामुखेन पूर्वं याचितो महाराजः; तदेवं मद्वचनादिज्ञापयेति—यावदहमवसित-मन्त्र्याकार्य्यं महाराजं पश्यामि।" [परिक्रम्य अवलोक्य च]। रमणीयः किल दिवसावसानवृत्तान्तो (९) राजवेश्मनः।—

उत्कीर्णा इव वासयष्टिषु निशानिद्रालसा वर्हिणो
धूपैर्जालविनिःसृतैर्वडभयः सन्दिग्धपारावताः।
आचारप्रयतः सपुष्पबलिषु स्थानेषु चार्चिष्मतीः
सन्ध्यामङ्गलदीपिका विभजते शुद्धान्तवृद्धो जनः॥ (१०)

---

(७) कञ्चुकिलक्षणं यथा—

"अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः।
सर्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते॥" इति दर्पणे।

(८) कल्ये वयसि कार्य्योपयोगिनि वयसि यौवने। कुटुम्बी स्त्रीपुत्त्रादि-परिवारपोषणभारग्रस्तः। पुत्त्रैरुपहितभरः पुत्त्रेषु न्यस्तकुटुम्बपालनभार इत्यर्थः। विश्रमाय कल्पते विश्रामसुखमनुभवति इत्यर्थः। अस्माकन्तु प्रतिष्ठां गौरवं सादयन्ती नाशयन्ती इव परिणतिः वयःपरिणामः वार्द्धक्यम् इत्यर्थः, सेवाकाकुरभूत् सेवाकातरा अभूत। स्त्रीषु अधिकारः स्त्रीणां रक्षणभारः कष्टः कष्टकरः। मन्दाक्रान्ता वृत्तम्।

(९) दिवसावसानवृत्तान्तः सायंकालदृष्टव्यव्यापारः।

(१०) उत्कीर्णा इव लिखिता इव, आवासदण्डेषु निश्चलत्वात् चित्रिता इव इत्यर्थः। जालविनिःसृतैः गवाक्षजालैर्निर्गच्छद्भिः धूपैः तदुत्थितधूमैः वडभयः प्रासादाग्रगृहाणि सन्दिग्धपारावताः पारावतसञ्चारसन्देहं जनयन्तीत्येव आचारप्रयतः

[अवलोक्य]। अये ! इत एव प्रस्थितो देवः। य एषः,—

परिजनवनिताकरार्पिताभिः
परिवृत एष विभाति दीपिकाभिः।
गिरिरिव गतिमानपक्षसादा-
दनुतटपुष्पितकर्णिकारयष्टिः ॥ (११)

यावदेनमवलोकनमार्गं प्रतिपालयामि।

[ततः प्रविशति यथानिर्दिष्टः सपरिवारो राजा विदूषकश्च]।

राजा। [आत्मगतम्]।—

कार्य्यान्तरितोत्कण्ठं दिनं मया नीतमनतिकृच्छ्रेण।
अविनोददीर्घयामा कथं नु रात्रिर्गमयितव्या ? ॥ (१२)

कञ्चुकी। [उपगम्य]। जयति जयति देवः। देव ! देवी विज्ञापयति—"मणिहर्म्यपृष्ठे सुदर्शनश्चन्द्रः, तत्र सन्निहितेन देवेन प्रतिपालनीयः यावत् चन्द्ररोहिणीयोगः।"

गृहीतनियमः गुह्यान्तर्वृद्धः अन्तःपुरवर्त्तिनो जनः सपुष्पबलिषु स्थानेषु सख्या मङ्गलदीपिका विभजते स्वेषु स्थानेषु विभज्य स्थापयति इत्यर्थः। शार्दूलविक्रीडितं वृत्तम्।

(११) परिजनवनितानां दीपधारिणीनां परिचारिकाणां करेषु अर्पिताभिः न्यस्ताभिः, स्थिताभिरित्यर्थः, दीपिकाभिः आलीकवर्त्तिकाभिः परिवृतः एष देवः अनुतट मानुदेशे प्रान्तदेशे इत्यर्थो वा, पुष्पिता सञ्जातपुष्पा कर्णिकारयष्टिः कर्णिकारदण्डः, आरग्वधवृक्ष इत्यर्थः, यस्य तादृशः, अपक्षपातात् पक्षच्छेदनाभावात्, सपक्ष इत्यर्थः, अत एव गतिमान् गमनशीलः गिरिरिव विभाति शोभते। पुष्पितायां वृत्तम्।

(१२) कार्य्यान्तरितोत्कण्ठं कार्य्यैः राज्यशासनव्यवहारदर्शनादिभिः अन्तरिता आच्छादिता उत्कण्ठा उर्वशीसमागमचिन्ता यस्मिन् तत्। अनतिकृच्छ्रेण अनतिकष्टेन नीतं यापितम्। अविनोददीर्घयामा अविनोदाः विनोदनोपायरहिताः अत एव दीर्घाः यामाः प्रहराः यस्याः सा। आर्य्या वृत्तम्।

राजा । विज्ञाप्यतां देवी, यस्तव छन्द इति । (१३)

कञ्चुकी । तथा । [इति निष्क्रान्तः]।

राजा । वयस्य ! किमु परमार्थतः (१४) एव देव्या व्रतनिमित्तोऽयमारम्भः स्यात् ? ।

विदू । तक्केमि, संजादपच्छादावा अत्तभोदी बदब्बदेसेण तत्तभवदो प्पणिपादलंघणं प्पमुज्जिदुकाम त्ति । (ञ)

*राजा । उपपन्नं भवान् आह ।—

अवधूतप्रणिपाताः पश्चात् सन्तप्यमानमनसो हि ।
विविधैरनुतप्यन्ते दयितानुनयैर्मनस्विन्यः ॥ (१५)

तत् आदेशय (१६) मणिहर्म्यपृष्ठस्य मार्गम् ।

विदू । इदो इदो एदु भवं, इमिणा गंगातरंगसिसिरेण फडिअमणिसिलासोवाणेण (१७) आरोहदु भवं सव्वधा रमणिज्जं मणिहम्मदलं । (झ)

राजा । [आरोहति]।

(ञ) तर्कयामि, सञ्जातपश्चात्तापा भवभवती व्रतव्यपदेशेन तवभवतः प्रणिपातलङ्घनं प्रमार्ष्टुकामेति ।

(झ) इत इत एतु भवान्, अमुना गङ्गातरङ्गशिशिरेण स्फटिकमणिशिलासोपानेन आरोहतु भवान् सर्वथा रमणीयं मणिहर्म्यतलम् ।

---

(१३) यस्तव छन्दः यस्तव अभिरुचिः ।

(१४) परमार्थतः याथार्थ्यतः ।

(१५) अवधूतप्रणिपाताः अवधीरितप्रणामाः । मनस्विन्यः खलु इतरस्त्रीवत् न सामान्यप्रलोभनपराः, नापि सातिशयदक्षाः । तास्तु विशिष्टापराधिनं प्रणिपतन्तमपि प्रियतममवमन्यन्ते, पश्चात् दयितकृतं तं तम् अनुनयं संस्मृत्य अपि अनुतप्यन्ते । आर्य्या इत्तम् ।

(१६) आदेशय इत्यत्र आदिश इति सम्यक् ।

(१७) गङ्गातरङ्गेण स्फटिकसोपानस्य एकत्वे उन्नतोन्नतत्वे च साम्येऽपि विरुद्ध-

सर्वे। [सोपानारोहणं नाटयन्ति]।

विदू। [निरूप्य]। पच्चासन्नेण चंदेण होदव्वं, जधा तिमिरेण रेचीअमाणं (१८) पुव्वदिसामुहं आलोहिदप्पहं दीसदि। (अ)

राजा। सम्यग् भवान् मन्यते।—

उदयगूढशशाङ्कमरीचिभि-
स्तमसि दूरतरं प्रतिसारिते।
अलकसंयमनादिव लोचने
हरति मे हरिवाहनदिङ्मुखम् ॥ (१९)

विदू। ही ही! भो भो! एसो खंडमोदअसरिसो उदिदो राआ ओषधीणं। (ट) (२०)

राजा। [सस्मितम्]। सर्वत्र औदरिकस्य अभ्यवहार्यमेव विषयः। [प्राञ्जलिः प्रणम्य]। ऋक्षराज!—

रुचिमावहते सतां क्रियायै
सुधया तर्पयते पितॄन् सुरांश्च।

(अ) प्रत्यासन्नेन चन्द्रेण भवितव्यं, यथा तिमिरेण रिच्यमानं पूर्वदिङ्मुखमालोहितप्रभं दृश्यते।

(ट) ही ही! भोः भोः! एष खण्डमोदकसदृश उदितो राजा ओषधीनाम्।

तापतप्तस्य राज्ञः शिशिरोपसेवनं सम्यक् सुखकरम्, अतो हि विदूषकस्य अत्र विशेषेण शिशिरपदोल्लेखः।

(१८) रिच्यमानं परिमुच्यमानम्।

(१९) उदयेन उदयपर्वतेन गूढैरन्तरितैः शशाङ्कस्य चन्द्रस्य मरीचिभिः किरणैः तमसि अन्धकारे दूरतरं बहुदूरं प्रतिसारिते निराकृते सति। हरिवाहनस्य ऐरावतस्य या दिक् प्राची इत्यर्थः। तस्या मुखम् अलकसंयमनादिव मे लोचने हरति। संयतेषु अलकेषु कस्या अपि वराङ्गनायाः स्पष्टलक्ष्यमाणं मुखं यथा नयने हरति तद्वत् इत्यर्थः। द्रुतविलम्बितं वृत्तम्।

(२०) नवोदितचन्द्रस्यालोहितप्रभत्वात् खण्डमोदकेन सादृश्यं सुसङ्गतम्।

तमसां निशि मूर्च्छतां निहन्त्रे
हरचूड़ानिहितात्मने नमस्ते ॥ (२१)

विदू०। भो! बम्हणसंकामिदक्खरेण पिदामहेण अब्भणुण्णादोऽसि, आसणगदो होहि, (२२) तेण अहंपि सुहासीणो होमि। (ठ)

राजा। [विदूषकवचनं परिगृह्य उपविष्टः परिजनान् विलोक्य]। अनभिव्यक्ताश्चन्द्रिकायां दीपिकाः पुनरुक्ताः तद्विश्राम्यन्तु भवत्यः। (२३)

परिजनाः। जं देवो आणवेदि। (ड)

[इति निष्क्रान्ताः]।

राजा। [चन्द्रमालोक्य विदूषकं प्रति]। वयस्य! परं मुहूर्त्तादागमनं देव्याः, तद्विविक्ते कथयामि त्वाम् अवस्थाम्।

(ठ) भोः! ब्राह्मणसङ्क्रामिताक्षरेण पितामहेन अभ्यनुज्ञातोऽसि, आसनगतो भव, तेन अहमपि सुखासीनो भवामि।

(ड) यद्देव आज्ञापयति।

---

(२१) रुचिमनुरागमावहते जनयते। सुधया अमृतवर्षेण पितॄन् सुरांश्च तर्पयते प्रीणयते। निशि रात्रौ मूर्च्छतां व्याप्नुवतां तमसां निहन्त्रे अपसारकाय। हरचूडानिहितात्मने शङ्करमौलिस्थिताय। अतस्तत्कार्य्यपरम्परादर्शनेन साधूनां प्रवृत्तिः सत्कार्य्येषु उन्मुखीभवति। औपच्छन्दसिकं वृत्तम्।

(२२) ब्राह्मणेत्यादि।—ब्राह्मणे सङ्क्रामितानि अक्षराणि येन तेन ब्राह्मणस्य मम मुखेन स्वाभिप्रायं प्रकाशयति इत्यर्थः। नाहं त्वामासितुमुपदिशामि, चन्द्रस्तु ब्राह्मणस्य क्लेशदर्शने असमर्थः सन् मन्मुखेन त्वामुपदिशति—त्वमासनगतो भव इति।

(२३) अनभिव्यक्ताः क्षीणप्रभाः सन्दिग्धस्थितय इत्यर्थः। पुनरुक्ताः चन्द्रालोकेन सर्वत्र प्रकाशिते प्रकाशार्थं पुनर्दीपिकाधारणं निष्कारणमेव। परिजनानामवस्थितिर्विश्रब्धालापे विघ्नमुत्पादयतीति परिजनापसारणार्थं राज्ञ एवमुक्तिः।

विदू। भो! ण दीसदि ज्जेव सा उव्वसी; किंतु ताए सारिसं अणुरायं पेक्खिअ सअं क्खु आसाबंधेण अत्ताणअं धारिदुं। (ढ) (२४)

राजा। एवमेतत्; बलवान् मनसोऽभितापः; पुनः,—

नद्या इव प्रवाहो विषमशिलासङ्कटस्खलितवेगः।
विघ्नितसमागमसुखो मनसिशयस्त्वनुगुणो भवति॥ (२५)

विदू। जधा परिहीअमाणेहिं अंगेहिं सोहसि, तधा अच्छरेहिं समागमं दे पेक्खामि। (ण) (२६)

राजा। [निमित्तं सूचयन्]।—

वचोभिराशाजननैर्भवानिव गुरुव्यथम्।
अयं मां स्यन्दितैर्बाहुराश्वासयति दक्षिणः॥ (२७)

विदू। ण असुधा बम्हणवअणं भोदि। (त)

राजा। [सप्रत्याशं तिष्ठति]।

(ढ) भोः! न दृश्यत एव सा उर्वशी; किन्तु तस्यास्तादृशमनुरागं प्रेक्ष्य स्वयं खलु आशाबन्धेनात्मानं धारयितुम्।

(ण) यथा परिहीयमाणैरङ्गैः शोभसे, तथा अप्सरोभिः समागमं ते प्रेक्षे।

(त) नान्यथा ब्राह्मणवचनं भवति।

---

(२४) यद्यपि न सा अधुनापि सम्यक् मत्चक्षुर्विषयगोचरा, तथापि तत्प्रदर्शित-मनुरागमनुस्मृत्य तदागमनं प्रति निःसन्देह एवाहम्।

(२५) विषमशिलेति।—विषमेषु बन्धुरेषु शिलासङ्कटेषु स्खलितः प्रतिहतो वेगो यस्य। विघ्नितेत्यादि।—विघ्नितं प्रतिबन्धकेन व्याहतं समागमसुखं यस्य। मनसिशयः कामः। अनुगुणः अतिशयः। विना बाधया प्रवाहितो नदीवेगो यथा कठिनतरशिलासङ्कटेषु विघ्नितगतिः सन् आकुलीभूय अन्तरुच्छलति, तथा मन्मनसि-शयोऽपि विघ्नितसमागमसुखः सन्नाकुलीभूय अन्तः अत्यर्थं वर्धते। आर्यां वृत्तम्।

(२६) विरहश्यामाङ्गं त्वां दृष्ट्वा अनुरागपरतन्त्रा उर्वशी आत्मनि तव प्रेमातिशयज्ञानेन अतीव दृष्टा सती अवश्यमेव समागमिष्यतीति भावः।

(२७) गुरुव्यथं प्रबलाधिपीडितम्। भवान् यथा आशाजननैर्वाक्यैः

[ततः प्रविशति आकाशयानेन कृताभिसरणवेशा उर्वशी चित्रलेखा च]।

उर्व। [आत्मानं विलोक्य]। सहि! रुच्चदि मे अअं मोत्ताहरणभूसिदो णीलमणिपरिग्गहो अहिसारिआवेसो?। (थ)(२८)

चित्र। णत्थि वाआ विहवो पसंसिदुं; इदं तु चिंतेमि,—अवि णाम अहं ज्जेव पुरूरवा भवेयं त्ति। (द)(२९)

उर्व। सहि! असमत्था खु अहं, तुमं आणेहि तं सिग्घं, णेहि मं वा तस्स सुहअस्स वसदिं। (ध)

चित्र। णं पलिबिंबिअं विअ जामिणीजमुणाए कैलाससिहरं सस्सिरीअं दे पिअतमस्स भवनमुपगदम्ह। (न)(३०)

(थ) सखि! रोचते मे अयं मुक्ताभरणभूषितो नीलमणिपरिग्रहोऽभिसारिकावेशः?।

(द) नास्ति वाग्विभवः प्रशंसितुम्, इदन्तु चिन्तयामि,—अपि नाम अहमेव पुरूरवा भवेयमिति।

(ध) सखि! असमर्था खलु अहं, त्वमानय तं शीघ्रं, नय मां वा तस्य सुभगस्य वसतिम्।

(न) ननु प्रतिबिम्बितमिव यामिनी-यमुनायां कैलासशिखरं सश्रीकं ते प्रियतमस्य भवनमुपगते स्वः।

मामाश्वासयति, तथा दक्षिणबाहुरपि स्वस्पन्दनैर्मामाश्वासयति इत्यर्थः, दक्षिणबाहुस्पन्दनस्य वरस्त्रीलाभसूचकत्वादिति भावः।

(२८) कविरभिलाषानुरूपं मानसीं प्रतिमां भूषयति, तदत्र सम्यगुपपन्नम्। उर्वशी सुन्दरी, समधिकाभरणप्रसाधने तु स्वाभाविकसौन्दर्यहानिरेवानुमीयते, अतो हि केवलं मुक्तादाम्ना उर्वश्याः प्रसाधनम्। मुक्तानान्तु सम्यक् प्रकाशार्थं नीलमणेः सङ्गतिः। विना तामिस्रया यथा दीपिकालोकोऽनुमेयस्थितिरेव, तथा गौराङ्गे निहिता मुक्ता च समवर्णत्वेन न विभाव्यत एव।

(२९) दुष्टयुपवती इत्से प्राप्य कथमन्यस्मै उपहरामि? इति भावः।

(३०) यामिन्यां प्रतिबिम्बितं कैलासशिखरमिव यमुनायां प्रतिबिम्बितं ते

उर्व। तेण हि प्पभावेण जाणाहि, कहिं सो मम हिअअ-चोरो, किं वा अणुचिट्ठदि त्ति। (प)

चित्र। [आत्मगतम्]। भोदु, कौलिस्सं दाव एदाए सह। [प्रकाशम्]। हला! दिट्ठो मए उअभोअक्खमे अज्जआसे मणीरह-सहं पिअासमागमसुहं अणुभवंतो चिट्ठदि। (फ) (३१)

उर्व। अवेहि, हिअअं ण मे पत्तिआदि। हला चित्त-लेहे! हिअए का उण किंपि जप्पेसि? पिअसमागमस्स अमादो ज्जेव अणेण मे अवहरिदं हिअअं। (ब) (३२)

चित्र। एसो मणिहम्मप्पासादगदो वअस्समित्तसहाओ राएसी; ता उपसप्पम्ह। (भ)

(प) तेन हि प्रभावेण जानीहि, कुत्र स मम हृदयचोरः, किं वा अनुतिष्ठतीति।

(फ) भवतु, क्रीडिष्यामि तावदेतया सह। अयि! दृष्टो मया उपभोग-क्षमेऽवकाशे मनोरथलब्धं प्रियासमागमसुखमनुभवंस्तिष्ठति।

(ब) अपेहि, हृदयं न मे प्रत्येति। अयि चित्रलेखे। हृदये का पुनः किमपि जल्पसि? प्रियसमागमस्यायत एव अनेन मेऽपहृतं हृदयम्।

(भ) एष मणिहर्म्यप्रासादगतो वयस्यमात्रसहायो राजर्षिः; तस्मादुपसर्पावः।

प्रियतमभवनम्। भवनपक्षे—अधःस्था यमुना प्रतिबिम्बयितुं समर्था, यामिन्यपि कैलासशिखरपक्षे तथैव। सूर्यस्यापलापे अन्धकारमयी या, सा यामिनी, अन्धकारस्तु वर्णहीनः, आधारे सङ्क्रामितः सन् कृष्णवर्णत्वेनानुमीयते, सर्वोन्नतस्य कैलासस्य पृष्ठे पार्श्वे सम्मुखे वापि किमपि वस्तु नास्ति यतोऽधःस्थितेषु पदार्थनिचयेषु अन्धकारस्य सङ्क्रमणत्वात् कैलासपक्षे यामिनी अधःस्थैव।

(३१) मनोरथलब्धं प्रियासमागमसुखं, स्वेच्छयैव प्रियया विहरति, न तु प्रियामनोरञ्जनार्थम्।

(३२) तेनापहृतत्वात् हृदयन्तु मे तद्गतमेव, अतस्तत्कार्यमेव सर्वं प्रत्यक्षवत् अस्मायै प्रतिभाति, किं त्वं वृथा जल्पसि?।

सभे। [अवतरतः]।

राजा। वयस्य! रजन्यां विजृम्भते (२३) मदनबाधा।

उर्व। अभिसत्थेण इमिणा वअणेण आकंपिदं मे हिअअं; अंतरहिदा सुणुम्ह से आलावं, जाव णो संसअच्छेदो भोदि। (म)(२४)

चित्र। जं दे रोअदि। (य)

विदू। णं इमे अमिअ-गब्भा सेवीअंतु चंदवादा। (र)

राजा। वयस्य! एवमादिभिरनुपक्रम्योऽयमातङ्कः। (२५)—

कुसुमशयनं न प्रत्यग्रं न चन्द्रमरीचयो
न च मलयजं सर्वाङ्गीणं न वा मणियष्टयः।
मनसिजरुजं सा वा दिव्या ममालमपोहितुं
रहसि लघयेदारब्धा वा तदाश्रयणी कथा॥ (२६)

उर्व। हिअअ! जं दाणिं सि मं उज्झिअ इदो संकंतं तस्स फलं तुए उअलद्धं। (ल)(२७)

(म) अभिन्नार्थेनानेन वचनेनाकम्पितं मे हृदयम्; यन्तर्हिते श्रुतवीऽस्यालाप, यावदावयोः संशयच्छेदो भवति।

(य) यत् ते रोचते।

(र) ननु इमे अमृतगर्भाः सेव्यन्तां चन्द्रपादाः।

(ल) हृदय! यदिदानीमसि मामुज्झित्वा इतः सङ्क्रान्तं, तस्य फलं त्वया उपलब्धम्।

(२२) विजृम्भते प्रकाशते।

(२४) अभिन्नार्थेन स्फुटमप्रकटितार्थेन। संशयच्छेदः सन्देहभञ्जनम्।

(२५) अनुपक्रम्यो दूरपनेयः। आतङ्कः मदनज्वरः।

(२६) प्रत्यग्र नूतनं न स्थितमित्यर्थः। मलयज़ चन्दनम्। सर्वाङ्गीणं सर्वाङ्गेषु लेपितम। मनसिजरुजमित्यादि।—दिव्या सुरलोकनिवासिनी सा उर्वशी वा तथा रहसि निर्जने आरब्धा सदाश्रयणी तद्विषयिणी कथा वा मम मनसिजरुजं मदनव्यथाम् अपोहितुम् अलं समर्था। एतदन्यत् न किमपि समर्थमित्यर्थः। हरिणी वृत्तम्।

विदू। आं, भो! अहंपि जदा सिहरिणीं रसालं अ ण लहे, तदा तं ज्जेव चिंतयंतो आसादेमि सुहं। (व) (३८)

राजा। सम्पद्यते पुनर्भवतः। (३९)

विदू। तुमंपि तं अइरेण पाविहिसि। (श)

राजा। सखे! एवं मन्ये।

विव। सुण, असंतुट्ठे!। (ष)

विदू। कधं विअ?। (स)

राजा। इदं तया रथक्षोभादङ्गेनाङ्गं निपीड़ितम्।
एकं क्षति शरीरेऽस्मिन् शेषमङ्गं भुवो भरः॥ (४०)

(व) आं भोः। अहमपि यदा शिखरिणी रसालाच्च न लभे, तदा तदेव चिन्तयन्नास्वादयामि सुखम्।

(श) त्वमपि तामचिरेण प्राप्स्यसि।

(ष) शृणु असन्तुष्टे!।

(स) कथमिव?।

---

(३७) मम इच्छामनपेक्ष्यैव यत् पुरूरवसि समासक्तमासीत्तस्यानुरागस्य पुरस्कृतिरूपाणि वचनानि शृतानीति सर्वथा त्वं खलु कृती, अहन्तु वञ्चिताऽस्मि इति भाव.।

(३८) द्राक्षामेदं शिखरिणीति विकाण्डशेषः। यदा—

"द्राक्षाशत्पलमम्मित दधि पलान्यष्टौ च खण्डं पल-
स्यार्द्धं चेन्मरिचस्य तेन तलितं युक्तं त्वगेलाद्वयम्।
मध्वाज्यं च यतं तदर्द्धमिलितं सभीषितैर्योजिता
भाण्डे आर्द्रमवासिते शिखरिणी श्रीकण्ठभोग्या गुणैः॥"

इति राजनिघण्टुकसम्बन्धे।

(३९) रसालाच्छिखरिणीप्राप्तिः पुनर्भवतः सम्पद्यते। आम्रानुरूपफलप्राप्तिस्ते पुनर्भवत्येवेति तात्पर्यम्।

(४०) रथक्षोभात् तया उर्वश्या अङ्गेन निपीडितं प्राप्त-तदङ्गसङ्घर्षम् इत्यर्थः। इदम् अङ्गं शरीरैकदेशः; अस्मिन् शरीरे शरीरमध्ये एक केवलं क्षति क्षतकार्यं

उर्व। किं दाणिं अवरं विलंबिस्सं ? [सहसा उपगम्य]। हला चित्तलेहे ! अग्गदो वि मए ट्ठिदाए उदासीणो महाराओ !। (ङ)

चित्र। [सस्मितम]। अइ अदि तुवरिदे ! असंकिण्णतिरक्करिणी असि। (च)(४१)

[नेपथ्ये]। इदो इदो भट्टिणी। (क)

सर्वे। [कर्णं ददति]।

उर्वशी। [सह सख्या विषण्णा]।

विदू। अविद अविद भो ! उवत्थिदा देई ; ता मुद्दिदमुहो होहि। (ख)

राजा। भवानपि संवृताकारमास्ताम्।

उर्व। हला ! एत्थ किं करणिज्जं ?। (ग)

चित्र। अलं आवेएण, अंतरिदा (४२) दाणिं सि तुमं ; विहिद-णिअम-व्वावारा अ महिसी दीसदि ; ता एसा ण चिरं चिट्ठिस्सदि त्ति। (घ)

(ङ) किमिदानीमपरं विलम्बिष्ये ? अयि चित्रलेखे ! अयतोऽपि मम स्थिताया उदासीनो महाराजः !।

(च) अयि अतित्वरिते। असङ्किप्ततिरस्करिणी असि।

(क) इत इतो भर्त्री।

(ख) अविद अविद भोः। उपस्थिता देवी, तन्मुद्रितमुखो भव।

(ग) अयि ! अत्र किं करणीयम ?।

(घ) अलमावेगेन, अन्तरिता इदानीमसि त्वम्। विहितनियमव्यापारा च महिषी दृश्यते ; तदेषा न चिरं स्थास्यतीति।

सौभाग्यशालि इत्यर्थः। श्लेषमङ्गं भुवो भरः निरर्थकत्वात् केवलं पृथिव्या भारभूतम् इत्यर्थः। अनुष्टुप् छन्दम्।

(४१) असङ्किप्ततिरस्करिणी असङ्किप्ता अनल्पीकृता तिरस्करिणी यस्याः, अद्यापि तिरस्करिणीविद्यया आच्छादितशरीरासि इत्यर्थः ; अत एव अदृश्यायां त्वयि तस्य औदासीन्यम्।

[ततः प्रविशति धृतोपहारपरिजना देवी]।

देवी। [चन्द्रमालोक्य]। एसो रोहिणीजोएण अहिअं सोहदि भअवं मिअलंछणो। (ङ)

चेटी। णं संपज्जिस्सदि भट्टिणीसहिदस्स भट्टिणो विसेसरमणीअदा। (च)

[इति परिक्रामतः]।

विदू। भो! णं आणामि, सोत्थिवाअणिअंपि देदि; अधवा भवंतं अंतरेण चंदवदव्बवदेसेण मुक्करोसा अज्ज मे अक्खोणं सुहदंसणा देई। (छ) (४३)

राजा। [सस्मितम्]। उभयथापि भवतः; यत्तु पश्चादभिहितं, तन्मां प्रति याति; यदत्रभवतो।—

सितांशुका मङ्गलमात्रभूषणा
विचित्रदूर्वाङ्कुरलाञ्छितालका।
व्रतोपदेशोज्झितगर्ववृत्तिना
मम प्रसन्ना वपुषेव लक्ष्यते॥ (४४)

(ङ) एष रोहिणीयोगेनाधिकं शोभते भगवान् मृगलाञ्छनः।

(च) ननु सम्पत्स्यते भार्तुर्विशेषरमणीयता।

(छ) भोः! ननु जानामि, स्वस्तिवाचनिकमपि ददाति; अथवा भवन्तमन्तरेण चन्द्रव्रतव्यपदेशेन मुक्तरोषा अद्य मे चक्षोः शुभदर्शना देवी।

---

(४२) अन्तरिता तिरस्करिणीच्छन्ना।

(४३) ननु जानामि मन्ये इत्यर्थः। स्वस्तिवाचनिकमिति।—दैवपैत्रकर्मस्थले उपस्थिता ब्राह्मणाः स्वस्तिवाचका आशीर्वादका भवन्ति, कर्मकर्तापि तेभ्यो यत्किञ्चिदभिलषितं धनवस्त्राद्यादिकं ददाति च। अथवा, यदा देवी भवन्तमभ्यन्तरीकृत्य कृतचन्द्रव्रतमाचरति, तदा मुक्तरोषैव; यतोऽद्य शुभदर्शना च; अतो मत्स्वस्तिवाचनिके निःसन्देह एव। चन्द्रव्रतव्यपदेशेन चन्द्रमङ्गलाराधयिष्ये इति छलेन।

(४४) सितांशुका शुभ्रवसनपरिधारिणी मङ्गलमात्रभूषणा, सार्द्रत्वगीरोच-

देवी। [उपगम्य]। जेदु जेदु अज्जउत्तो। (ज)

परिजनः। जेदु जेदु देओ। (झ)

विदू। सोत्थि भोदीए। (ञ)

राजा। देवि! स्वागतम्?। [इति गृहीत्वा उपवेशयति]।

देवी। ट्ठाणे इअं हि देईसद्देण उच्चरीअदि; ण किंपि परिहीअदि सचीदो ओजस्सिदाए। (ट)(४५)

विदू। अत्थि अवरं मुहं मंतिदुं दे?। (ठ) (४६)

देवी। अज्जउत्तं पुरोकदुअ कोवि वदविसेसो मए संपादणीओ; ता मुहुत्तअं उअरोधो सहीअदु। (ड)

राजा। माणवक! अनुग्रहः खलु उपरोधः। (४७)

(ज) जयति जयति आर्यपुत्रः।

(झ) जयति जयति देवः।

(ञ) स्वस्ति भवत्यै।

(ट) स्थाने इयं हि देवीशब्देन उच्चार्यते; न किमपि परिहीयते अधीत ओजस्वितायाम्।

(ठ) अस्ति अपरं मुखं मन्त्रयितुं ते?।

(ड) आर्यपुत्रं पुरस्कृत्य कोऽपि व्रतविशेषो मया सम्पादनीयः; तन्मुहूर्तंक-मुपरोधः सह्यताम्।

णादिनावभूषणा। व्रतेति।—व्रतेषु यः उपदेशः शिक्षा तेन उज्झिता गर्ववृत्तियेन। व्रताचरणेषु विनीतवृत्तिना भवितव्यमिति चिरन्तनसंस्कारेण त्यक्तगर्ववृत्तित्वात् वपुः प्रसन्नमिति तात्पर्यम्। गर्ववृत्तिस्तु देव्याः न स्वाभाविकी, परन्तु अपरस्त्रीप्रवणीभूते पत्यौ सति पतिप्राणा स्त्रीमात्रीधर्मशास्त्रविदेवोपलक्ष्यते। भक्त्या तु दैवं कर्म कर्तव्यमतो हि व्रतनिमित्तमिदानीं देव्या तदपि उज्झितम्। भक्तिप्रवणं चेतस्तु अयावेशविवर्जितं स्यादेव। वंशस्थविलं वृत्तम्।

(४५) तेजोवैद्यंगाभीर्यौदार्यसारल्यानां समष्टिः ओजः, तत्ता ओजस्विता।

(४६) त्वदर्थमेव देव्या दुःखदो दशा संवृत्ता, अत एतन्मन्त्रयितुं किमेतदन्यन्मुखमस्ति?।

(४७) माणवक! पश्य, देवी ब्रवीति अयम् उपरोधः।

विदू। ईदिसो णं सोत्थिवाअणं करंतो मम बहुसो उअरोधो भोदु। (ढ) (४८)

राजा। किंनामधेयमेतद्देव्या व्रतम्?।

देवी। [निपुणिकामवलोकयति]।

चेटी। भट्टा-प्पिअप्पसादणं णाम। (ण) (४९)

राजा [देवीं विलोक्य]।—

अनेन कल्याणि! मृणालकोमलं
व्रतेन गात्रं ग्लपयस्यकारणम्।
प्रसादमाकाङ्क्षति यस्तवोत्सुकः
स किं त्वया दासजनः प्रसाद्यते?॥ (५०)

उर्व। [सवैलक्ष्यस्मितम्]। महंतो क्खु इमस्सिं एदस्स बहुमाणो। (त)

चित्र। अदु मुद्धे! अस्ससंकंतप्पेमाणो णाअरा अहिअं दक्खिणा (५१) होंति। (थ)

(ढ) दुर्दृशो ननु स्वस्तिवाचनं कुर्वतो मम बहुश उपरोधो भवतु।

(ण) भर्तृप्रियप्रसादनं नाम।

(त) महान् खलु अस्यामेतस्य बहुमानः।

(थ) अयि मुग्धे। अन्यसङ्क्रान्तप्रेमाणो नागरा अधिकं दक्षिणा भवन्ति।

---

(४८) स्वस्तिवाचनिकं दत्त्वा देव्या मम सम्बन्धेऽपि दुर्दृशो बहुश उपरोधोऽनुष्ठीयताम्।

(४९) भर्तुः प्रियमभिलषितं तस्य प्रसादनम् आराधनम्।

(५०) कल्याणि! अनेन व्रतेन मृणालकोमलं गात्रं, ते इति शेषः, अकारणं ग्लपयसि क्लेशयसि, त्वमिति शेषः। यः उत्सुकः उत्कण्ठितः आग्रहान्वितः सन् इत्यर्थः, तव प्रसादं प्रसन्नताम् आकाङ्क्षति, स दासजनः प्रसादाकाङ्क्षी जनः किं त्वया प्रसाद्यते? आराध्यते? यस्तव प्रसादाकाङ्क्षी तस्य प्रसादन निष्प्रयोजनमिति भावः। वंशस्थविलं वृत्तम्।

(५१) दक्षिणा दक्षिणनायकवदतिप्रियभाषिण इत्यर्थः।

देवी। इमस्स वदस्स अअं पहाओ जं एत्तिअं बाधिदो (५२) अज्जउत्तो। (द)

विदू। विरमदु भवं; ण जुत्तं बंधुभासिदं पच्चाक्खादुं। (ध)(५३)

देवी। दारिआओ! (५४) आणेध उअहारअं, जाव हम्मगदे चंदवादे अच्चेमि। (न)

परिजनः। जं देई आणवेदि। एसो उअहारो। (प)

देवी। उवणेध। [नाट्येन कुसुमादिभिश्चन्द्रपादान् अभ्यर्च्य]। हंजे! इमेहिं उअहारेहिं मोदएहिं अज्जमाणवअं कंचुइं अ अच्चेध। (फ)

परिजनः। जं देई आणवेदि। अज्ज माणवअ! इदं उववादिदं सोत्थिवाअणिअं। (ब)

विदू। [मोदकशरावं गृहीत्वा]। सोत्थि भोदीए। बहुफलो एसो बटो भोदु। (भ)

(द) अस्य व्रतस्य अयं प्रभावो यदेतावद्बाधित आर्यपुत्रः।

(ध) विरमतु भवान्; न युक्तं बन्धुभाषितं प्रत्याख्यातुम्।

(न) दारिकाः! आनयत उपहारक, यावत् हर्म्यगतांश्चन्द्रपादानर्चयामि।

(प) यद्देवी आज्ञापयति। एष उपहारः।

(फ) उपनयत। अयि। एभिरुपहारैर्मोदकैरार्यमाणवकं कञ्चुकिनं च अर्चयत।

(ब) यद्देवी आज्ञापयति। आर्य माणवक। इदमुपपादितं स्वस्तिवाचनिकम्।

(भ) स्वस्ति भवत्यै। बहुफलमेतत् व्रतं भवतु।

---

(५२) बाधितो वशीकृतः; मया तु एतद्व्रताचरणनिमित्तमिदानीम् आर्यपुत्रस्य उर्वशीचिन्तायामपि विघ्नमाचरितम्।

(५३) मदुक्तां स्वस्तिवाचनिककथामुपेत्य भवतोऽन्यविधालापोऽनुचित एव। राजानं प्रति विदूषकस्यैवमुक्तिः।

(५४) दारिकाः कन्याः।

चेटी। अज्ज कंचुइ! इदं तुह। (म)

कञ्चुकी। [सहर्षम्]। स्वस्ति देव्यै।

देवी। अज्जउत्त! इदो दाव। (य)

राजा। अयमस्मि।

देवी। [राज्ञः पूजामभिनीय, प्राञ्जलिः प्रणम्य च]। एसा देवदा-मिहुणं रोहिणी-मिअलंछणं सक्खीकदुअ अज्जउत्तं पसादेमि—अज्ज प्पहुदि अज्जउत्तो जं इत्थिअं कामेदि, जा अ अज्जउत्त-समागमप्पणइणी, ताए सह अप्पडिबंधेण वत्तिदव्वं। (र)(५५)

उर्वं। अम्महे! ण जाणामि किंपरं से वअणं! मम उण बिस्सासविसदं हिअअं संवुत्तं। (ल)(५६)

चित्र। सहि! महाणुभावाए पदिव्वदाए अब्भणुण्णादो अणंतराओ दे पिअसमागमो भविस्सदि त्ति। (व)

(म) आर्ये कञ्चुकिन्। इदं तव।

(य) आर्यपुत्र। इतस्तावत्।

(र) एषा देवतामिथुनं रोहिणीमृगलाञ्छनं साक्षीकृत्य आर्यपुत्रं प्रसादयामि—अद्य प्रभृति आर्यपुत्रो यां स्त्रियं कामयते, या च आर्यपुत्रसमागम-प्रार्थिनी, तया सह अप्रतिबन्धेन वर्त्तितव्यम्।

(ल) आश्चर्यम्। न जाने किंपरमस्या वचनम्! मम पुनर्विश्वासविप्लवं हृदयं संवृत्तम्।

(व) सखि! महानुभावया पतिव्रतया अभ्यनुज्ञातोऽनन्तरायस्ते प्रियसमागमो भविष्यतीति।

---

(५५) पतिदेवता हि स्त्रियः आत्मसुखनिरभिलाषिण्यः सत्यः पत्युः प्रिय-सम्पादनार्थं निजजीवनमपि परित्यक्तुं न पराङ्मुखीभवन्ति, दृढ़ो हि तासां धर्मः। कुलीना पतिव्रता च देवी अपि तदेव पातिव्रत्यधर्ममनुसृत्य आत्मसुखाभिलाषं विहाय भर्तृसन्तोषार्थम् "आर्यपुत्रो यां कामयते" इत्याद्युक्तवती।

(५६) किम्परं किमधीनं, किमुद्दिश्य एषा एवं ब्रवीतीति तत्र जाने, मम तु एतद्वाक्यश्रवणेनैव हृदयं विप्लुतं जातम्।

विदू। [अपवार्य]। छिण्णहत्थस्स पुरदो बज्झे पलाइदुं भणदि, गच्छ, धम्मो भविस्सदि त्ति। [प्रकाशम्]। भोदि! किं उदासीणो तत्थभवं ?। (ग) (५७)

देवी। मूढ! अहं खु अत्तणो सुहावसाणेण अज्जउत्तस्स सुहं इच्छामि; एत्तिएण चिंतेहि दाव पिओ ण वेत्ति। (घ)

राजा।—

दातुमसहने! प्रभवस्यन्यस्यै कर्त्तुमेव वा दासम्।
नाहं पुनस्तथा त्वयि यथा हि मा शङ्कसे भीरु!॥ (५८)

देवी। भोदु; जधाणिद्दिट्ठं संपादिदं पिअप्पसादणव्वदं; ता एध परिअणा! गच्छम्ह। (स)

राजा। न खलु प्रसादितमपि प्रतिविहाय (५९) गम्यते।

(ग) छिन्नहस्तस्य पुरतो बध्ये पलायितुं भणति, गच्छ, धर्मो भविष्यतीति। भवति! किमुदासीनस्तत्रभवान्?।

(घ) मूढ! अहं खलु आत्मनः सुखावसानेन आर्यपुत्रस्य सुखमिच्छामि; एतावता चिन्तय तावत् प्रियो न वेति।

(स) भवतु; यथानिर्दिष्टं सम्पादितं प्रियप्रसादनव्रतम्, तदेत परिजनाः! गच्छामः।

---

(५७) तत्रभवान् पूज्यो राजा किमद्यावधि त्वया उदासीनः कृतः? संसारसुखविरतो हि उदासीनः। त्वया परित्यक्तो राजापि तथाविधो जात इति तात्पर्यम्।

(५८) हे असहने! कोपने! प्रियस्य अन्यासक्तिसम्भावनामपि सोढुमशक्ते! अन्यस्यै स्त्रियै दातुं, मामिति शेषः प्रभवसि समर्थोऽसि, वा दासं, तवैवेति भावः, कर्त्तुमेव प्रभवसि पुनः किन्तु हे भीरु! मां यथा शङ्कसे मन्यसे अहं त्वयि तथा न हि नैव, त्वं मामन्यासक्तामप्यङ्क आत्मनि उपेक्षापरायणं मन्यसे, वस्तुतस्तु तथा न, अहं त्वयि समधिकादरप्रदर्शनपर एव इति भावः। आर्या वृत्तम्।

(५९) प्रतिविहाय परित्यज्य।

देवी। अज्जउत्त! अलंविदपुण्णो संपदं णिअमो। (ङ) (६०)

[इति सपरिजना निष्क्रान्ता]।

उर्व। हला! पिअकलत्तो राएसी; ण उण हिअअं णिअत्तइदुं सक्कणोमि। (च)(६१)

चित्र। कधं थिरासी णिअत्तीअदि?। (क)(६२)

राजा। [आसनमुपसृत्य]। वयस्य! दूरं गता देवी?।

विदू। भण बीअत्थो जं सि वत्तुकामो; असाज्झो त्ति परिच्छिदिअ आदुरो विअ बेज्जेण अइरेण मुक्को तत्थभोदीए भवं। (ख)(६३)

राजा। अपि नामोर्वशी—"।

उर्व। [आत्मगतम्]। अज्ज कदत्था भवे। (ग)(६४)

(ङ) आर्यपुत्र! अलङ्घितपुण्यः सान्प्रतं नियमः।

(च) अयि! प्रियकरणवो राजर्षिः, न पुनः हृदयं निवर्त्तयितुं शक्नोमि।

(क) कथं स्थिराग्नी निवर्त्यते?।

(ख) भण विश्वस्तो यदसि वक्तुकामः; असाध्य इति परिच्छिद्यातुर इव वैद्येन अचिरेण सुकरत्वमवत्या भवान्।

(ग) अद्य कृतार्था भवेत्।

---

(६०) व्रतचारिणी नियमवती स्यादेव, नियमविघाते तु पुण्यविघातः। अतस्तत् पुण्यविघातमुत्पाद्य इह स्थातुमधुना न शक्नोमि।

(६१) उर्वशी खलु देव्याः चरितं साक्षात् प्रत्यक्षीकृत्य मदर्थमेव देव्या दुश्चरितमिति विभाव्य च सातस्त्र्यादपि नृपतेः आत्महृदयनिवर्त्तने न समर्था।

(६२) अस्थिराग्राया निवर्त्तनं वरमपि सम्भाव्यं, न पुनः स्थिराग्राया इति भावः।

(६३) मदायत्तन्तु यत् किमपि औषधादिकमासीत्, तेनायमसाध्यः अतोऽधुना परित्याग एव वरमिति परिच्छिद्य विभाव्य।

(६४) उर्वशीति शेषः।

राजा ।—

गूढं नूपुर शब्दमात्रमपि मे कान्तं श्रुतौ पातयेत्
पश्चादेत्य शनैः करोत्पलवृतं कुर्वीत वा लोचने ।
हर्म्येऽस्मिन्नवतीर्य साध्वसवशान्मन्दायमाना बला-
दानीयेत पदात् पदं चतुरया सख्या ममोपान्तिकम् ? ॥ (६५)

चिव। हला उव्वसि ! इमं दाव से मणोरहं संपा-
देहि। (घ)

उ०। [ससाध्वसम्]। कीडिस्सं दाव। (ङ)

[इति पृष्ठेनागत्य राज्ञो लोचने संवृणोति]।

चिव। [विदूषकं संज्ञां लम्भयति]। (६६)

राजा। [स्मयं रूपयित्वा]। सखे ! न खलु नारायणोरुसम्भवा
वरोरूः ?।

विदू। कधं भवं अवगच्छदि ?। (च)

राजा। किमत्र ज्ञेयम् ?—

अन्यत् कथमिव पुलकैः कलितं मम गात्रकं करस्पर्शात् ?।
नोच्छ्वसिति तपनकिरणैश्चन्द्रस्येवांशुभिः कुमुदम् ॥ (६७)

(घ) अयि उर्वशि। इमं तावदस्य मनोरथं सम्पादय।

(ङ) क्रीडिष्यामि तावत्।

(च) कथं भवानवगच्छति ?।

---

(६५) गूढं सशब्दपदसञ्चारादविस्पष्टम् इत्यर्थः। साध्वसवशात् मन्दाय-
माना अङ्गालज्जादिजेन जाड्येन मन्थरगतिः इत्यर्थः। उपान्तिकं समीपम्।
शार्दूलविक्रीडितं वृत्तम्।

(६६) कोयं राज्ञश्चतुराङ्गयोति, तस्मा प्रकाशय इति इङ्गितेन विदूषकं संज्ञां
प्रापयति।

(६७) अन्यत् अन्यथा, उर्वशीस्पर्शं विना इत्यर्थः। पुलकैः रोमाञ्चैः। कलितं
व्याप्तम्, आक्रान्तमित्यर्थः। उर्वशीस्पर्शं विना ममायं पुलकः न सम्भवति इति भावः।
आर्या वृत्तम्।

उर्व। अम्महे! वज्जलेवघडिदं विअ मे हत्थजुअलं ण समत्थाम्हि अवणेदुं। (छ) (६८) [इति मुकुलिताक्षी चक्षुषी हस्तावपनीय ससाध्वसा तिष्ठति]।

राजा। [हस्ताभ्यां गृहीत्वा परिवर्त्तयति]।

उर्वशी। [कथञ्चिदुपसृत्य]। जेदु जेदु महाराओ। (ज)

विद। सुहं दे वअस्स!?। (झ)

राजा। नन्वेतदुपपन्नम्।

उर्व। हला! देईअ दिण्णो महाराओ; अदो से पणय-बदी विअ सरीरसंगदम्हि; मा क्खु मं पुरोभाइणि त्ति समत्थेहि। (ञ)(६९)

विदू। कधं इह ज्जेव तुम्हाणं अत्थमिदो सूरो?। (ट)

राजा। [उर्वशीमवलोक्य]।—

देव्या दत्त इति यदि व्यापारं व्रजसि मे शरीरेऽस्मिन्।
प्रथमं कस्यानुमते चोरितमयि! मे त्वया हृदयम्?॥ (७०)

(छ) अहो! (आश्चर्यम्!) वज्रलेपघटितमिव मे हस्तयुगलं न समर्थास्मि अपनेतुम्।

(ज) जयति जयति महाराजः।

(झ) सुखं ते वयस्य!?।

(ञ) अयि! देव्या दत्तो महाराजः; अतोऽस्य प्रणयवतीव शरीरसङ्गतास्मि; मा खलु मां पुरोभागिनीति समर्थय।

(ट) कथमिहैव युवयोरस्तमितः सूर्यः?।

---

(६८) राज्ञो दंडस्मर्यादात्मदेहस्यानम्रत्वं सूचितम्।

(६९) सर्वकर्मसु अग्रगामित्वं पुरोभागित्वम्। अत्र तु विना वार्त्तया आत्मना अस्य शरीरसङ्गतत्वादहं पुरोभागिनी संवृत्ता, तत्र। "स्त्रीलज्जाः स्त्रियः प्रोच्याः" इति भावः।

(७०) देव्या दत्त इति यदि अस्मिन् शरीरे व्यापारं व्रजसि अनुमतमिति

विद० । वयस्य ! निरुत्तरा एषा । मम संपदं विज्ञप्तिं सुणीअदु । (ठ)

राजा । अवहितोऽस्मि ।

विद० । वसंताणंतरं उण्हसमए भअवं सुज्जो मए उव-अरिदव्वो ; ता जधा इअं मे पिअसही सग्गस्स ण उक्कंठेदि, तधा वअस्सेण कादव्वं । (ड) (७१)

विदू० । किं वा सग्गे सुमरिदव्वं ? ण तत्थ खाईअदि, ण वा पीअदि, केवलं अणिमिसेहिं अच्छीहिं मौणदा अवलंबी-अदि । (ढ)

राजा । वयस्य !—

अनिर्देश्यसुखं स्वर्गं कथं विस्मारयिष्यते ? ।
अनन्यनारीसामान्यो दासस्वायं पुरूरवाः ॥ (७२)

विद० । अणुग्गहिदम्हि । हला उव्वसि ! अकादरा भविअ विसज्जेहि मं । (ण)

(ठ) वयस्य ! निरुत्तरा एषा । मम सांप्रतं विज्ञप्तिः श्रूयताम् ।

(ड) वसन्तानन्तरम् उष्णसमये भगवान् सूर्यो मया उपचरितव्यः ; तत् यथा इयं मे प्रियसखी स्वर्गस्य न उत्कण्ठते तथा वयस्येन कर्त्तव्यम् ।

(ढ) किं वा स्वर्गे स्मर्तव्यम् ? न तत्र खाद्यते, न वा पीयते, केवलमनि-मिषैरक्षिभिर्मौनता अवलम्ब्यते ।

(ण) अनुगृहीताऽस्मि । अयि उर्वशि ! अकातरा भूत्वा विसर्जय माम् ।

यदि चालिङ्गनादिकं करोषि, तत् तस्य अनुमते प्रागेव मे हृदयं त्वया हृतमिति भावः । आर्य्या हृत्तम् ।

(७१) उष्णसमये ग्रीष्मकाले । वयस्येन सख्या भवता इत्यर्थः । ग्रीष्मकाले सूर्योपस्थानं मया कर्त्तव्यम्, अतः सखीसन्दर्शनार्थमागन्तुं न शक्ष्यामि, यद्यद-दर्शनोत्कण्ठा अस्याः सर्वदा एकत्रावस्थानादिना दूरीकरणीया इति भावः ।

(७२) अनन्यनारीसामान्यः अन्यनारीषु यथाऽहं सामान्यः तथा न, अर्थात् सर्वासु यथा समभावत्वेन वर्त्तामहे, तथा त्वयि न । त्वयि तु विशेषप्रणयवान्

उर्व। [चित्रलेखां परिष्वज्य सकरुणम्]। सहि! मा क्खु मं विसुमरेसि। (त)

चित्र। [सस्मितम्]। वअस्सेण संगदा तुमं मए एव्वं जाचिदव्वा। (थ)(७३)

[इति राजानं प्रणम्य निष्क्रान्ता]।

विदू। दिट्ठिआ मणोरहसिद्धीए वड्ढदु भवं। (द)

राजा। इमां तावत् मनोरथसिद्धिं पश्य।—

सामन्तमौलिमणिरञ्जितपादपीठ-
मेकातपत्रमवनेर्न तथा प्रभुत्वम्।
अस्याः सखे! चरणयोरहमद्य कान्त-
माज्ञाकरत्वमधिगम्य यथा कृतार्थः॥ (७४)

उर्व। णत्थि मे वाआ विहवो अदो अवरं मंतिदुं। (ध)

राजा। [उर्वशीं हस्तेन अवलम्ब्य]। अहो! अविरुद्धसंवर्द्धनमितदिदानीमीप्सितलम्भानाम्। (७५) यतः।—

(त) सखि! मा खलु मां विस्मरिष्यसि।

(थ) वयस्येन सङ्गता त्वं मया एवं याचितव्या।

(द) दिष्ट्या मनोरथसिद्ध्या वर्द्धतां भवान्।

(ध) नास्ति मे वाचा विभवोऽतोऽपरं मन्त्रयितुम्।

दासवदुपचरिष्यामि च, अतः किञ्चिन्नास्ति मे अप्राप्तिः। एतन्मात्रविभवेन सुखपूर्णस्वर्गविस्मारणे कथमहं क्षमः स्याम्? इति तात्पर्य्यम्। अनुष्टुप् वृत्तम्।

(७३) वयस्यसङ्गतायास्तवैवं सम्भाव्यते न पुनर्मम।

(७४) प्रभुत्वमपि प्राप्य तथा नाहं कृतार्थः, यथाऽस्या आज्ञाकरत्वं प्राप्य। वसन्ततिलकं वृत्तम्।

(७५) ईप्सितप्रापकाणां अन्द्रपादादीनामतिशय्यमिदानीं न विरुद्धम्। आङ्गितमेलकत्वात्तेषाम् अतिशय्यमिदानीं मे सुखकरमेव, न सत्त्वम्बन्धे विरुद्धमिति भावः।

पादास्त एव मणिनः सुखयन्ति गात्रं
बाणास्त एव मदनस्य मनोऽनुकूलाः ।
संरम्भरूक्षमिव सुन्दरि ! यद्यदासीत्
त्वत्सङ्गमेन मम तत्तदिवानुनीतम् ॥ (७६)

उर्व । अवरद्धाम्हि चिरआरिआ महाराअस्स । (न)

राजा । सुन्दरि ! मा मैवम् ।—

यदेवोपनतं दुःखं सुखं तद्धि रसान्तरम् ।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥ (७७)

विदू । भोदि ! सेविदा पदोसरमणीआ चंदपादा, ता समओ क्खु दे गेहप्पवेसस्स । (प)

राजा । तेन हि सख्या मार्गमादेशय ।

विदू । इदो इदो भोदी । (फ)

[इति परिक्रामति] ।

राजा । सुन्दरि ! इयमिदानीं मे प्रार्थना ।

उर्व । कीरिसी सा ? । (ब)

राजा । अनधिगतमनोरथस्य पूर्वं
शतगुणितेव गता मम त्रियामा

(न) अपराद्धास्मि चिरकारिका महाराजस्य ।

(प) भवति ! सेविताः प्रदोषरमणीयाश्चन्द्रपादाः, तत् समयः खलु ते गृह-प्रवेशस्य ।

(फ) इत इतो भवती ।

(ब) कीदृशी सा ?

---

(७६) पादाः किरणाः । संरम्भरूक्षं रोषदारुणम् । अनुनीतं कृतसान्त्वनमिव । वसन्ततिलकं वृत्तम् ।

(७७) रोगमुक्तो हि उपशमसुखमनुभवति ; चिरमरोगी कथं तदवगच्छति ? अनुष्टुप् वृत्तम् ।

यदि तु तव समागमे तथैव
प्रसरति सुभ्रु ! ततः कृतौ भवेयम् ॥ (७८)

[इति निष्क्रान्ताः सर्वे]।

इति तृतीयोऽङ्कः ।

चतुर्थोऽङ्कः ।

[नेपथ्ये सहजन्या-चित्रलेखयोः प्रावेशिकी आक्षिप्तिका]। (१)—

प्रियसखि-वियोग-विमना सखीसहिता वाकुला समुल्लपति ।
सूरकर-फंस्स-विअसिअ-तामरसे सरवरुत्तंगे । (क) (२)

(क) प्रियसखी-वियोग-विमनाः सखीसहिता व्याकुला समुल्लपति ।
सूर्यकरस्पर्शविकसिततामरसे सरोवरोत्सङ्गे ॥

---

(७८) हे सुभ्रु ! अनधिगतः अप्राप्तः अपूर्णः इति यावत्, मनोरथः अभिलाषो यस्य तथाभूतस्य मम त्रियामा प्रहरत्रयसमन्विता रात्रिः श्रुतगुप्तिरेव त्रिप्रहरसमन्वितेव गता। विरहवेदनाविधुरेण मया रात्रिः कष्टेन यापिता, सुतरां वर्धितयामेव आसीत् इत्यर्थः। इदानीं तव समागमे यदि तु तथैव श्रुतगुप्तिरेव प्रसरति गच्छति ततः कृतो कृतार्थो भवेयम्। पूर्ववाक्यं वृत्तम्।

---

(१) प्रावेशिकी रङ्गप्रवेशसंसूचिका, आक्षिप्तिका गीतिविशेषः। तदुक्तम्,—

"नानारसार्थयुक्ता सूच्यां या गीयते प्रवेशेषु ।
प्रावेशिकी तु नाम्ना विज्ञेया सा ध्रुवा तज्ज्ञैः ॥"
"चञ्चत्पुटादितालेन मार्गत्रयविभूषिता ।
आक्षिप्तिका स्वरपदयमिता यमिता मुनैः ॥" इति ।

(२) नवोदितसूर्यकरस्पर्शविकसिततामरसे सरोवरोत्सङ्गे सखीसहितापि प्रियसखीवियोगविमनाः, अत एव व्याकुला, इंसीति शेषः; समुल्लपति विरौति। इंसीकृजतः सकलन्यासहितायाक्षिप्तिकायाः प्रवेशः सूच्यते। इंसीपदे वर्धितयुगं स्वरो

[ततः प्रविशति सहजन्या चित्रलेखया च]।

चित्र। [प्रवेशानन्तरं दिपदिकया दिशोऽवलोक्य]। (२)—

सहअरि-दुक्खालिङ्गअं सरवरअम्हि सिणिद्धअं।
बाहो वग्गिअ-णअणअं तम्मइ हंसीजुअलअं॥ (ख) (४)

सह। [सखीटम्]। सहि चित्तलेहे! मिलाअमाणसअ-
वत्तकमणा दे मुहच्छाआ हिअअस्स असुत्थदं सूचेदि; ता
कहेहि मे अणिव्विदिकारणं, जेण दे समाणदुक्खा होमि। (ग)

चित्र। सहि! अच्छरा-वावारपज्जाएण तत्थभवदो सुज्जस्स
उअत्थाणे वट्टंती पिअसहीए विणा वस्संतसमओ (५)
आअदो त्ति बलिअं उक्कंठिदाम्हि। (घ)

(ख) सहचरीदःखालीढकं सरोवरे स्निग्धकम्।
बाष्पावलिप्ततनयनकं ताम्यति हंसीयुगलकम्॥

(ग) सखि चित्रलेखे। म्लायमानगतपवक्त्रा ते मुखच्छाया हृदयस्य असुस्थतां सूचयति; तत् कथय मे अनिर्वृतिकारणं येन ते समानदःखा भवामि।

(घ) सखि। अप्सरोव्यापारपर्य्यायेण तत्रभवतः सूर्य्यस्य उपस्थाने वर्त्तमाना प्रियसख्या विना वर्षत्समय आगत इति बलवदुत्कण्ठितास्मि।

यथा सुखजनकमपि विरहितत्वात् केवलं दुःखाय, तद्वत् चित्रलेखापक्षे वर्षासमयोऽपि प्रियसखीविरहितत्वात् दुःखकारणं जातम्। प्रियवस्तु प्रियसङ्गतस्य सुखाय भवति, विरहितस्य तु तदेव दुःखाय जायते इति भावः। गाथाच्छन्दः; तल्लक्षणं यथा पिङ्गले,—

"पढमं बारहमत्ता, बीए अट्ठार दोहिं संजुत्ता।
जह पढमं तह तीअं दहपञ्चविरइआ गाहा॥" इति।

(इ) दिपदिका,—"गुरुः खण्डा च मात्रा च सम्पूर्णेति चतुर्विधा। भवेद्दिपदिका गीतिर्भरतेन प्रकीर्त्तिता॥ भवेत् चतुर्भिश्चरणैस्त्रयोदशकलात्मकैः॥" इत्युक्तलक्षणगीतिविशेषः। कला मात्रा। दिपदिकया दिशोऽवलोक्य दिगवलोकनकाले प्रायशो दिपदिका व्यवह्रियते।

(४) यद्दृष्ट्वा नयनं स्निग्धं भवति, तदेव स्निग्धकम्।

(५) वर्षत्समयः वर्षाकालः।

सह। सहि! जाणामि बो अणोरणगदं पेम्मं; तदो तदो?। (ङ)

चित्र। तदो इमेसुं दिअसेसुं को णवो वुत्तंतो वट्टदि त्ति पणिधाणट्ठिदाए मए अत्ताहिदं उवलद्धं। (च)

सह। सहि! कीरिसं तं?। (छ)

चित्र। [सकरुणम्]। उव्वसी किल तं राएसिं लच्छीसणाहं गेण्हिअ अमच्चेसु णिवेसिदरज्जधुरं (६) केलासासिहरुद्देसे गंधमादणवणं विहरिदुं गदा। (ज)

सह। [सश्राघम्]। सहि! सो संभोओ, जो तारिसेसु पदेसेसु; (७) तदो तदो?। (झ)

चित्र। तदो तहिं मंदाइणीतीरे सिकदापव्वदेहिं (८) कीलमाणा उदअवती णाम विज्जाहरदारिआ तेण राएसिणा खणं णिज्झाइदेत्ति कदुअ कुविदा मे पिअसही उव्वसी। (ञ)

(ङ) सखि। जानामि युवयोरन्योऽन्यगतं प्रेम; ततस्ततः?।

(च) तत एषु दिवसेषु को नवो वृत्तान्तो वर्तते इति प्रणिधानस्थितया मया आत्मार्थितमुपलब्धम्।

(छ) सखि! कीदृशं तत्?।

(ज) उर्वशी किल तं राजर्षिं लक्ष्मीसनाथं गृहीत्वा अमात्येषु निवेशित-राज्यधुरं कैलासशिखरोद्देशे गन्धमादनवनं विहर्तुं गता।

(झ) सखि। स सम्भोगः, यः तादृशेषु प्रदेशेषु; ततस्ततः?।

(ञ) ततश्च मन्दाकिनीतीरे सिकतापर्वतैः क्रीडन्ती उदकवती नाम विद्याधरदारिका तेन राजर्षिणा क्षणं निध्यातेति कृत्वा कुपिता मे प्रियसखी उर्वशी।

---

(६) लक्ष्मीसनाथं न तु पद्मसपत्नीसहितमिति तात्पर्यम्। अमात्येषु निवेशितराज्यधुरं निश्चिन्तमिति यावत्।

(७) भवतीति शेषः। मन्दमादनवनस्थातिमनोहरत्वान्निर्जनत्वाच्च तत्र सम्भोगोऽतिसुखकर इति भावः।

(८) सिकतापर्वतैर्वालुकानिर्मितक्षुद्रपर्वतैः।

सह। असहणा खु सा ; दुरारूढ़ो अ से प्पणओ ; ता भविदव्वदा एत्थ बलवदी ; तदो तदो ?। (ट)

चित्र। तदो सा भत्तुणो अणुणअं अप्पलिवज्जमाणा गुरुसावसंमूढ़हिअआ विसुमरिद-देवदाणिअमा कस्सआजण-परिहरणिज्जं कुमालवणं पविट्ठा ; पवेसाणंतरं अ काणणो-वंतवत्तिलदाभावेण परिणदं से रूवं। (ठ)(९)

सह। [सभीक्ष्य]। सव्वधा णत्थि विहिणो अलंघणीअं णाम, जेण तारिसस्स रूवस्स असारिसो ज्जेव परिणामो संवुत्तो ; तदो तदो ?। (ड)

चित्र। तदो सो वि तस्सिं ज्जेव काणणे पिअसहीं असेस-अंतो उम्मत्तीभूदो "इदो उव्वसी तदो उव्वसी" त्ति कदुअ अहोरत्ताइं अदिवाहेदि। [नभसोऽवलोक्य]। एदिणा उण णिव्विदाणं पि उक्कंठाआरिणा मेहोदएण अप्पदीआरो भविस्सदि त्ति तक्केमि। (ढ)(१०)

(ट) असहना खलु सा ; दूरारूढ़प्रणया: प्रणय: ; तस्मादनुवर्तयितव्यता अव बलवती ; ततस्तत: ?।

(ठ) तत: सा भर्तुरनुनयमप्रतिपद्यमाना गुरुशापसम्मूढ़हृदया विस्मृतदेवता-नियमा कन्यकाजनपरिहरणीयं कुमारवनं प्रविष्टा ; प्रवेशानन्तरञ्च काननोपान्त-वर्त्तिलताभावेन परिणतमस्या रूपम्।

(ड) सर्वथा नास्ति विधेरलङ्घनीयं नाम, येन तादृशस्य रूपस्य अन्यादृश एव परिणाम: संवृत्त: ; ततस्तत: ?।

(ढ) तत: सोऽपि तस्मिन्नेव काननेप्रियसखीमन्विष्यन् उन्मत्तीभूत: "इत उर्वशी तत उर्वशी" इति कृत्वा अहोरात्राण्यतिवाहयति। एतेन पुनर्निर्वृतानामपि उत्कण्ठाकारिणा मेघोदयेन अप्रतीकारो भविष्यतीति तर्कयामि।

---

(९) तत: सा भर्तुरनुनयमित्यादि।—भर्तु: स्वामिन:। अनुनयं प्रसादनो-पयोगि चाटुवचनम् इत्यर्थ:। अप्रतिपद्यमाना अगृह्णन्ती। गुरोर्भरतस्य शापेन सम्मूढ़-

[अवान्तरे जम्भलिका]। (११)

सद्दमरि-दुक्खालिद्धअं सरवरअम्मि सिणिद्धअं।
अविरल-बाहजलोसुअं तम्मइ हंसीजुअलअं॥ (ण) (१२)

उ०। सहि! अत्थि को वि समागमोवाओ?। (त)

वि०। गोरीचरण-रागसंभवं संगममणिं वज्जिअ कुदो से समागमोवाओ?। (थ)

उ०। ण ईदिसा आकिदिविसेसा चिरं दुक्खभाइणो होंति; ता अवस्सं को वि अणुग्गहणिमित्तभूओ समागमोवाओ भविस्सदि त्ति तक्केमि; [प्राचीं दिशं विलोक्य]। ता एहि उदआहिवस्स (१३) भअवदो सुज्जस्स उवत्थाणं करेम्ह। (द)

(ण) सदचर्यां दुःखेनालीढकम्। स्निग्धकं सरोवरे स्निग्धकम्।
अविरलबाष्पजलोष्णकं ताम्यति हंसीयुगलकम्॥

(त) सखि! अस्ति कोऽपि समागमोपायः?।

(थ) गौरीचरणरागसम्भवं सङ्गममणिं वर्जयित्वा कुतोऽस्याः समागमोपायः?।

(द) नेदृश्या आकृतिविशेषाश्चिरं दुःखभागिन्यो भवन्ति; तदवश्यं कोऽपि अनुग्रहनिमित्तभूतः समागमोपायो भविष्यतीति तर्कयामि; तदेहि उदयाधिपस्य भगवतः सूर्यस्य उपस्थानं कुर्वः।

दृदया कन्यकाजनपरिहरणीयं निषिद्धस्त्रीजनगमनं कुमारवनं कुमारस्य कार्त्तिकेयस्य तपोवनं प्रविष्टा।

(१०) "मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः" इति मेघदूतम्।

(११) अवान्तरे जम्भलिका। जम्भलिकालक्षणं यथा भरतः,—"गुह्या हिमदिका गीतिः सैव जम्भलिकोच्यते।"

(१२) सदचर्यां दुःखेन आलीढकम् आक्रान्तम्। स्निग्धकं स्नेहप्रवणं, स्निग्धकान्ति इत्यर्थो वा। ताम्यति क्लिश्यति।

(१३) नेदृश्या आकृतिविशेषा इत्यादि।—ईदृश्या आकृतिविशेषाः चिरं दुःखभागिन्यो न भवन्ति एवंविधगुणलक्षणाक्रान्तः सुपुरुषः स महाराजः चिरं न

[अथान्तरे खण्डधारः]। (१४)—

चिंतादूमिअमाणसिआ सहअरि-दंसणलालसिआ ।
विअसिअ-कमल-मणोहरए विहरइ हंसो सरवरए ॥ (ध)(१५)

[इति निष्क्रान्ते]।

[प्रवेशकः]। (१६)

[नेपथ्ये पुरूरवसः प्रावेशिकी आक्षिप्तिका]।—

गहणं गइंदणाहो पिअ-विरहुम्माअ-पअडिअ-विआरो ।
विसइ तरु-कुसुम-किसलअ-भूसिअ-णिअदेह-पब्भारो ॥
(न) (१७)

(ध) चिन्तादूनमानसिका सहचरीदर्शनलालसिका ।
विकसितकमलमनोहरे विहरति हंसो सरोवरे ॥

(न) गहनं गजेन्द्रनाथः प्रियाविरहोन्मादप्रकटितविकारः ।
विशति तरुकुसुमकिसलयभूषितनिजदेहप्राग्भारः ॥

विरहव्यथामनुभवेत्, दृष्ट्वा सुकवा उर्वशी च चिरमेवमवस्थां नैव सहेतेति तर्कयामि इत्यर्थः । उदयाधिपस्य उदयपर्वतस्याधिपस्य ।

(१४) अथान्तरे खण्डधारा । तल्लक्षणं यथाह भरतः,—"चतुर्दशकला-युक्तैश्चतुर्भिश्चरणैरिह । खण्डाख्या द्विपदी गीतिः खण्डधाराऽपि सा भवेत् ॥" यद्वा—"यद्गीतं गुणकर्या च रागेण क्रीडकेन च । तालेन सा खण्डधारा यष्टिकेन प्रकाशिता ॥" इति ।

(१५) चिन्तया दूनं सन्तप्तं मानसकं चित्तं यस्याः सा चिन्ताक्लिष्टमानसा ।

(१६) प्रवेशक इति ।—प्रवेशकलक्षणं यथा दर्पणे,—"प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः । अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ॥" इति ।

(१७) गहनं गजेन्द्रनाथ इत्यादि ।—गजेन्द्रनाथः प्रियायाः विरहेण वियोगेन यः उन्मादः मत्तता तेन प्रकटितः सुस्पष्टं प्रकाशितः विकारी मनसः प्रकृतिव्यतिक्रमो यस्य सः । तरुभिः खण्डितद्रुमकैः कुसुमैः किसलयैश्च भूषितः निजदेहस्य प्राग्भारः परभागः, उपरिदेश इत्यर्थः, पृष्ठदेश इति यावत्, येन सः । "प्राग्भार उत्कर्षे परभागे पर्वताग्रभागे च" इति वाचस्पत्यम् । अत्रापि गजच्छद्मना पुरूरवा आक्षिप्यते । स्त्रीऽपि धातूक्तत्वात् पुष्पादिविभूषितनिजदेह इति सार्थम् ।

[ततः प्रविशति आकाशपद्मलक्ष्यः सोन्मादो राजा]।

राजा। [सक्रोधम्]। आः दुरात्मन् रक्षः! तिष्ठ तिष्ठ, मम प्रियतमाम् आदाय क्व गच्छसि? [विलोक्य]। हन्त! कथं शैलशिखराङ्गनमुत्पत्य बाणैर्मामभिवर्षति! [इति लोष्टं गृहीत्वा हन्तुं धावन्, अनन्तरे दिपदिकया दिशोऽवलोक्य]।—

हिअआहिअ-पिअदुक्खओ सरवरए धुदपक्खओ।
बाहो-वग्गिअ-णअणओ तम्मइ हंसजुआणओ॥ (प) (१८)

[विभाव्य सकरुणम्]। कथम्!—

नवजलधरः सन्नद्धोऽयं न हृतनिशाचरः!
सुरधनुरिदं दूराकृष्टं न नाम शरासनम्!।
अयमपि पटुर्धारासारो न बाणपरम्परा!
कनकनिकषस्निग्धा विद्युत् प्रिया मम नीर्वशी! ॥ (१९)

[इति मूर्च्छितः पतति। पुनर्दिपदिकया उत्थाय निश्वस्य]।—

मइ जाणिअं मिअलोअणिं णिसिअरु कोवि हरेइ।
जाव णु णवतडि-सामल-धाराहरु वरिसेइ॥ (फ) (२०)

[इति सकरुणं विचिन्त्य]। तत् खलु क्व नु गता स्यात्?।

(प) हृदयाहितप्रियादुःखकः सरोवरे धुतपक्षकः।
बाष्पावलोकितनयनकक्षाम्यति हंसयुवकः॥

(फ) मया ज्ञातं मृगलोचनां निशाचरः कोऽपि हरति।
यावत् नु नवतडिच्छ्यामलो धाराधरो वर्षति॥

---

(१८) हृदयाहितेत्यादि।—हृदये मनसि आहितं सन्निधापितं रक्षितमिति यावत्, प्रियायाः दुःखं विपत्तिरूपं येन सः। धुतपक्षकः सञ्चालितपक्षः। "व्याधाव-लोकितनयनः" इति पाठपक्षे—व्याधेनावलोकितनेत्रः।

(१९) सन्नद्धः उद्यतः। दूराकृष्टं सुविस्तृतम्। पटुः प्रबलः धाराणां वृष्टिधाराणाम् आसारः सम्पातः। कनकस्य सुवर्णस्य निकषः सुवर्णपरीक्षोपयोगी कषपाषाणविशेषः। हरिणी वृत्तम्।

(२०) मृगलोचनाम् उर्वशीम्। नवः नूतनः, तडिच्छ्यामलः विद्युता सह

क्वापि—

तिष्ठेत् कोपवशात् प्रभावपिहिता ? दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेत् ? मयि पुनर्भावार्द्रमस्या मनः।
[सरोषम्]।—
तां हर्त्तुं विबुधद्विषोऽपि हि न मे शक्ताः पुरोवर्त्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः ! ॥ (२१)
[खिन्नदिक्या दिशोऽवलोक्य निश्वस्य सास्रम्]। अहो ! अपरा-
वृत्तभागधेयानां दुःखं दुःखानुबद्धमेव। (२२) कुतः ?—
अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे।
नववारिधरोदयादहोभिर्भवितव्यञ्च निरातपत्वरम्यैः ॥ (२३)
[अनन्तरं चर्चरी]। (२४)

युक्तः श्यामलः कृष्णवर्णः, धाराधरो मेघः। विद्युत्प्रभोद्द्योतिते नवीनजलधरे राक्षस-
इत्यगतोर्वशीश्रमः। मन्ये "जाव ण" इत्यत्र "जाव ण" इति पाठ आसीत्, लिपि-
प्रमादात् "ण" इति सञ्जातः। "ण" इति पाठे—यावत् नवतडिच्छ्यामलो धाराधरो
न वर्षति तावत मया ज्ञात कोऽपि निशाचरः मृगलोचनां हरति इत्यन्वयः।

(२१) तिष्ठेत् कोपवशादित्यादि।—प्रभावेण तिरस्करणीविद्याप्रभावेण पिहिता आच्छादिता। अस्या मनः हृदयं मयि भावेन अनुरागेण आर्द्रं स्निग्धम्। शार्दूलविक्रीडितं वृत्तम्।

(२२) अहो ! अपरावृत्तेत्यादि।—अपरावृत्तम् अप्रतिनिवृत्तं भागधेयं सौभाग्य येषाम्। केवल भाग्यपदोल्लेखेन सौभाग्यमेवाच्छिद्यते। भाग्येनैतत् सम्भवतीत्यादिवत्। दुःखं दुःखेन दुःखान्तरेण अनुबद्धम् अनुस्यूतं युक्तम् इत्यर्थः; दुःखं दुःखान्तरानुषक्तं इति यावत्।

(२३) अयमेकपदे इत्यादि।—एकपदे सपदि ("तत्समैकपदे तुल्ये सद्यः सपदि स्र सृतम्" इति हलायुधः)। तया प्रियया अयं सुदुःसहो वियोगः विरहः उपनतः उपस्थितः। तथा नववारिधरोदयात् नवमेघोदयात् अहोभिः दिवसैः निरातपत्वरम्यैः रौद्राभावमनोहरैश्च भवितव्यम्। सम्भोगार्हं जलदसमये प्रियाविरहः नितरां दुःसह इति भावः। मालभारिणी वृत्तम्।

(२४) चर्चरीति गीतिविशेषसंज्ञा। तदुक्तं यथा—"द्रुतसञ्चलयं समाश्रिता

जलहर ! संहर एह कोवं मइ आसत्तओ
अविरल-धारासाराक्कंत-दिसामुहओ ।
अए ! मइ पुहविं भमंते जइ पिअं पेक्खिहिमि
तआ जं जं करीहिसि तं तं सहीहिमि ॥ (ब) (२५)

[चर्चरिकया विचिन्त्य]। वृथा खलु मया मनसः सन्ताप-दुश्चिरुपेक्ष्यते । यदा मुनयोऽप्येवं व्याहरन्ति—'राजा कालस्य कारणम्' इति, तत् किमहमेनं जलधरसमयं न प्रत्यादिशामि ? (२६) [विहस्य उत्थाय, "यदा मुनयोऽप्येवं व्याहरन्ति" इति पुनः पठित्वा]। भवतु प्रत्यादिशामि ।

[अनन्तरं चर्चरी]।—

गंधुम्माइअ महुअर-गीएहिं
वज्जंतेहिं परहुअतूरेहिं ।
पसरिअ-पवणुल्लोलिअ पल्लव-विअरु
सुललिअ-बिबिहपआरेहिं णच्चइ कप्पतरु (भ) (२७)

(ब) जलधर ! संहर एव कोपं मयाऽऽसक्तकः
अविरलधारासाराक्रान्तदिङ्मुखः ।
अये ! अहं पृथिवीं भ्रमन् यदि प्रियां प्रेक्षिष्ये
तदा यद्यत् करिष्यसि तत्तत् सहिष्ये ॥

पठति प्रेमभरान्नटी यदि । प्रतिमल्लक-रासकेन वा द्रुतमभ्या ·प्रथमा हि चर्चरी ॥" इति । प्रतिमल्लकः सोमकालः । रासकेन इति ।—"लघ्वादितालो लोकेऽसौ रास इत्यभिधीयते" इति ।

(२५) जलधरेति ।—कोपम् अविरलधारावर्षरूपं प्रबलवेगमित्यर्थः । मया आसक्तः सदादिष्टः मनादेशेनेत्यर्थः । यदा प्रियां प्राप्स्यामि तदा तव दुर्वहं सोढ्यं सहिष्ये, अन्यथा न इति भावः ।

(२६) वृथा खलु इति ।—अकारणमेव मे मनसः सन्तापो वर्धते, यतः कालानां राजाधीनत्वात् ; अयमहं जलधरसमयस्य निवारणे समर्थ इत्यर्थः । न प्रत्यादिशामि निवर्तयामीति भावः ।

[क्षेत्र गर्जित्वा]। अथवा न प्रत्यादिशामि ; यत् प्राट्षेण्यैरेव चिह्नैः सम्प्रति मम महाराजोपचारः क्रियते। (२८) [विदूषकं प्रति : "गंधुम्माइय" इति पठित्वा]। कथमिति ?—

विद्युल्लेखा-कनकरुचिरश्री वितानं ममाभ्रं
व्याधूयन्ते निचुलतरुभिर्मञ्जरीचामराणि।
घर्मच्छेदात् पटुतरगिरो वन्दिनो नीलकण्ठा
धारासारोपनयनपरा नैगमाश्चाम्बुवाहाः॥ (२९)

[पुनर्घर्घरी]। भवतु, किं परिच्छदश्लाघया ? यावदस्मिन् कानने प्रियां प्रनष्टामन्वेषयामि। (३०)

(भ) गन्धोन्मादित-मधुकरगीतैर्वाद्यमानैः परभृततूर्यैः।
प्रसृतपवनोद्वेल्लित पल्लवनिकरः सुलक्षितविविधप्रकारैः नृत्यति कल्पतरुः॥

---

(२७) गन्धोन्मादितेत्यादि।—परिण म्रियन्ते इति परभृताः कोकिलाः त एव तूर्याणि तैः। यौतैस्तूर्यैरित्युपलक्षणे तृतीया।

(२८) अथवा न प्रत्यादिशामीत्यादि।—प्राट्षेण्यैः प्रावृट्कालभवैः चिह्नैः मेघविद्युल्लेखाधारासारादिभिः। महाराजोपचारः महाराजोपासनोपयुक्तः चामरव्यजनादिरूपः सेवाविशेष इत्यर्थः।

(२९) तानेव वर्णयति, विद्युल्लेखेत्यादि।—विद्युल्लेखया कनकस्येव कषणोपलाङ्कितस्य स्वर्णस्येव रुचिरा मनोज्ञा श्रीर्यस्य तत् तथाभूतम् अभ्रं मेघः मम वितानं चन्द्रातपः, तथा निचुलतरुभिर्वेतसवृक्षैः मञ्जरीरूपचामराणि व्याधूयन्ते। घर्मच्छेदात् ग्रीष्मात्ययात् ("घर्मः स्यादातपे ग्रीष्मेऽप्यृष्मस्वेदाम्बुसोरपि" इति मेदिनी)। पटुतरगिरः सुस्पष्टभाषिणो नीलकण्ठाः मयूरा मम वन्दिनः स्तुतिपाठकाः ; तथा धारासाराणां वृष्टिजलधाराणामुपनयने परा अम्बुवाहाः मेघाः नैगमाः वणिजः ; यद्वा वणिजः धनरत्नाद्युपहारेण राजानमुपतिष्ठन्ते तद्वदेतेऽपि जलधराः धारावर्षरूपोपहारेण मामुपतिष्ठन्ते इत्यर्थः। यद्यैते बहुभिरुपचारैर्मामुपतिष्ठन्ते तथा न युक्तः प्रावृट्कालप्रत्यादेश इति भावः। मन्दाक्रान्ता वृत्तम्।

(३०) भवतु, किं परिच्छदेत्यादि।—परिच्छदस्य राजोचितपरिजनस्य श्लाघा अहङ्कारः तया ; राजानं मामू एते उपतिष्ठन्ते इत्यादिभिः तथाऽहङ्कारैरलम् इत्यर्थः।

[पादस्यान्तरे भिन्नकः]। (२१)—

दइआ-रहिओ महिअं दुहिओ
विरहाणुगओ परिमंथरओ।
गिरिकाणणए कुसुमुज्जलए
गअजूहवई तह भीणगई ॥ (म) (२२)

[अनन्तरं द्विपदिकया परिक्रम्य अवलोक्य च सहर्षम्]। हन्त हन्त! व्यवसितस्य मे संवर्द्धनं हृत्तम्। (२३)—

आरक्तकोटिभिरियं कुसुमैर्नवकन्दली मलिनगर्भैः।
कोपादन्तर्वाष्पे स्मरयति मां लोचने तस्याः ॥ (२४)

इतो गतेति कथं मया खलु तत्रभवती सूचयितव्या? यतः,—

पद्भ्यां स्पृशेद्वसुमतीं यदि सा सुगात्री
मेघाभिहृष्ट-सिकतासु वनस्थलीषु।
पश्चान्नता गुरुनितम्बतया ततोऽस्याः
दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का ॥ (२५)

(म) दयितारहितोऽधिकं दुःखितो विरहानुगतः परिमन्थरकः।
गिरिकाननके कुसुमोज्ज्वलके गजयूथपतिस्तथा क्षीणगतिः ॥

---

(२१) पाठो वाद्यविशेषः, भिन्नको रागविशेषः। यथाह भरतः,—"षड्ज-मध्यमिकोत्पन्नो भिन्नको मध्यमो वहुः। षड्जयडांशो मन्द्रासो मन्द्रसोऽल्पोऽथवा भवेत्॥ षड्जादिमूर्च्छनः षड्जः सप्तारिषि सकाकलिः। प्रसन्नादियुतो दानवीरे रौद्रेऽद्भुते रसे। दिनस्य पश्चिमे यामे प्रयोज्यः सोमदैवतः॥" इति।

(२२) यदहं गजयूथपतिरपि स्त्रीयां प्राणवल्लभां रक्षितुं न शक्तः। कथं मे यूथपतित्वम्? धिक् नाम् इति अतिदुःखे कारकम्। अत्र भवतीत्यध्याहारः।

(२३) हन्त हन्त! व्यवसितस्येति।—व्यवसितस्य प्रियाऽन्वेषणनियुक्तस्य मे संवर्द्धनं विरहानलसन्मुखं जातम।

(२४) आरक्तकोटिभिरित्यादि।—इयं नवकन्दली आरक्ता कोटिः अग्रभागो यस्यां तैलधाविधैः मलिनगर्भैः कुसुमैः पक्षे., कोपात् अन्तर्वाष्पे अन्तरन्तरितबाष्प-भराकुले तस्याः नयने स्मरयति। आर्या छन्दः।

[विपदिकया परिक्रम्य अवलोक्य च]। हन्त हन्त! उपलब्धमुपलक्षणं, येन तस्याः कोपनायाः सरसमुन्नीयते मार्गः। (२६)—

हृतोष्ठरागैर्नयनोदबिन्दुभिर्निमग्ननाभेर्निपतद्भिरङ्कितम्।
च्युतं रुषा भिन्नगतेरसंश्रयं शुकोदरश्यामममिदं स्तनांशुकम् ॥(२७)

भवतु, आदास्ये तावत्। [परिक्रम्य विभाव्य च सास्रम्]। कथं सेन्द्रगोपं शाद्वलमिदं स्थानम्! तत् कुतोऽस्मिन् विपिने प्रियाप्रवृत्तिमागमयेयम्! (२८) [विलोक्य]। अयमासारोच्छलितशैलतटस्थलीपाषाणमधिरूढः।—

आलोकयति पयोदान् प्रबल-पुरोवात-नर्त्तितशिखण्डः।
केकागर्भेण शिखी दूरोन्नमितेन कण्ठेन ॥ (२९)

---

(२५) पद्भ्यामित्यादि।—सुगात्री अनवद्याङ्गी सा उर्वशी मेघैः अभिहृष्टाः सिक्ता यासु तासु वनस्थलीषु वसुमतीं पृथिवीं यदि पद्भ्यां स्पृशेत्, ततस्तदा गुरुनितम्बतया पश्चान्नता पश्चात् किञ्चिदवनता अलक्तकाङ्का अलक्तकचिह्नोपेता चारुपदपङ्क्तिर्मनोहरपादचिह्नपङ्क्तिर्दृश्येत, एवंविधानां पादचिह्नानामसद्भावात् सर्वथा नाव तस्या आगमनं ज्ञातमिति भावः। "अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात्" इति शाकुन्तले तुल्यः पर्य्यायः। वसन्ततिलकं वृत्तम्।

(२६) हन्त हन्त! उपलब्धमित्यादि।—उपलक्षणं चिह्नम्। मार्गः पन्थाः उन्नीयते अनुमीयते।

(२७) हृतोष्ठरागैरित्यादि।—निम्ननाभेः तस्याः हृतोष्ठरागैः नयनसलिलवर्षेण ओष्ठस्य ताम्बूलादिजनितरागः अपहृत इत्यर्थः, नयनोदबिन्दुभिः अश्रुकणैः अङ्कितं चिह्नितं शुकोदरश्यामम् इदं स्तनांशुकं स्तनयुगलाच्छादि उत्तरीयवसनम्, असंश्रयं निश्चितं मां प्रति रुषा क्रोधेन भिन्नगतेः विसंष्ठुलगमनायाः च्युतं स्खलितं भ्रष्टमित्यर्थः, स्यादेव इति शेषः; कोपवशेन विसंष्ठुलपादविक्षेपेण गच्छन्त्या तया पश्चात् परित्यक्तमिति भावः। संश्रयं वृत्तम्।

(२८) भवतु, आदास्ये तावदित्यादि।—सेन्द्रगोपम् इन्द्रगोपाख्यरक्तवर्णकीटविशेषपरिव्याप्तं शाद्वलं नवदूर्वादलहरितम्। प्रियाप्रवृत्तिमागमयेयं प्रियायाः मार्गं प्राप्नोमि इत्यर्थः।

(२९) आलोकयतीति।—प्रबलेन पुरोवातेन अभिमुखवातेन नर्त्तितः

भवतु, यावदेनं पृच्छामि ।

[अनन्तरे खण्डकः] । (४०)—

संपत्त-विसूरणओ तुरिअं परवारणओ ।

पिअअम-दंसण-लालसओ गअवइ विम्हिअ-माणसओ ॥ (य)

(४१)

[तेना (४२) खण्डकान्तरे चर्चरी] ।—

बरहिण-पब्भ ! तुइ अब्भत्थेमि आअक्खुहि मे ता

एत्थ अरण्णे भमंते जइ तुए दिट्ठा सा महु कंता ।

णिसम्मइ मिअंकसरिसे वअणे हंसगई

ए चिण्हे जाणीहिसि आअक्खिउ तुज्झ मई ॥ (र) (४३)

(य) सम्प्राप्तविसूरणकस्त्वरितं परवारणकः ।

प्रियतमा-दर्शन-लालसको गजवरो विस्मितमानसकः ॥

(र) बर्हिंचप्रभो । त्वामभ्यर्थये आचक्ष्व मे तत्

अवारण्ये भ्रमता यदि त्वया दृष्टा सा मम कान्ता ।

निशामय मृगाङ्कसदृशं वदनं हंसगतिः

एतच्चिह्नं ज्ञास्यसि आख्यातं तुभ्यं मया ॥

शिखण्डो बर्हः यस्य स तथाभूतः ; तथा दूरोन्नमितेन ऊर्ध्वीकृतेन कण्ठेन उपलक्षितः शिखी मयूरः पयोदान् मेघान् आलोकयति ।

(४०) अनन्तरे खण्डकः । खण्डकलक्षणं यथा भरतः,—"पूर्वं चतुर्विंशति-भिरष्टाविंशतिभिः परम् । मात्राभिरिह यस्यार्धं खण्डकः स प्रकीर्त्तितः ॥" यथा—"विरहव्याकुला या तु पठेद्गीतिं कुशीलवी । प्राकृतेन प्रबन्धेन खण्डकः स उदाहृतः ॥" इति ।

(४१) सम्प्राप्तेत्यादि ।—सम्प्राप्तं विसूरणं ("खिदेर्विसूरः" इति विसूरा-देशः) येन सः सम्प्राप्तखेद इत्यर्थः ।

(४२) "तेकारः प्रकरः प्रोक्तो गकारश्च उमा मता । गीताही तेन वक्तव्यं तेना इत्यक्षरद्वयम् ॥" इति ।

(४३) बर्हिंचप्रभो ! इति ।—हे बर्हिंचप्रभो ! मयूरश्रेष्ठ ! अभ्यर्थये याचे ।

[चर्चरिकयोपविश्य अञ्जलिं बद्ध्वा]।—

नीलकण्ठ ! ममोत्कण्ठा वनेऽस्मिन् वनिता त्वया ।
दीर्घापाङ्गा सितापाङ्ग ! दृष्टा दृष्टिक्षमा भवेत् ? ॥ (४४)

[चर्चरिकया विलोक्य]। कथमदत्त्वैव प्रतिवचनं नर्त्तितुमारब्धः ! । [पुनश्चर्चरीं]। तत् किं नु खलु प्रहर्षकारणमस्य ? आं, ज्ञातम् ।—

मृदुपवनविभिन्नो मत्प्रियायाः प्रणाशात्
घनरुचिरकलापो निःसपत्नाऽद्य जातः ।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुममनाथे कं हरेदेष बर्हः ? ॥ (४५)

भवतु, परव्यसनसुखितं न पुनरेनं पृच्छामि । [दिशोऽवलोक्य]। अये ! इयमातपान्त-सन्धुक्षितमदा जम्बूविटप-मध्यास्ते परभृता । विहगेषु पण्डितैषा जातिः; यावदेनां पृच्छामि ।

[अनन्तरं खुरकः]। (४६)—

निशामय शृणु । मृगाङ्कसदृशं वदनं, मम कान्तायाः इति शेषः । हंसगतिः, सा कान्ता इति भावः । एतादृशविशेषविशिष्टा मम कान्ता त्वया दृष्टा चेत् मां कथय ।

(४४) हे सितापाङ्ग ! शुकहरन्त ! नीलकण्ठ ! मयूर ! मम इयम् उत्कण्ठा, अथवा उत्कण्ठारूपा सा दीर्घापाङ्गा आकर्णनयना दृष्टिक्षमा दर्शनयोग्या, सुदर्शना इत्यर्थः, मे वनिता, अस्मिन् वने किं त्वया दृष्टा ? ।

(४५) मृदिति ।—मृदुपवनेन विभिन्नः इतस्ततश्चालितः । घनरुचिरकलापः घनः निबिडः रुचिरः कलापः पिच्छः यस्य तादृशः, नीलकण्ठः इति शेषः । निःसपत्नः प्रतिपक्षशून्यः, निःशत्रुकः । सुकेश्याः उर्वश्याः । कुसुमसनाथे पुष्पशोभिते ; क जनं हरेत् आकर्षेत् ? पुष्पभूषिते उर्वश्याः केशपाशे सति एष बर्हः कमपि जनं रञ्जयितुं नैव शक्नुयात् इति भावः । मालिनी वृत्तम् ।

(४६) खुरको मृगविशेषः । यदुक्तं,—"पठमक्खरिहीणसंजुत्तं यत् श्रुतमध्येन

विज्जाहर-काणण-लीणओ
दुक्खविसण्ण-वाहुप्पीलओ ।
दूरोत्थारिअ-हिअआणंदओ
अंवरमाणेण भमइ गइंदओ ॥ (ल) (४७)

[खुरकामस्तरे चर्चरी]।—

परहुअ ! महुर-आलाविणि ! कंता णंदणवणे सच्छंदं भमंती ।
जइ तुए पिअदमा सा मह दिट्ठा ता आअक्खहि मह परपुट्टे ! ॥
(व) (४८)

[एवमेव नर्त्तित्वा वस्तिकया (४९) उपसृत्य जानुभ्यां स्थित्वा]।

भवति !—

त्वां कामिनो मदनदूतिमुदाहरन्ति
मानापमान-निपुणं त्वममोघमस्त्रम् ।
तामानय प्रियतमां मम वा समीपं
मां वा नयाशु मृदुभाषिणि ! यत्र कान्ता ॥ (५०)

(ल) विद्याधर-आनन लीनको दुःखविनिर्गत-बाष्पोत्पीडवः ।
दूरोत्सारित-हृदयानन्दकीऽम्बरमार्गेण भ्रमति गजेन्द्रवः ॥
(व) परभृते ! मधुरप्रलापिनि ! कान्ता नन्दनवने स्वच्छन्दं भ्रमन्ती ।
यदि त्वया प्रियतमा सा मम दृष्टा तदाचक्ष्व मह्यं परपुष्टे ! ॥

सहेन यत् प्रयुक्तम् । प्रतितालवृतं च नर्त्तनं तत् खुरकाख्यं मुनये शिवेन दत्तम् ॥”
(“खपूर्वतदृगं यत्र प्रतिताल: प्रकीर्त्तित: ॥” इति) । यथा—खुरकाख्यो गेयविशेष: ।
आह च भरत:,—“पूर्वपूर्वांशरत्यागे शीघ्रो वर्णक्रम: स चेत् । उत्तरोत्तरसङ्घादो
खुरक: परिकीर्त्तित: ॥” इति ।

(४७) अम्बरमार्गेण (उपपदसप्तमे तृतीया) आकाशपरिमितेन मार्गेण अनुच्छेनेति यावत् ।

(४८) परभृते परपुष्टे अत्यन्त आदरे द्विरुक्ति:, अथवा मधुरस्वरत्वात् स्त्रीत्वारोपात् ।

(४९) वस्तिका रागोपाङ्गविशेष: ।

[वामकेन किञ्चिदवलिता आकाशे]। (५१) किमाह भवती ? कथं मामेवमनुरक्तमपहाय गतेति ? [चतुर्दिशमवलोक्य]। भवति !—

कुपिता न तु कोपकारणं सकृदप्यात्मगतं स्मराम्यहम् ।
प्रभुता रमणेषु योषितां न हि भावस्खलितान्यपेक्षते ॥ (५२)

[ससम्भ्रममुपविश्य, अनन्तरं जानुभ्यां स्थित्वा, पुनः "कुपिता" इत्यादि पठित्वा विलोक्य च]। कथं कथाविच्छेदकारिणी (५३) स्वकार्य्ये व्यासक्ता ! अथवा सुष्ठु खलु इदमुच्यते ।—

सकृदपि परदुःखं शीतलं सम्यगाहुः
प्रणयमगणयित्वा यन्ममापन्नतस्य ।
अधरमिव मदान्धा पातुमेषा प्रवृत्ता
फलमभिनवपाकं राजजम्बूद्रुमस्य ॥ (५४)

(५०) त्वामिति ।—मदनदूति विरहिणोः नायकनायिकयोः परस्परमिलन-सम्पादनेन कामस्य दूतीम् । मानापमाननिपुणं मानस्य अपमाने अवहेलने, दूरीकरणे इत्यर्थः, निपुणं समर्थम् । "मानापभङ्ग" इति पाठान्तरम । वसन्त-तिलकं वृत्तम् ।

(५१) वामकं पार्श्वस्थवस्तुनः अवलोकने संस्थानविशेषः । यदुक्तं,—"धुर्तेन शिरसा यत्तु पार्श्वेन वलितेन च । तद्वामकं वै कथितं पार्श्वस्थस्यावलोकने ॥" इति । आकाशे इति ।—"किं ब्रवीष्येवमित्यादि विना पादं ब्रवीति यत् । श्रुत्वेवानुक्त-मप्येतत्तत् स्यादाकाशभाषितम् ॥" इति ।

(५२) कुपितेति ।—सकृदपि एकवारमपि, किञ्चिदपीत्यर्थः । रमणेषु प्रियतमेषु । भावस्खलितानि भावस्य भाग्यस्य, प्रणयभावस्य इत्यर्थः, स्खलितानि स्खलनानि, अन्यथाभावानित्यर्थः । स्त्रियो हि प्रियतमेषु अकारणमेव कुप्यन्ति, न तु अत्र प्रणयभङ्गादिकमपेक्षन्ते इति भावः । सुन्दरी वृत्तम् ।

(५३) अयं कथाविच्छेदेत्यादि ।—कथाविच्छेदकारिणी मम कथायाम् अन-वहिता विषयान्तरविक्षिप्तचित्ता, अननुरागिणी इति भावः ।

(५४) सकृदपीत्यादि ।—सकृदपि गुरुतरमपि परदुःखं शीतलं सम्यगाहुः इति यथार्थमेव । यत् यस्मात् मदान्धा मदेनान्धा इयं कोकिला आपन्नतस्य

तदेवं गतेऽपि प्रियेव मे मञ्जुस्वनेति न मे कोपो-ऽस्याम्। सुखमास्तां भवती; साधयामस्तावत्। [उत्थाय दिपदिकया परिक्रम्यावलोक्य च]। अये! दक्षिणेन वनधारां (५५) प्रियाचरणविक्षेपशंसी नूपुरशब्दः। यावदेनमनुगच्छामि। [अकुभेन षड्जपक्षजाः]। (५६)—

पियमम विरह-किलामिअ वदणओ
अविरल-बाहजलाउल-णअणओ।
दुस्सहदुक्ख-विसंठुल-गमणओ
पमरिअ-उहताबअ-दीविअ-अंगओ।
अहिअं दुम्मिअ-माणसओ दुरिअं गओ
काणणे परिब्भमइ गइंदओ॥ (अ) (५७)

(अ) पियतमाविरहक्लान्तवदनकोऽविरलबाष्पजलाकुलनयनकः।
दुःसहदुःखविसंष्ठुलगमनकः प्रसृतोष्णतापदीपिताङ्गकः।
अधिक दूनमानसको दूरितं गतः कानने परिभ्रमति गजेन्द्रकः॥

दयितविरहदुःखार्तस्य मम प्रथमनुराग गाढानुरागजनितं दुःखमिति भावः। अनवाप्य अविचार्यैव राजसम्भ्रमस्य अभिनवपाकं सद्यः पक्वं फलम् अधरमिव पातुं प्रवृत्ता प्रक्रान्ता। यथा कश्चित् अरण्ये कामिनी आर्तजननिवेदनमनपेक्ष्यैव आश्लिङ्गनचुम्बनादिना रतिलीलामारभते, तद्वदियमपि आर्तस्य मम 'वचनमनाकर्ण्यैव स्वकार्ये व्यासक्तेति भावः। मालिनी छन्दः।

(५५) तदेवं गते इत्यादि।—तस्मात् एवं गतेऽपि एवं मम निवेदनमनपेक्ष्य विषयान्तरव्यापृते सत्यपि, मत्प्रियेव यत् मधुरभाषिणीयम्, अतः अस्यां मे कोपोऽयुक्त इति भावः। अये! दक्षिणेनेत्यादि।—वनधारां वनपङ्क्तिं, वनश्रेणी-मित्यर्थः. दक्षिणेन तस्य दक्षिणतः इत्यर्थः। ("धारा पङ्क्तौ द्रवद्रव्यसवेऽम्बुनिपातके" इति मेदिनीः)। दक्षिणेनेत्येनप्रत्ययान्तो निपातः। तच्छीलेति वनधारामिति द्वितीया।

(५६) अकुभो रागविशेषः। उपभङ्गाः अवच्छेदाः।

(५७) प्रियतमाविरहेत्यादि।—दुःसहदुःखविसंष्ठुलगमनः दुःसहेन दुःखेन विसंष्ठुलं विपरीतं गमनं यस्य सः। दूरितं दुःखं गतः प्राप्तः। आर्या छन्दः।

[अनन्तरं विपदिकया दिशोऽवलोक्य]।—

प्रियकरिणी-विच्छेदाग्नौ गुरुशोकानलदीपितो ।
बाष्पजलाकुल-लोचनो करिवर भ्रमति समाकुलो ॥ (ष) (५८)

[सकरुणम्]। हा धिक् ! कष्टम् ।—

मेघश्यामा दिशो दृष्ट्वा मानसोत्सुकचेतसा ।
कूजितं राजहंसेन नेदं नूपुरशिञ्जितम् ! ॥ (५९)

[इति पठित्वा उत्थाय]। भवतु, यावदेते मानसोत्सुकाः पतत्रिणः सरसोऽस्मात् न उत्पतन्ति, तावदेतेभ्यः प्रियाप्रवृत्तिमागमयेयम् । [वल्गितिकया उपसृत्य जानुभ्यां स्थित्वा]। (६०)

हंहो जलविहङ्गमराज !—

पश्चात् सरः प्रतिगमिष्यसि मानसं त्वं
पाथेयमुत्सृज विसं ग्रहणाय भूयः ।
मां तावदुत्तर शुचो दयिताप्रवृत्त्या
स्वार्थात् सतां गुरुतरा प्रणयिक्रियैव ॥ (६१)

(ष) प्रियकरिणीविच्छेदितको गुरुशोकानलदीपितकः ।
बाष्पजलाकुललोचनकः करिवरो भ्रमति समाकुलकः ॥

---

(५८) प्रियकरिणीति ।—प्रियकरिणीविच्छेदितकः प्रियकरिण्या सह प्राप्तविच्छेदः । गुरुशोकानलदीपितकः प्रबलशोकाग्निदग्धः ।

(५९) मेघश्यामेत्यादि ।—मेघेन मेघोदयेन श्यामा नीला । मानसे तदाख्ये सरोवरे उत्सुकं मानसगमनाय उत्कण्ठितम् इत्यर्थः, चेतश्चित्तं यस्य तेन । "ज्योत्स्नापेया चकोरैर्जलधरसमये मानसं यान्ति हंसाः" इत्यादि कविसमयप्रसिद्धत्वात् । अत्र अप्रकृतं नूपुरशिञ्जितं निषिध्य प्रकृतराजहंसकूजितस्थापनात् निषेधालङ्कारः । अनुष्टुप् वृत्तम् ।

(६०) भवतु, यावदेते इत्यादि ।—प्रियाप्रवृत्तिं प्रियाया वार्त्ताम् आगमयेयं जानीयाम् । वल्गितिका गीतिविशेषः गतिविशेषो वा ।

(६१) पश्चादिति ।—त्वं मानसं सरः तदाख्यं सरोवरं पश्चात् प्रतिगमिष्यसि ।

[तिर्यगवलोक्य]। अयि! यथा उन्मुखमालोकयति, तथा व्यक्तं,—"प्रवासोत्सुकमनसा मया न दृष्टा" इत्याह। [उपविश्य चर्चरी]। अरे रे हंस! किं गोपयसि?। (स) [इति गत्वा उत्थाय]।—

यदि हंस! गता न ते नतभ्रूः
सरसी रोधसि दृक्पथं प्रिया मे।
मदखेलपदं कथं नु तस्याः
सकलं चौर! गतं त्वया गृहीतम्? ॥ (६२)

गइ अणुसारे मए लक्खिज्जइ। (ह) (६३) [चर्चरिकया उपसृत्य अञ्जलिं बद्ध्वा]।—

हंस! प्रयच्छ मे कान्तां गतिरस्यास्त्वया हृता।
विभावितैकदेशेन देयं यदभियुज्यते ॥ (६४)

(स) अरे रे हंस! किं गोप्यते?।

(ह) गत्यनुसारेण मया लक्ष्यते।

पाथेयं पथि सम्बलभूतं विसं मृणालदण्डं भूयः पुनः यद्दत्वा उज्झ त्यज मदुत्तरदानार्थमिदानीं परित्यज। पूर्वं तावत् मां दयितापहस्ता प्रियासंवाहदानेन मुचौ विरहदुःखात उद्धर। को नाम भवदनुरोधः? यत् मम मतिप्रमेदः स्यादित्यभिप्रेत्याह—परधिक्रिया परश्रितजनोपकारः सतां स्वार्थात् गुरुतरी महती। न स्वार्थमनुसरन्ति साधवः, परन्तु परोपकारव्रतमेव एषां परं साधनमिति भावः। अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः अलङ्कारः। वसन्ततिलकं वृत्तम्।

(६२) यदि हंसेति।—रे हंस! यदि नतभ्रूः सा मे मम प्रिया सरसो रोधसि तीरे ते तव दृक्पथं न गता नयनपथं न पतिता, तदा हे चौर! कथं किम्प्रकारेण मदेन खेलं खलीलं पदं यस्मिन् तत् मदखेलपदं तस्याः सकलं सम्पूर्णं गतं गमनं त्वया गृहीतम्? यदा भवद्गतिः मत्प्रियागत्यनुकारिणी, तदा ध्रुवमेव भवता प्रियतमा मे दृष्टेति भावः। मालभारिणी वृत्तम्।

(६३) मत्प्रियागतिसदृशं तव गमनं दृष्ट्वा त्वया अवश्यमेव सा दृष्टेति मया लिङ्गीयते इत्यर्थः।

(६४) हंसेति।—हंस! प्रयच्छ मे कान्ताम्। "कुत्र ते कान्ता, केन वा

[पुनश्चर्चरी]।—

कइ तुए सिक्खदमेदं गइलालस ! ।
सा तुए दिट्ठा जहणभरालसा ॥ (च) (६५)

[पुनश्चर्चरी। सानुनयं "हंस ! प्रयच्छ" इत्यादि पठित्वा पुनश्चर्चरिकया सावेपं "हंस। प्रयच्छ" इत्यादि पठित्वा द्विपदिकया निष्क्रम्य विष्कम्भ]।

"एष स्तेयानुशासी राजा" इति अतिभयादुत्पतितः। यावदन्यमवकाशमवगाहिष्ये। (६६) [द्विपदिकया परिक्रम्य अवलोक्य च]। अये ! प्रियासहायश्चक्रवाकस्तिष्ठति ; यावदेनं गच्छामि।

[अनन्तरं कुटिलिका]।—मम्मर-रणिअ-मणोहरए

[मन्दघटी]।—कुसुमिअ तरुवर-पल्लविए।

[चर्चरी]।—दइआ-विरहुम्मादइअओ
काणणे भमइ गइंदओ ॥ (क) (६७)

(च) कुव त्वया शिक्षितमेतत् गतिलालस ! ।
सा त्वया दृष्टा जघनभरालसा ॥

(क) मर्मर-रचित मनोहरके कुसुमित-तरुवर-पल्लविते।
दयिता-विरहोन्मादितकः कानने भ्रमति गजेन्द्रकः ॥

अपहृता, नाहं जाने" इति चेत् न क्षमः खलु त्वमेतत्कथनाय ; यतोऽस्या मे कान्ताया गतिस्त्वयापहृता ; अदृष्टस्यानुकरणमसम्भाव्यमेव। एतावद्भूतेः परतरं हि आत्मानं प्रति राजेति ज्ञानविस्फुरणम ; तेनैवमुक्तिः,—हंस। विभावितैकदेशेन अपहृतवस्तुन एकदेशमपि त्वत्कृतमिति विभाव्य पर्याभियोगवता राज्ञसमीपे यत् यदर्थमभियुज्यते तत्त्वया देयं प्रत्यर्पणीयमिति भावः। अनुष्टुब्वृत्तम्।

(६५) पूर्वश्लोकोक्तिमनुवृत्य पुनराह, कुवेति।—ननु वा रे गतिलालस ! यद्गत्यां त्वमीदृक् लालसावान्, तदेतत्त्वया कुव शिक्षितम् ? यतः खलु अर्थितोऽर्थमवश्यमेव देयं ते इति भावः।

(६६) एष स्तेयानुशासीत्यादि।—स्तेयं चौर्यम् अनुशास्ति यः स स्तेयानुशासी, दुष्टस्य शास्ता शिष्टस्य पुरस्कर्ता नरपतिरिति प्रसिद्धः। उत्पतितः उड्डीनः। अन्यमवकाशं प्रियासहस्रनिर्मुक्तासाध्यलाभतरम् अवगाहिष्ये गमिष्यामि, स्थानान्तरमन्विष्यामि इत्यर्थः।

(६७) कुटिलिका नाट्यविशेषः। यदुक्तं—"रागेण रहितं यत्तु चार्द्र-

[दिवसान्तरे चर्चरी] । (६८)—

गोरोअणा-कुंकुमवण्णा चक्का भवह मं ।
महुवासरे कीलंती धण्णिआ ण दिट्ठा तुए ॥ (ख) (६९)

[चर्चरिकया उपसृत्य जानुभ्यां स्थिता]।—

रथाङ्गनामन् ! सत्यस्त्री रथाङ्गश्रोणिबिम्बया ।
अयं त्वां पृच्छति रथी मनोरथशतैर्हृतः ॥ (७०)
अयं "कः कः ?" इत्याह; न किल विदितोऽहमस्य । (७१)

(ख) गोरोचना-कुङ्कुमवर्ण । चक्र ! भव माम् ।
मधुवासरे क्रीडन्ती धन्या न दृष्टा त्वया ॥

मत्तलिकायुतम् । भाषयैव च तन्नाट्य कुटिलीसंज्ञक मतम् ॥" (अङ्गमत्तली-लक्षणन्तु,—"उपेतापसृतौ पादौ वामश्चेद्रेचितः करः । कट्यामन्यसदा त्वङ्गमत्तली तद्वदीरिते ॥" इति) । मर्मरेति ।—मर्मररचितेन शुष्कद्रुमपत्राणां गजेन्द्रपदताडन-जनितमर्मरशब्देन सनीडरके । मन्दघटो नाट्यविशेषः । कुसुमिताः तरवरः पल्लविता यत्र तादृशे ।

(६८) तूर्यगीतवाद्यानां साम्यं लयः । तस्य च वैविध्यमुक्तं यथा,—"द्रुतो मध्यो विलम्बश्च लयः स त्रिविधो मतः" इति ।

(६९) गोरोचनेति ।—गोरोचना माङ्गल्यद्रव्यविशेषः, तथा कुङ्कुमेन च तुल्यो वर्णो यस्य तादृश ! पीतवर्ण ! इत्यर्थः । चक्र ! चक्रवाक ! मधुवासरे वसन्त-दिवसे । धन्या सौभाग्यवती, सुन्दरीति भावः ।

(७०) रथाङ्गेति । —हे रथाङ्गनामन् ! चक्राह्व ! चक्रवाक ! इत्यर्थः, अहं रथाङ्गश्रोणिबिम्बया रथाङ्गवत् रथचक्रवत् आयतमिति यावत्, श्रोणिबिम्बं नितम्बमण्डलं यस्याः (भवता सह नामसाहश्यात् केवलं चक्रीशब्दो मया कृतः, परन्तु रथस्यान्यावोपकरणीभूतं सर्वमेवाङ्गं तस्यामास्ते) तद्वयस्याहं रथी, इदानीन्तु तया सत्यस्त्री हि नीरथ संवृत्त इति भावः । तस्मात्तु तदङ्गसादृश्येन सनीडरथशतैर्हृतः सन् इदं ज्ञात्वा पृच्छति । अनुष्टुप् वृत्तम् ।

(७१) 'अङ्क' इति चक्रवाकस्य कः कः इति रावः प्रसिद्धोऽस्ति ।

सूर्य्याचन्द्रमसौ यस्य मातामहपितामहौ ।
स्वयं हृतः पतिर्ह्याभ्यामुर्व्श्या च भुवा च यः ॥ (७२)

कथं तूष्णीमेवास्ते ! भवतु, उपालभे तावदेनम् । [जानुभ्यां स्खलित्वा]। तदयुक्तं तावत् आत्मानुमानेन वर्त्तितुम् । (७३)

कुतः ?—

सरसि नलिनीपत्रेणापि त्वमावृतविग्रहां
ननु ! सहचरीं दूरे मत्वा विरौषि समुत्सुकः ।
इति च भवतो जायास्नेहात् पृथक्स्थितभीरुता
मयि च विधुरे भावः कोऽयं प्रवृत्ति-पराङ्मुखः ? ॥ (७४)

[उपविश्य]। सर्वथा मदीयानां भाग्यविपर्य्ययाणामयं प्रभावः । यावत् अन्यमवकाशम् अवगाहिष्ये । [द्विपदिकया परिक्रम्य अवलोक्य च]। अये !—

इदं कृष्णहि मां पद्ममन्तःक्वणितषट्पदम् ।
मया दष्टाधरं तस्याः सशीत्कारमिवाननम् ॥ (७५)

---

(७२) सूर्य्येति ।—पुरा किल स्वायम्भुवमनुपुत्रः सूर्य्येनप्रा सुद्युम्नापरनामा इलो नाम राजा मृगयाप्रसङ्गेन हरनिवारितमुपवनमेकाकी परिभ्रमन् स्त्रीभावमालगाम । चन्द्रपुत्रः बुधः तां दृष्ट्वा सन्निहितमाश्रम निनाय । स च तस्यां पुरूरवसं पुत्रमजीजनत् । तेन पुरूरवसः सूर्य्यो मातामहः चन्द्रश्च पितामहः सञ्जातः इति पौराणिकी वार्त्ता । अत्र अलौकिकसम्बन्धवर्णनात् उदात्तालङ्कारः । अनुष्टुप् वृत्तम् ।

(७३) सहचरीविरहे तु तव यादृक् भवति, तदनुमानेन मय्यपि वर्त्तनं ते न्याय्यमिति भावः ।

(७४) पृथक्स्थितिभीरुता पृथगवस्थाने भीरुता, प्रियां विना कथमहमेकाकी वर्त्तिष्ये इति भयम् । हरिणी वृत्तम् ।

(७५) इद कृष्णहीत्यादि ।—अन्तर्मध्ये क्वणिताः शब्दायमानाः षट्पदा यस्य तथाभूतम् इदं पद्म मां कृष्णहि मम गतिप्रतिषेधं करोति इत्यर्थः । कथमिव ? यतः इद पद्मं मया दष्टाधरं सुरतावसरे प्राप्तसहृन्नज्जवम् अत एव सशीत्कारं तस्या

इतो गतस्य अनुशयो मा भूदिति अस्मिन्नपि कमलशये भ्रमरे प्रणयं करिष्ये। (७६)

[अस्य अनन्तरे चर्चरिचतुरस्रकः]। (७७)—

एक्कक्कम-वड्ढिअ-गुरुअर-प्पेम्मरसे।
सरे हंसजुआणओ कीलइ कामरसे॥ (ग) (७८)

[चतुरस्रकेण उपविश्य अञ्जलिं बद्ध्वा]। (७९)—

(ग) एक्कक्कमवड्ढितगुरुतरप्रेमरसः।
सरसि हंसयु-वकः (वा भाव) क्रीडति कामरसे॥

आननमिव; मनोहरं प्रियाया मुखमण्डलं आरयन् सामवैव बध्नातीति भावः। अनुष्टुप् वृत्तम्।

(७६) इतः कमलात् गतस्य सुखस्थानं कमलं परित्यज्य अन्यत्र कुत्रचिद्गामिनो मम अनुशयः कमलपरित्यागजन्यानुतापो मा भूदिति विभाव्य कमलशये कमल-हृदयशायिनि भ्रमरे प्रणयं करिष्ये।

(७७) चर्चरिचतुरस्रकः नाट्यविशेषः, तदुक्तं यथा,—"अस्यैव चेच्चरणयोरन्तरं स्यात् यदङ्गुलम्। वितस्तिमात्रमथवा नन्द्यावर्त्तं तदुच्यते॥" अस्यैव नन्द्यावर्त्त-मित्यपरं नाम।

(७८) कमलासक्तं भ्रमरं प्रणयं करिष्ये इत्युपक्रम्य ततः परं विहरन्तं हंसं वर्णयति—एवम् उन्मादातिशयवशेन भ्रमरमेव हंसवदुद्धा वर्णयति, अथवा हसा-न्योक्त्या स्वात्मानमेव प्रकाशयति, एक्कक्कमेति।—एकक्कमेण मिलनावधि अविच्छेदेन वड्ढितगुरुतरप्रेमरसे; यद्वा—एक्कक्कमवड्ढितगुरुतरप्रेमरसः हंसयुवा कामरसेन मरेण विद्धः नावक्रीडति। कामस्य रसोऽभिनिवेशो यस्मिन् तादृशेन एकक्कमेण युगपद्वर्द्धितः (ष्वधू—छेदने+क्तः) छिन्नः प्रियाविरोगीनेति भावः। गुरुतरप्रेमरसोन्मत्त ईषत् क्रीडामपि न करोति इति निष्कर्षः। अथवा व्यतिरेकदृष्टान्तेन स्वं तिरस्कुर्वन्नाह—कामरसेन युगपद्वर्द्धितप्रेमरसः हंसयुवा क्रीडति मन्दभाग्योऽहं प्रियामवलोकयित-मपि न प्राप्स्यामीति भावः। प्रेमरसे सरे कामरसे इत्यादिषु प्रथमान्ततोयै अव्यवस्थिते "प्राकृते लिङ्गवचनमतन्त्रम्" इति हेमचन्द्रः। "कामवशः" इति पाठे—कामासक्तः।

(७९) चतुरस्रलक्षणं यथा।—"नन्द्यावर्त्तप्रमाणाद्धि भवेदष्टादशाङ्गुलम्। अन्तरं चतुरैः स्थानं चतुरस्रं तदीरितम्॥" इति।

मधुकर ! मदिराक्ष्याः शंस तस्याः प्रवृत्तिं
वरतनुरथ वाऽसौ नैव दृष्टा त्वया मे ।
यदि सुरभिमवाप्तास्तन्मुखोच्छ्वासगन्धं
तव रतिरभविष्यत् पुण्डरीके किमस्मिन् ? ॥ (८०)

[इति द्विपदिकया परिक्रम्य अवलोक्य च]। अये ! करिणी-सहायो नागाधिराजो नीपस्कन्ध-निषण्णस्तिष्ठति ; यावदेनं गच्छामि ।

[कुटिलिका]।—करिणी-विरह संदाविअओ

[मन्दघटी]।—काणणए गंधुद्धअ-महुअरओ। (घ) (८१)

[अतोऽन्तरे विलोक्य]। अथवा न तावदयम् उपसर्पणकालः।—

अयमचिरोद्गत-पल्लवमुपनीतं प्रियतमाग्रहस्तेन ।
अभिलषतु तावदासव-सुरभिरसं गल्लकीभङ्गम् ॥ (८२)

(घ) करिणीविरहसन्तापितकः कानने गन्धोद्भूतमधुकरकः।

---

(८०) मधुकरेत्यादि। —हे मधुकर ! भ्रमर ! मदिराक्ष्या अलसलोचनायाः तस्याः प्रियायाः प्रवृत्तिं वार्त्तां शंस कथय। अथवा असौ मे मम वरतनुः अनवद्याङ्गी प्रियतमा नैव दृष्टा निश्चितमेव सा भवतो दृक्पथं न पतितेति भावः। कुतः ? इत्याह,—यदि सुरभिं शोभनं घ्राणं तन्मुखोच्छ्वासगन्धम् अवाप्ताः तदा किं तव अस्मिन् तुच्छे इत्यर्थः, पुण्डरीके रतिः आसक्तिः अभविष्यत् ? यदा अनेन कमलगन्धेन भवत आकृष्टं चेतस्तदा मन्ये भवता न दृष्टा सा न च आघ्रातमस्याः पद्माधिकसुरभि मुखमण्डलमिति भावः। मालिनी वृत्तम्।

(८१) करिणीति।—करिणीसहायेऽपि गजराजे करिणीविरहसन्तापितकः इत्युक्तिः मत्ततायाश्चर्यमिति श्लेयम्। गन्धेन नीपगन्धेन गल्लकीभङ्गसुरभिरसगन्धेन वा उद्भुताः उल्लसिताः उड्डीनाः मधुकरा यत्र तादृशः, नागाधिराजः तिष्ठतीति शेषः।

(८२) आसवगन्धानुकारि क्षीरविमिश्रं गल्लकीभङ्गम्। गल्लकी गजप्रियइक्षुविशेषः। आर्य्या वृत्तम्।

[स्थानकेन (८३) अवलोक्य]। अये! कृताहारकः संवृत्तः। भवतु, समीपम् अस्य गत्वा पृच्छामि।

[अनन्तरं चक्रवरी]।—

अहं तुमं पुच्छिमि आअक्खहि गअवरु!
ललिअ-प्पहारेण णासिद-तरुवरु!।
दूरविणिज्जिअ-ससहरकंती
दिट्ठा पिआ तुए सम्मुहअंती? ॥ (ङ) (८४)

[पदद्वयं पुरत उपसृत्य]।—

मदकल! युवतिशशिकला गजयूथप! यूथिका-शबल-केशी।
स्थिरयौवना स्थिता ते दूरालोके सुखालोका? ॥ (८५)

(ङ) अहं त्वां पृच्छामि आचक्ष्व गजवर!
ललितप्रहारेण नाशिततरुवर!
दूरविनिर्जितशशधरकान्तिः
दृष्टा प्रिया त्वया सम्मोहयन्ती? ॥

---

(८३) स्थानकेनावलोक्येति।—स्थानकं गमनावस्थानादिषु चेष्टाविशेषः। यदाह भरतः नाट्यशास्त्रे गतिप्रचाराख्ये द्वादशाध्याये,—"स्थानकं तावदेव स्यात् यावच्चेष्टा प्रवर्त्तते" इति।

(८४) अहमिति।—ललितप्रहारेण सलीलाघातेन, क्रीडाच्छलादाघातेनेत्यर्थः। दूरविनिर्जितशशधरकान्तिः चन्द्रसुषमाविजयिनी। सम्मोहयन्ती दर्शनमात्रेणैव प्रेक्षकाणां मोहं जनयन्ती।

(८५) मदकलेत्यादि।—हे मदेन मत्ततोदयेन कलः अव्यक्तनिर्द्रादो यस्य तत्सम्बुद्धौ। हे गजयूथप! करिणां यूथपते! युवतिषु मध्ये शशिकला चन्द्रकलास्वरूपा (एतेन युवतीनां तारकात्वं, तथा शशिकलेति पदेन निष्कलङ्कत्वञ्च सूचितम्)। यूथिकाभिः तदाख्यकुसुमैः शबलाश्चिता: केशा यस्याः सा तथाभूता, तथा स्थिरम् अचञ्चलं यौवनं यस्याः सा स्थिरयौवना, सुखः सुखकरः सुखेन वा आलोको दर्शनं यस्याः सा प्रियदर्शना उर्वशी ते तव दूरालोके स्थिता किम्? दूरादपि भवता किं दृष्टा? इति भावः। आर्य्यां वृत्तम्।

[सहर्षमाकर्ण्य]। अहह! अनेन प्रियोपलब्धिशंसिना मन्द्रकण्ठगर्जितेन समाश्वासितोऽस्मि। साधर्म्यात् भूयसी मे त्वयि प्रीतिः। (८६) कथम्? इति।—

मामाहुः पृथिवीभुजामधिपतिं नागाधिराजो भवान्
अव्युच्छिन्नपृथुप्रवृत्ति भवतो दानं समानं मम।
स्त्रीरत्नेषु ममोर्वशी प्रियतमा यूथे तवेयं वशा
सर्वं मामनु ते प्रियाविरहजां त्वन्तु व्यथां माऽनुभूः॥ (८७)

सुखमास्तां भवान्। [द्विपदिकया परिक्रम्य अवलोक्य च]। अये! अयमसौ सुरभिकन्दरो नाम विशेषरमणीयः सानुमान्, प्रियश्चायमप्सरसाम्, अपि नाम सुतनुरस्य उपत्यकायामुपलभ्येत? [परिक्रम्य अवलोक्य च]। कथमन्धकारः! भवतु, विद्युत्प्रकाशेन अवलोकयामि। कथं मदीयैर्दुरितपरिणामैर्मेघोदयोऽपि शतक्रदाशून्यः संवृत्तः! तथापि शिलोच्चयमिनमधिरुह्य निवर्त्तिष्ये। (८८)

---

(८६) अहहेत्यादि।—साधर्म्यात् सादृश्यात्। भूयसी बहुला।

(८७) मामाहुः पृथिवीभुजामित्यादि।—मां पृथिवीभुजां राज्ञामधिपतिमधीश्वरमाहुः, जना इति शेषः। तथा भवान् नागानामधिराजः। अधीश्वरत्वभावयोः समानमिति भावः। तथा अव्युच्छिन्ना निरवच्छिन्ना पृथ्वी महती प्रवृत्तिः यस्य तत् निरन्तरमेव चरदित्यर्थः, तव दानं मदजलं, पक्षे—दीनेभ्यः अर्थादिवितरणं मम समानम्। स्त्रीरत्नेषु मध्ये उर्वशी मम प्रियतमा, तथा यूथे गजयूथमध्ये इयं वशा करिणी तव प्रियतमा त्वयि अनुरक्ता। "वशा योषासुताबन्ध्यास्त्रीगुर्वीकरिणीष्वपि" इति कोषः। अत एव ते तव सर्वं मामनु मम सदृशम्। तु किन्तु त्वं प्रियाविरहजां वनितावियोगजनितां व्यथां मा अनुभूः। शार्दूलविक्रीडितं वृत्तम्।

(८८) कथमन्धकार इत्यादि।—दुरितानां दुष्कृतीनां परिणामैः परिपाकैः। शतक्रदया विद्युल्लेखया शून्यः दर्शनोपयोगिविद्युदालोकविरहित इत्यर्थः।

[अनन्तरे खण्डिका]। (८९)—

खरखुर-दारिअ मेइणिओ वणगहणे अविअण्ण ।
परिसप्पइ पेच्छह लीणो णिअकज्जुज्जुअ कोल्लु ॥ (च) (९०)

अपि वनान्तरमल्पभुजान्तरा
श्रयति पर्वत ! पर्वसु सन्नता ।
इयमनङ्गपरिग्रहमङ्गला
पृथुनितम्ब ! नितम्बवती तव ? ॥ (९१)

कथं तूष्णीमेवास्ते ! भद्रे, विप्रकर्षात् न शृणोति । भवतु, समीपमस्य गत्वा पृच्छामि । (९२)

[अनन्तरे चर्चरी]।—

स्फटिअ-सिलादल-णिम्मल-णिज्झरु !
बहुविअकुसुमे विरइअ-सेअरु !

(च) खरखुरदारितमेदिनीको वनगहनेऽविचलः ।
परिसर्पति पश्यत लीनो निजकार्योद्युक्तः कोलः ॥

---

(८९) खण्डिका गीतिविशेषः । यदुक्तं,—"पर्य्यायेण श्रनैस्तिर्य्यङ्नतमुक्तं धृतं शिरः । श्रीरागकम्पतालेन निबद्धा खण्डिका मता ॥" यथा—गद्यभेदः खण्डिका, यदाह भरतः,—"खण्डी गणेशदैवत्या सात्वतीं वृत्तिमाश्रिता । सेता [illegible] वैदर्भीभक्तिसम्भवा ॥" इति ।

(९०) खरखुर-दारितेत्यादि ।—अत्र वराहरूपेण राज्ञो वर्णनम् । पक्षान्तरे—धीरः महारण्ये क्रीडार्थम् अन्तरितः प्रियतमाऽन्वेषणार्थं भ्रमति । प्रबल-तरविरहकातरो हि इतस्ततः भूम्यास्फालनञ्च करोतीति भावः । पश्यतेति तस्मादवधादाकाशवचनम् ।

(९१) अपि वनान्तरमित्यादि ।—हे पृथुनितम्ब ! पर्वत ! अल्पं नातिप्रभूतं सुजघनोरुत्वं वपुःस्थलं यस्याः सजघनोरुतिपृथुत्वादित्यर्थः । पर्वसु सन्धिस्थलेषु सन्नता, तथा अनङ्गस्य कन्दर्पस्य परिग्रहः पत्नी तद्वत् मङ्गला सुखदायिनी, नितम्बवती पृथुनितम्बोपेता सा उर्वशी भवती वनान्तरम्, अपि प्रश्ने, श्रयति ? श्रयति किम् ? । द्रुतविलम्बितं वृत्तम् ।

(९२) कथं तूष्णीमित्यादि ।—विप्रकर्षात् दूरत्वात् ।

किसर-मधुरुग्गीअ-मणोहरु !
देक्खाबहि मइ प्पिअदम महिअरु ! ॥ (छ) (९३)

[चर्चरिकया उपसृत्य अञ्जलिं बद्ध्वा]।—

सर्वचित्तिभृतां नाथ ! दृष्टा सर्वाङ्गसुन्दरी।
रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया ? ॥ (९४)

[तथैव प्रतिशब्दं शृणोति]।

[आकर्ण्य सहर्षम्]। कथं ! यथाक्रमं दृष्टेत्याह ! भवतु, अवलोकयामि। [दिशोऽवलोक्य सखेदम्]। कथं ममैवायं कन्दरान्तरविसर्पी प्रतिशब्दः ! । (९५)

[इति मूर्च्छति]।

[उत्थाय उपविश्य सविषादम्]। अहह ! श्रान्तोऽस्मि ; यावदस्या गिरिनद्यास्तीरे तरङ्गवातमासेविष्ये। [द्विपदिकया परिक्रम्य अवलोक्य च]। इमां नवाम्बुकलुषां स्रोतोवहां पश्यता मया रतिरुपलभ्यते। कुतः ?—

(छ) स्फटिक-शिलातल-निर्मलनिर्झर !
वैदूर्यविधकुसुमैर्विरचितशेखर ! ।
किन्नर-मधुरोद्गीत-मनोहर।
दर्शय मम प्रियतमां महीधर ! ॥

---

(९३) स्फटिकेति।—स्फटिकशिलातलवत् निर्मलः स्वच्छः शुभश्च निर्झरः प्रस्रवणं, प्रस्रवणोदकमिति भावः, यस्य सः तत्सम्बुद्धौ। किन्नराणां मधुरोद्गीतेन मनोहरः तत्सम्बुद्धौ। महीधर ! पर्वत ! । पज्झटिका वृत्तम्। तल्लक्षणं यथा,—"प्रतिपद-यमकित-षोडशमात्रा। नवमगुरुत्व-विभूषित-गात्रा ॥" इत्यादि।

(९४) प्रस्रवाक्यस्यैव उत्तरतया योजितत्वात् विगतनामकं वीथ्यङ्गम्। यथा दर्पणे,—"विगतं स्यादनेकार्थयोजनं श्रुतिसाम्यतः" इति।

(९५) कथं ममैवायमित्यादि।—कन्दरायाः गुहायाः अन्तरे विसर्पति गच्छति यः स कन्दरान्तरविसर्पी।

तरङ्गभ्रूभङ्गा क्षुभित-विहगश्रेणि रसना
विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम् ।
यथा जिह्मं याति स्खलितमभिसन्धाय बहुशो
नदीभावविनेयं ध्रुवमसहमाना परिणता ॥ (९६)
भवतु, प्रसादयामि तावदेनाम् ।

[अनन्तरं कुटिलिका]।—

पसिअ पिअदमए ! सुंदरिए ! णए ।
खुहिअ-करुण-विहंगमए ! णए ।
सुरसरितीर-समूसुअ-एणए !
अलिउल-झंकारिए ! एणए ॥ (ज) (९७)

[तेन कुटिलिकान्तरे चर्चरी]।—

पुव्वदिसा-पवणाहअ-कल्लोलुग्गअ-बाहुओ
मेहअंगी णच्चइ सललिदं जलणिहि-णाहओ ।

(ज) प्रसीद प्रियतमे । सुन्दरिके ! नदि ! क्षुभित-करुणविहङ्गमके । नत्या ।
सुरसरित्तीर-समुत्सुकैणके । अलिकुल-झङ्कारिते ! एनया ॥

---

(९६) तरङ्गभ्रूभङ्गेत्यादि ।—तरङ्ग एव भ्रूभङ्गो यस्याः सा, क्षुभितविहगश्रेणय एव रसना काञ्ची यस्याः सा, तथा संरम्भेण सम्भ्रमेण शिथिलं स्खलितबन्धनं वसनमिव फेनं विकर्षन्ती इयं नदी बहुशः स्खलितं यथा स्यात् तथा अभिसन्धाय मधुरास्फुटं किमपि किमपि व्याहृत्य जिह्मं वक्रं सलीलं यथा याति तथा ध्रुवं निश्चितमेव असहमाना क्रोपना सा उर्वशी नदीभावेन परिणता नदीत्वं प्राप्ता इति तर्कयामि । अत्र रूपकानुप्राणितोत्प्रेक्षालङ्कारः । शिखरिणी वृत्तम् ।

(९७) उन्मादावहतचित्तवृत्तिः राजर्षिः प्रियतमां नदीरूपेण परिणतामवधार्य्य पादपतनादिना तत्प्रसादनातत्परः चाटुं करोति, प्रसीद प्रियतमे ! इत्यादि ।—हे प्रियतमे ! सुन्दरिके नदि ! नदीभावापन्ने उर्वशि ! एनया नत्या अनेन पादपतनेन प्रसीद, मयि प्रसन्ना सती जलरूपं विहाय स्वरूपतो मत्समीपमागच्छ इत्यर्थः ।

हंस-रहंग संख कुंकुम किआभरणु
करि-मअराउल-कमल-किआवरणु ।
वेला-सलिलुल्लेल्लिअ-हत्थदिसु-तालु
ओत्थरइ दसदिसो रुंधेइ णवमेह-आलु ॥ (झ) (९८)

[चर्चरिकया उपसृत्य जानुभ्यां स्थित्वा] ।—

त्वयि निबद्धरतौ प्रियवादिनि
प्रणयभङ्ग-पराङ्मुखं चेतसि ।
कमपराधलवं मयि पश्यसि ?
त्यजसि मानिनि ! दासजनं यतः ॥ (९९)

(झ) पूर्वदिक्पवनाहत-कल्लोलोद्धत-बाहुको
मेघाङ्कैर्नृत्यति सललितं जलनिधिनाथकः ।
हंस-रथाङ्ग-गङ्ग-कुङ्कुमकृताभरणः
करिमकराकुल-कृष्णकमल-कृतावरणः ।
वेला-सलिलोल्लिखित-हसदत्ततालः
नवमेघकालो नवजलधरसमयः दश दिशो रुद्ध्वा नवसृणाति दशदिग्रो रुद्ध्वा नवमेघकालः ॥

---

(९८) पूर्वदिगित्यादि ।—पूर्वदिक्पवनेन पूर्वदिगुत्थितेन वायुना आहतः कल्लोल एव उद्धतः बाहुः करो यस्य स एवम्भूतः जलनिधिनाथकः मेघाङ्कैः सह नृत्यति । जलनिधिनाथः किम्भूतः ? इत्याह, हंसेत्यादि ।—हंसादिभिः कृतम् आभरणं येन सः ; करिभिर्हस्तिभिर्मकरैश्च आकुलेन व्याप्तेन कृष्णकमलेन कृष्णजलेन कृतम् आवरणं यस्य सः करिमकराकुलकृष्णकमलकृतावरणः । वेलासलिलानां वेलासमीपवर्त्तिजलानां यत् उल्लिखितम् उल्लुण्ठनं तदेव हसदत्तः तालः यस्य सः । नवमेघकालो नवजलधरसमयः दश दिशो रुद्ध्वा आवृणोति आच्छादयति ।

(९९) त्वयीति ।—त्वयि निबद्धरतौ त्वय्येव गाढ़ानुरक्ते प्रियवादिनि कदापि परुषभाषणमकुर्वति प्रणयभङ्गपराङ्मुखचेतसि प्रकृतनायकवत् कदापि नायिकान्तरासक्त्यादिना प्रणयच्छेदमकुर्वति मयि कम् अपराधलवं दोषलेशमपि पश्यसि ? हे मानिनि ! यतो यस्मात् कारणात् दासजनं त्यजसि । द्रुत-विलम्बितं वृत्तम् ।

कथं तूष्णीमेव आस्ते ! अथवा परमार्थतः सरिदियं, न उर्वशी ; अन्यथा कथं पुरूरवसम् अपहाय समुद्राभिसारिणी भवेत् ? अनिर्वेदप्राप्याणि श्रेयांसि । भवतु, तमेव उद्देशं गच्छामि, यत्र मे नयनयोः सा सुनयना तिरोहिता । [परिक्रम्य अवलोक्य च]। इमं तावत् प्रियाप्रवृत्तये सारङ्गमासीनम् अभ्यर्थये । (१००)—

अभिनव कुसुम-स्तवकित-तरुवरस्य परिसरे
मदकल-कोकिल कूजित-मधुप-झङ्कार मनोहरे ।
नन्दनविपिने निजकरिणी विरहानलेन सन्तप्तो
विचरति गजाधिपतिरैरावतनामा ॥ (१०१)

[गलितकः । (१०२) जानुभ्यां स्थित्वा]।—

लक्ष्यसारङ्गविर्योऽयं दृश्यते काननश्रिया ।
नवमस्यावलोकाय कटाक्ष इव पातितः ॥ (१०२)

[विलोक्य]।—

अयमन्तिकमायान्तीं शिशुना स्तनपायिना ।
अनन्यदृष्टिस्तामेव मृगीं कक्षां निरीक्षते ॥ (१०४)

---

(१००) कथं तूष्णीमेवास्ते इत्यादि ।—परमार्थतः यावाप्यंतः । अनिर्वेद-प्राप्याणि अनिर्विण्णैः अखिन्नैरेव प्राप्याणि, मया प्रियान्वेषणे खिन्नेन न भवितव्यं, भवतु, पुनरपि तदन्वेषणतत्परो भवामि इत्यर्थः । सारङ्गं मृगम् । अभ्यर्थये याचे, पृच्छामीत्यर्थः ।

(१०१) अभिनवेति ।—परिसरे प्रान्तदेशे । मदकलाभ्यां मदेनाव्यक्तमधुराभ्यां कोकिलकूजितमधुपझङ्काराभ्यां कोकिलालापभ्रमरगुञ्जनाभ्यां मनोहरे ।

(१०२) गलितकः गाथाविशेषः ।

(१०३) लक्ष्यसारेति ।—लक्ष्यसारी मृगविशेषः । कटाक्षपक्षे—लक्ष्यः लक्ष्यवर्णः सारः स्थिरांशः कनीनिका यस्मिन् सः । अनुष्टुप् छन्दः ।

(१०४) अयमिति ।—अयं सारङ्गः, स्तनपायिना शिशुना सह अन्तिकां

[चकंरी]।—

सुरसुंदरी जहणभरालस पीणुत्तुंग-घणत्थणी
थिरजोव्वण-तणुसरीरि हंसगइ ।
गयणुज्जल-काणणे मिअलोअणि व्भमंते
दिट्ठु तुए ? तहविरह-समुद्दंतरे उत्तरहि मं ॥ (ञ) (१०५)

[उपसृत्य अञ्जलिं बद्ध्वा]। हंहो हरिणीपते !—

अपि दृष्टवानसि मम प्रियां वने ?
कथयामि ते तदुपलक्षणं शृणु ।
पृथुलोचना सहचरी यथैव ते
सुभगा तथैव खलु साऽपि वोच्यते ॥ (१०६)

[विलोक्य]। कथमनादृत्य मद्वचनं कलत्राभिमुखं स्थितः ! सर्वथा उपपद्यते परिभवास्पदं विधिविपर्य्ययः। यावदन्य-

---

(अ) सुरसुन्दरी जघनभरालसा पीनोत्तुङ्गघनस्तनी
स्थिरयौवना तनुशरीरा हंसगतिः ।
गगनोज्ज्वलकानने मृगलोचना भ्रमन्ती
दृष्टा त्वया ? तद्विरहसमुद्रान्तरादुत्तारय माम् ॥

समीपमायान्तीं. कृष्णाम् आगमनावसरे व्याधेन बद्धामित्यर्थः, तामेव मृगीम् अनन्य-दृष्टिः नास्ति अन्यस्मिन् विषये दृष्टिः यस्य तथाभूतः सन् अत्रैव कुत्रापि दृष्टिमदत्त्वा इत्यर्थः, निरीक्षते । अनुष्टुप् छन्दः ।

(१०५) स्थिरयौवनात्वे सुरसुन्दरीत्वं हेतुः । एतादृशविशेषोपलक्षिता मत्प्रिया वने भ्रमन्ती यदि त्वया दृष्टा तर्हि मां विरहपारावारात् समुत्तारयेत्यर्थः, तत्कथनेनेति शेषः । कानने गगनोज्ज्वलत्व महत्त्वनीलत्वाद्यतिशयसाधर्म्यात् । 'भ्रमंते' इत्यस्य 'भ्रमता' इति वा संस्कृतम् ; भ्रमता त्वयेत्यर्थः । 'तह' इत्यस्य 'तथा' इति वा संस्कृतम् ; तथा दृष्टा चेदित्यर्थः ।

(१०६) अपि प्रश्ने । तदुपलक्षणं तस्याः चिह्नम् । पृथुलोचना आकर्णविस्तृत-नेत्रा । सुभगा प्रियदर्शना । मञ्जुभाषिणी इत्यर्थः ।

मवकाशमवगाहिष्ये । (१०७) [परिक्रम्य चतुर्दिक्षु च]। हन्त !
दृष्टमुपलक्षणं तस्या मार्गस्य ।—

रक्तकदम्बः सोऽयं प्रियया घर्मान्तशंसि यस्येदम् ।
कुसुममसमग्रकेशर-विषममपि क्षतं शिखाभरणम् ॥
(१०८)

[परिक्रम्यावलोक्य च]। तत् किं नु खलु शिलाभेदगतं नितान्तरक्तमिदमवलोक्यते ! । (१०९)—

प्रभालेपो नायं हरिहत-गजस्यामिषलवः
स्फुलिङ्गः स्यादग्नेर्गलनमभिवृष्टं पुनरिदम् ।
अये ! रक्ताशोकस्तवक समरागो मणिरयं !
यमुद्धर्तुं पूषा व्यवसित इवालम्बितकरः ॥ (११०)

---

(१०७) कथमनादृत्य मद्वचनमित्यादि ।—विधेर्भाग्यस्य विपर्ययः वैपरीत्यं परिभवस्य चास्पदं स्थानम् । अन्यमवकाशमवगाहिष्ये प्रियाप्रवृत्तिलाभार्थं स्थानान्तरं गमिष्यामीत्यर्थः ।

(१०८) रक्तेति ।—सोऽयं रक्तकदम्बः रक्तानि कदम्बानि तन्नामककुसुमानि यस्य सः रक्तकदम्बाख्यवृक्ष इत्यर्थः, यस्य इदं घर्मस्य ग्रीष्मस्य अन्तं ग्रसति सूचयतीति तत् वर्षाकालागमनसूचकम् असमग्रकेशरविषममपि असम्यक् प्रस्फुटितमपि कुसुमं प्रियया शिखाभरण केशपाशालङ्करणं कृतम् । आर्या वृत्तम् ।

(१०९) तत् किं नु खलु शिलाभेदगतमित्यादि ।—शिलाया भेदः भग्नांशः, तद्गतं तत्स्थितं, भग्नशिलाखण्डद्वयान्तर्वर्त्तिरक्तमृगतम् इत्यर्थः ।

(११०) प्रभालेपोत्यादि ।—प्रभया तेजसा लिम्पति व्याप्नोतीति प्रभालेपो प्रभाप्लुतपरिव्याप्त इत्यर्थः, अयं हरिणा सिंहेन हतस्य गजस्य प्राणिषलवो मांसखण्डो न ; अग्नेः स्फुलिङ्गः स्यात् ? अग्निस्फुलिङ्गः किमिति प्रश्न इत्यर्थः । इदं गलनं पुनः वनन्तु अभिवृष्टं सद्यो वृष्टिधारासिक्तम्, अत एवायं वह्निस्फुलिङ्गोऽपि न इत्यर्थः, वह्निस्फुलिङ्गत्वे वृष्टिधारया निर्वापितत्वप्रसङ्गादिति भावः । (विशेषतो निरूप्य) अये ! आश्चर्यमित्यर्थः, अयं रक्ताशोकस्तवकेन रक्ताशोककुसुमगुच्छेन समो रागो यस्य सः तथाभूतः कश्चित् मणिः ! यं मणिमुद्धर्तुं भूमितो ग्रहीतुं पूषा सूर्यः

भवतु, आदास्ये तावत् । [पटं नाटयति]।—

प्पणइणि-बद्धासाइअओ
बाहाउल-णिअ-णअणओ ।
गअवइ गहणे दुहिअओ
परिब्भमइ किलामिअ-वअणओ ॥ (ट) (१११)

[द्विपदिकया उपसृत्य गृहीत्वा आत्मगतम्]।—

मन्दारपुष्पैरधिवासितायां
यस्याः शिखायामयमर्पणीयः ।
सैव प्रिया सम्प्रति दुर्लभा मे
मैवैनमश्रूपहतं करोमि ॥ (११२)

[इति उत्सृजति]।

[नेपथ्ये]। वत्स ! गृह्यतां वत्स ! गृह्यताम् ।—

सङ्क्रमनीयो मणिरिह शैलसुता-चरण-रागयोनिरयम् ।
आवहति धार्यमाणः सङ्क्रममाशु प्रियजनेन ॥ (११३)

(ट) प्रणयिनी-बद्धाशार्दितको बाष्पाकुलनिजनयनकः ।
गजपतिर्गहने दुःखितकः परिभ्रमति क्लान्त-वदनकः ॥

आलम्बितकरः सन् व्यवसितः इव कृतोद्योग इव, गहणाय कृतप्रयत्न इव इत्यर्थः । मणेरस्य सौरकरराशिवेष्टितत्वात् तद्ग्रहणाय सूर्यः प्रसारितकर इवेत्युत्प्रेक्षा । शिखरिणी वृत्तम् ।

(१११) प्रणयिनीबद्धेत्यादि ।—प्रणयिन्यां प्रियतमायां बद्धा लग्ना या आशा तया अर्दितः पीडितः । क्लान्तवदनकः मलिनमुख इत्यर्थः ।

(११२) मन्दारेति ।—अधिवासितायां सुगन्धीकृतायाम् । अश्रूपहतं नेत्रोदकसम्पर्केण कलुषितम् । मे इत्यत्र सम्बन्धविवक्षायां षष्ठी । इन्द्रवज्रा वृत्तम् ।

(११३) सङ्क्रमनीय इति ।—इह, इष्ट इति शेषः, अयं शैलसुताचरणराग-योनिः गौरीपादपद्मरागसम्भूतः सङ्क्रमनीयसदाख्यः मणिः धार्यमाणः अङ्गेषु परिधीयमानश्चेत् आशु शीघ्रं प्रियजनेन सङ्क्रमं मेलनम् आवहति जनयति । आर्या वृत्तम् ।

राजा। [ऊर्ध्वमवलोक्य]। को माम् अनुशास्ति? [विलोक्य]। कथं भगवान् सुगराजधारी! भगवन्! अनुगृहीतोऽहम् अमुना उपदेशेन। [सविषादम्]। हंहो सङ्गममणे!—

तया विमुक्तस्य निमग्नमध्यया
भविष्यसि त्वं यदि सङ्गमाय मे।
ततः करिष्यामि भवन्तमात्मनः
शिखामणिं बालमिवेन्दुमाखरः॥ (११४)

[परिक्रम्य अवलोक्य च]। तत् किं खलु कुसुमरहितामपि लतामिमां पश्यता मया रतिरुपलभ्यते? अथवा स्थाने मम मना रमते; इयं हि।—

तन्वी मेघजलार्द्र-पल्लवतया धौताधरेवाश्रुभिः
शून्यवाभरणैः स्वकाल-विरहादिस्वान्त-पुष्पाङ्गमा।
चिन्तामौनमिवाश्रिता मधुलिहां शब्दैर्विना लक्ष्यते
चण्डो मामवधूय पादपतितं याता प्रकुप्येव सा॥ (११५)

यावदस्यां प्रियानुकारिण्यां लतायां परिष्वङ्गप्रणयी भवामि।—

लए! प्येक्ख विसंहिअए भवामि
जइ विंहजाए पुणु तंहिं पाविमि।

---

(११४) तयेति।—निमग्नमध्यया आतमूलतया अन्तःप्रविष्टमाद्यमध्यदेशया, तदुमध्यया इत्यर्थः। ईश्वरः शिवः, बालम् इन्दुं चन्द्रकलामिव। वत्स्यसि स्थितं भवम्।

(११५) तन्वीति।—तन्वी चीना तथा मेघजलार्द्रपल्लवतया अश्रुभिर्धौताधरेव। स्वकालविरहात् वसन्तसमयाभावात् विस्रान्तौ विरतः पुष्पाङ्गभो यस्याः सा, अत एव भाभरणैः शून्यवं। तथा मधुलिहां भ्रमराणां शब्दैर्विना भ्रमरगुञ्जितामावात् चिन्तामौनम् आश्रिता तूष्णीं स्थिता इव, अत एव प्रकुप्य पादपतितं नाम अवधूय अनादृत्य याता प्रस्थिता चण्डी कोपना। "चण्डी तु पार्वत्यां हिंस्रकोपनयोस्त्रिषु;" इति कोषः) सा स्वयंभो इव लक्ष्यते। प्रार्दूलविक्रीडितं वृत्तम्।

ता रक्खे वि ण करेमि णिब्भंतिं
पुणु णइ मेल्लइ ताह कयंतों ॥ (ठ) (११६)

[इति चर्चरिकया उपसृत्य लतामालिङ्गति। ततस्तदीयस्थानमाक्रम्यैव प्रविष्टा उर्वशी]।

राजा। [निमीलिताक्षः स्वगतं नाटयित्वा]। अये! उर्वशीगात्र-स्पर्शादिव निर्वृतं मे हृदयम्! न पुनरस्ति विश्वासः। कुतः?—

समर्थये यत् प्रथमं प्रियां प्रति
क्षणेन तन्मे परिवर्त्ततेऽन्यथा।
अतो विनिद्रे मम विलोचने
करोमि न स्वर्ग-विभावित-प्रियः ॥ (११७)

[अनेकमीक्ष्य चकितः]। कथं! सत्यमेव उर्वशी!

[इति मूर्च्छितः पतति]।

(ठ) लते। प्रेक्षस्व विप्रहृदयो भवामि
यदि विधियोगेन पुनस्तां प्राप्नोमि।
तदाऽरण्येऽपि न करोमि निर्भ्रान्तिं
पुनर्न हि प्रवेशयामि तां कृतान्ताम ॥

---

(११६) लतां प्रत्याह. लते प्येक्खेति।—हे लते। प्रेक्षस्व अवलोकय, त्वमिति शेषः। अहं विप्रहृदयः व्यथितान्तःकरणो भवामि, विधेः दैवस्य योगः घटनं तेन यदि चेत् तां प्रियां पुनर्भूयः प्राप्नोमि प्राप्स्यामीत्यर्थः, तर्हि अरण्ये वने निर्भ्रान्तिं भ्रमणमपि न करोमि न करिष्यामीत्यर्थः। तथा कृतः अन्तो समाप्तो यस्यास्तां कृतान्तां मम कृतान्तरूपिणीमित्यर्थः, यद्वा—कृतोऽन्तोऽर्थान् सुखस्य यया तां स्वविरहेण पीडादायिनीमिति भावः, तामुर्वशीं, पुनरभिप्रेतारण्ये न प्रवेशयामि इत्यर्थः।

(११७) समर्थये इति।—यत् किञ्चित वस्तु प्रथममादौ प्रियां प्रति समर्थये प्रियापरिग्रापकमिति कृत्वा निश्चिनोमि, तत् तद्वस्तु क्षणेन नातिचिरमेव अन्यथा अन्यरूपेण परिवर्त्तते. अन्यमानेनैव तदन्यवस्तुरूपेण प्रतिभासते इत्यर्थः, अतोऽस्मात् कारणात् अर्थेन विभाविता अनुमिता प्रिया येन एवम्भूतोऽहं विशोचने नयने

उर्व। समस्ससदु समस्ससदु महाराओ। (ङ)

राजा। [संज्ञां लब्ध्वा]। प्रिये! अद्य जीवितम्।—

त्वद्वियोगभवे चण्डि! मया तमसि मज्जता।
दिष्ट्या प्रत्युपलब्धाऽसि चेतनेव गतासुना॥ (११८)

उर्व। मरिसदु महाराओ, जं मए कोवबसं गदाए अवत्थंतरं प्पाविदो महाराओ। (ढ)

राजा। नाहं प्रसादयितव्यस्त्वया, त्वद्दर्शनेन प्रसन्नो मे सर्वाङ्गान्तरात्मा। तत् कथय, कथमियन्तं कालं मया विरहिता स्थिताऽसि?।

[अनन्तरं चर्चरी]।—

मोरा-परहुअ-हंस-रहंगं
अलि-गअ-पव्वअ-सरिअ-कुरंगं।
तुज्झह कारण-रण्ण भमंत
को ण हु पुच्छिअ मए रोअंते!॥ (ण) (११९)

(ङ) समाश्वसितु समाश्वसितु महाराजः।

(ढ) मर्षयतु महाराजः, यत् मया कोपवशं गतया अवस्थान्तरं प्रापितो महाराजः।

(ण) मयूर-परभृत-हंस-रथाङ्ग-
मलि-गज-पर्वत-सरित्-कुरङ्गम्।
तव कारणादरण्ये भ्रमता
को न खलु पृष्टो मया रुदता॥

सहसा शीघ्रं विनिद्रे उन्मीलिते न करोमि, निमीलितनेत्र एव स्वर्गसुखमनुभवामि इत्यर्थः, नयने उन्मीलिते अन्यवस्तुदर्शनमियेति भावः। वंशस्थविलं वृत्तम्।

(११८) त्वद्वियोगेति।—चण्डि! कोपने! त्वद्वियोगभवे तव विरहजनिते तमसि मोहे निमज्जता, मोहाहतेन इत्यर्थः, मया दिष्ट्या भाग्येन गतासुना मृतेन चेतना इव चैतन्यं जीवितमिवेति भावः, प्रत्युपलब्धाऽसि प्राप्ताऽसि। अनुष्टुप् वृत्तम्।

(११९) मयूरेति।—परभृतः कोकिलः। रथाङ्गं चक्रवाकः। तव कारणात्

उवं। एव्वं अंतक्करण-पच्चक्खीकिद वुत्तंतो महाराओ। (त)

राजा। प्रिये! अन्तःकरणमिति न खलु अवगच्छामि।

उवं। सुणादु महाराओ—पुरा भअवदा महासेणेण सास्सदं कुमारव्वदं गेण्हिअ अअं सअलकलुसो णाम गंध-मादणक्कच्छा अज्झासिदो, किदा अ त्थिदी। (थ) (१२०)

राजा। कीदृशी?।

उवं। "जा किल इत्थिआ इमं पदेसं आगमिस्सदि सा लदाभाए परिणदरूआ भविस्सदि। गोरीचरण-रागसंभवं मणिं वज्जिअ अ लदाभावं ण मुंचिस्सदि" त्ति। तदो अहं गुरुसाव-संमूढहिअआ विसुमरिद-देवदा-णिअमा कञ्चणाजण-परिहरणीअं कुमारवणं पविट्ठा; पवेसाणंतरं अ काणणोवंतवत्तिणा लदाभाएण परिणदं मे रूअं। (द)

राजा। प्रिये! सर्वमुपपन्नम्।—

(त) एवमन्तःकरण-प्रत्यक्षीकृतवृत्तान्तो महाराजः।

(थ) श्रूयात् महाराजः,—पुरा भगवता महासेनेन शाश्वतं कुमारव्रतं गृहीत्वा अयं सकलकलुषो नाम गन्धमादनकक्षोऽध्यासितः, कृता च स्थितिः।

(द) "या किल स्त्री इमं प्रदेशमागमिष्यति सा लताभावे परिणतरूपा भविष्यति। गौरीचरणरागसम्भवं मणिं वर्जयित्वा च लताभाव न मोक्ष्यति" इति। ततोऽहं गुरुशापसम्मूढहृदया विस्मृतदेवतानियमा काञ्चनाजनपरिहरणीयं कुमारवनं प्रविष्टा; प्रवेशानन्तरञ्च काननोपान्तवर्त्तिना लताभावेन परिणतं मे रूपम्।

त्वदन्वेषणार्थम् अरण्ये भ्रमता रुदता च मया को न पृष्टः को न जिज्ञासितः, अपि तु एतान् सर्वानेव अहं लब्धार्तिमप्राक्षमित्यर्थः।

(१२०) सुणादु महाराओ इत्यादि।—महासेनेन कार्त्तिकेयेन, शाश्वतं कुमारव्रतं गृहीत्वा चिरकौमार्य्यमवलम्ब्य इत्यर्थः। सकलकलुषः पापविनाशनः। गन्धमादनस्य तदाख्यपर्वतस्य कक्षः प्रान्तदेशः। कृता च स्थितिः अवश्य नियमः कृत इत्यर्थः।

रतिखेदसुप्तमपि मां शयने या मन्यसे प्रवासगतम् ।
सा त्वमिहैतदवस्थं कथं सहेथाश्चिरवियोगम् ? ॥ (१२१)

इदञ्चैतत् यथा-कथितं सङ्गमनिमित्तं पुनरुपलब्धप्रभाव-मस्माभिः । [इति मणिं दर्शयति]।

उर्व। कधं ! अम्हो ! संगमणीओ अयं मणी ! अदो ज्जेव महाराएण आलिंगिदो ज्जेव पइदित्थम्हि संवुत्ता ! । (ध)

राजा। [ललाटे मणिं सन्निवेश्य]।—

स्फुरता विच्छुरितमिदं रागेण मणेर्ललाट-निहितस्य।
श्रियमुद्वहति मुखं ते बालातप-रक्तकमलस्य ॥ (१२२)

उर्व। पिअंवद ! महंतो क्ख कालो अम्हाणं पइट्ठाणदो णिग्गदाणं, कदाइ असूइस्संति पइदीओ अम्हाणं । (१२३) ता एहि गच्छम्ह । (न)

राजा। यदाह भवती। [इति उत्थितः]।

(ध) कथम् । आश्चर्यम् । सङ्गमनीयोऽयं मणिः ! अत एव महाराजेन आलिङ्गितैव प्रकृतिस्थाऽस्मि संवृत्ता !।

(न) प्रियंवद । महान् खलु कालः आवयोः प्रतिष्ठानात् निर्गतयोः, कदाचित् असूयिष्यन्ति प्रकृतय आवाभ्याम् । तदेहि गच्छावः ।

---

(१२१) रतिखेदेत्यादि ।—या त्वं शयने शय्यायां रतिखेदात् सुरतक्रीडा-जनितपरिश्रमात् सुप्तमपि निद्रितमपि मां प्रवासगतं विदेशगत मन्यसे, या त्वं निद्रावस्थायां त्वदालिङ्गनपाशादपसृतस्य परावृत्य शयानस्यापि मे विरह-दुःखमनुभवसि इत्यर्थः, सा त्वम् इदानीम् विजने वने एतदवस्थं चिरवियोगं कथं सहेथाः ? । आर्या वृत्तम् ।

(१२२) स्फुरतेति ।—स्फुरता दीप्यमानेन । विच्छुरितं रञ्जितम् । बालेति । —बालातपेन नवोदितसूर्यकिरणेन रक्तस्य अरुणवर्णस्य कमलस्य पद्मस्य । आर्या वृत्तम् ।

(१२३) प्रियंवदेत्यादि ।—प्रतिष्ठानान्निर्गतयोः तदाख्यराजधानीतः प्रस्थितयोः । प्रकृतयः प्रजाः असूयिष्यन्ति क्रुद्धाः भविष्यन्ति ।

उर्व० । अध कधं उण महाराओ गंतुं इच्छदि ? । (प)

राजा । अचिरप्रभा-विलसितैः पताकिना
सुरकार्मुकाभिनव-चित्र-शोभिना ।
गमितेन खेलगमने ! विमानतां
नय मां नवेन वसतिं पयोमुचा ॥ (१२४)
प्राविश्य-सहचरि-संगओ पुलअ-पसाहिअ-अंगओ ।
सेच्छा-पत्त-विमाणओ विहरइ हंस-जुआणओ ॥ (फ) (१२५)

[इति खण्डधारया निष्क्रान्तौ] ।

चतुर्थोऽङ्कः समाप्तः ।

अथ पञ्चमोऽङ्कः ।

[ततः प्रविशति हृष्टो (१) विदूषकः] ।

विदू । हो हो ! भो ! भो ! दिट्ठिआ चिरस्स कालस्स उव्वसी-

(प) अथ कथं पुनर्महाराजो गन्तुमिच्छति ? ।

(फ) प्राप्त-सहचरी-सङ्गः पुलकप्रसाधिताङ्गकः ।
स्वेच्छा-प्राप्तविमानको विहरति हंसयुवकः ॥

---

(१२४) अचिरेति ।—हे खेलगमने ! लीलाविलासान्वितगमने ! उर्वशि ! अचिरप्रभाणां विद्युतां विलसितैः दीप्तिभिः पताकिना पताकान्वितवत् प्रतीयमानेन । सुरकार्मुकमेव अभिनवं नूतनं चित्रम् आलेख्यं तेन शोभते यत्तेन । पयोमुचा मेघेन । मञ्जुभाषिणी हृद्यम ।

(१२५) प्राप्तेति ।—प्रसाधितं भूषितम् । स्वेच्छयैव प्राप्तं विमानं यानं येन सः, अभिलाषोपनीतव्योमयानः, यद्वा—स्वेच्छया ईश्वरेच्छया प्राप्तो विशिष्टो मानः प्रियासङ्गालिङ्गनादिजन्य उत्कर्षो येन तथोक्तः, हंसयुवकः विहरति स्वेच्छया परिभ्रमतीत्यर्थः ।

---

(१) उर्वशीसहितराजागमनतो हृष्टः ।

सहाओ तत्थभवं राआ णंदण वण-प्पमुहेसुं प्पदेसेसुं विहरिअ प्पडिणिउत्तो णअरं। दाणिं सकज्जाणुसासणे प्पउदिमंडलं अणुरञ्जअंतो रज्जं करेदि। अं! संताणअं वज्जिअ ण से किंपि सोअणीअं। अज्ज तिथिविसेसो त्ति भअवदीए गंगा-जउणाणं सलिलेसुं देईए सह किदाहिसेओ संपदं उअआरिअं प्पविट्ठो; ता जाव अलंकरणीअमाणस्स अंगाणुलेअण-मल्लभाई भादुओ होमि। (क) (२)

[नेपथ्ये]। हद्धी! हद्धी! एसो जलंत रत्त-तालवेंट-पिधाणं णिक्खिविअ णीअमाणो अच्छरा-विरहिदेण मउलि-रअणदाए प्पओइदो मणी आमिससंकिणा गिद्धेण आविद्धो। (ख) (३)

(क) हो हो। भोः! भोः! दिष्ट्या चिरस्य कालस्य उर्वशीसहायस्तवभवान् राजा नन्दनवन-प्रमुखेषु प्रदेशेषु विहृत्य प्रतिनिवृत्तो नगरम्। इदानीं स्वकार्यानुशासने प्रकृतिमण्डलमनुरञ्जयन् राज्यं करोति। अयं! सन्तानकं वर्जयित्वा नास्य किमपि शोचनीयम्। अद्य तिथिविशेष इति भगवत्यौ गङ्गायमुनयोः सलिलेषु देव्या सह कृताभिषेकः साम्प्रतमुपकारिकां प्रविष्टः; तत् यावदलङ्क्रियमाणस्याङ्गानुलेपनमाल्य-भागी भाजनं भवामि।

(ख) हा धिक्! हा धिक्! एष ज्वलन् रक्ततालवृन्तपिधानं निक्षिप्य नीयमानोऽप्सरा-विरहितेन मौलिरत्नतायां प्रयोजितो मणिः आमिषशङ्किना गृध्रेण आविद्धः।

(२) सन्तानकमनपत्य, निरपत्यता एव अस्य शोचनीया, अन्यथा सर्वमेव प्रशस्यमिति भाव.। कृताभिषेकः कृतस्नानः। उपकारिकां राजभवनम्। अलङ्क्रियमाणस्य राज्ञः, अङ्गानुलेपनमाल्यभागी राज्ञा व्यवहृतचन्दनमाल्यावशिष्ट-चन्दनमाल्यभागी।

(३) हद्धी! इत्यादि।—रक्ततालवृन्तपिधानं रक्ततालवृन्तरूपावरणं निक्षिप्य अपसार्य्य। अप्सरसा उर्वश्या विरहितेन राज्ञा मौलिरत्नतायां प्रयोजितः चूडामणिः कृत इत्यर्थः।

विदू। [आकर्णं]। अच्चाहिदं ! अच्चाहिदं ! (४) परम-बहुमदो क्खु सो बअस्सस्स संगमणीओ णाम चूड़ामणी। अदो क्खु असमत्तणेवच्छो ज्जेव तत्तभवं आसणादो ज्जेव उत्थिदो ; ता पासपलिवत्ती होमि । (ग)

[इति निष्क्रान्तः]।

[प्रवेशकः]। (५)

[ततः प्रविशति राजा सूतः कञ्चुकि-रेचकौ (६) परिजनश्च]।

राजा। रेचक ! रेचक !—

आत्मनो बधमाहर्त्ता कोसौ विहग-तस्करः ।
येन तत्प्रथमं स्तेयं गोप्तुरेव गृहे कृतम् ? ॥ (७)

किरातः। एसो अग्गमुह-लग्ग-हेमसूत्तेण मणिणा अणुरञ्ज-अंतो बिअ आआसं परिब्भमदि । (घ)

राजा। पश्यामि एनम् ।—

असौ मुखालम्बित-हेमसूत्रं
बिभ्रन्मणिं मण्डल शीघ्रचारः ।

(ग) अत्याहितम् ! अत्याहितम् ! परमबहुमतः खलु स वयस्यस्य सङ्गमनीयो नाम चूडामणिः । अतः खलु असमाप्तनेपथ्य एव तत्रभवान् आसनादेव उत्थितः ; तत् पार्श्वपरिवर्त्ती भवामि ।

(घ) एषोऽयमुखलग्न-हेमसूत्रेण मणिना अनुरञ्जयन्निव आकाशं परिभ्रमति ।

---

(४) "अत्याहित महाभीतिः कर्म जीवानपेक्षि च" इत्यमरः ।

(५) प्रवेशक इति । —तल्लक्षणं यथा दर्पणे ।—"प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः । अन्तर्यवनिकं ज्ञेयः प्रेक्षं विष्कम्भके यथा ॥" इति ।

(६) रेचक इति किरातस्य नाम ।

(७) आत्मन इति ।—वधम् आहर्त्ता आहरणकारी, स्वकर्मणा आत्मविनाश-कारी इत्यर्थः, विहगश्चासौ तस्करश्चेति विहगतस्करः । येन गोप्तुरेव रक्षकस्यैव गृहे तदेव प्रथमं स्तेयं चौर्यं कृतम् । अनुष्टुप् वृत्तम् ।

अलात-चक्र-प्रतिमं विहङ्ग-
स्तद्रागलेखा-वलयं तनोति ॥ (८)

कथय, किं खलु अत्र कर्त्तव्यम् ?।

विदू। [उपेत्य]। भो! अलं एत्थ विसाए; एसो अवराही सासणीयो। (ङ)

राजा। सम्यगाह भवान्। धनुर्धनुस्तावत्।

परिजनः। जं भट्टा आणवेदि। (च)

[इति निष्क्रान्तः]।

राजा। न दृश्यते हि विहगाधमः।

विदू। इदो इदो दक्खिणंतरेण चलिदो सउण-
च्छदासो। (छ)

राजा। [इदा]। इदानीम्।—

प्रभाप्रसक्तिनासौ करीति मणिना खगः।
अस्माकस्तवकेनेव दिक्षुक्षस्यावतंसकम् ॥ (९)

यवनी। [धनुर्हस्ता प्रविश्य]। भट्टा! एदं ससरं चावं। (ज)

राजा। किम् इदानीं धनुषा? बाणपथातीतः क्रव्य-
भोजनः। तथा हि।—

(ङ) भीः। अलमत्र दृष्टया; एषोऽपराधी शासनीयः।

(च) यत् भर्त्ता आज्ञापयति।

(छ) इत इतो दक्षिणान्तरेण चलितः शकुनच्छदाशः।

(ज) भर्त्तः! इदं शरं चापम्।

---

(८) अलातेति।—अलातचक्रवत् अलातवत्या शीघ्रगामी अतो विहङ्गः मुखे आक्षिप्तं क्षिप्यमाणं हेमसूत्रं यस्य तं तथाभूतं मणिं विभ्रत् धारयन् अलातचक्र-प्रतिमं इन्द्रायुधमिश्रमिलितलक्षणमिव तस्य मणेः रागस्य या लेखा तस्या वलयं अलकं तनोतीति अन्वयति। उपजातिः छन्दः।

(९) प्रभेति।—असौ खगः प्रभया माला पल्लवितेन विद्युतेन अलातपल्लवेन

आभाति मणिविशेषो दूरमिदानीं पतत्रिणा नीतः।
नक्तमिव लोहिताङ्कः पुरुष घनच्छेद-सम्पृक्तः॥ (१०)

आर्य्य तालव्य!। (११)

कञ्चुकी। आज्ञापयतु देवः।

राजा। मद्वचनादुच्यन्तां नागरिकाः,—"सायं निवास-वृक्षाग्रे विचीयतां विहगाधमः।"

कञ्चु। यथा आज्ञापयति देवः।

[इति निष्क्रान्तः]।

विदू। भो! विस्समीअदु भवं संपदं। कहिं गदो मणि-कुंभीलओ (१२) भवदो सासणादो मुंचिस्सदि?। (झ)

[इति उपविशतः]।

राजा। वयस्य!—

रत्नमिति न मे तस्मिन् मणौ प्रयासो विहङ्गमोत्क्षिप्ते।
प्रियया तेनास्मि सखे! सङ्गमनीयेन सङ्गमितः॥ (१३)

(झ) भोः। विश्राम्यतु भवान् साम्प्रतम्। कुत्र गतो मणिकुम्भिलको भवतः शासनात् मोक्ष्यति?।

वा अशोकलवकेनेव तरुण प्रतोद्यमानेन इत्यर्थः। दिङ्नागस्य अवतंसकं शिरोभूषणं करोति। अनुष्टुप् वृत्तम्।

(१०) आभाति मणिविशेष इत्यादि।—इदानीं पतत्रिणा पक्षिणा दूरं नीतः मणिविशेषः महामणिः, नक्तं रात्रौ, घनच्छेदसम्पृक्तो मेघखण्डाच्छादितः लोहिताङ्कः पुरुष. सङ्गतपङ्क इव ("लोहिताङ्को महीसुतः" इत्यमरः) आभाति शोभते। पुरुष इत्यत्र विभक्तिलोपश्छान्दसः। आर्य्या वृत्तम्।

(११) तालव्य इति कञ्चुकिनामधेयम्।

(१२) "कुम्भिलका गण्डपदलक्षणेषु मत्स्येषु:" इति कोषः।

(१३) रत्नमितीति।—विहङ्गमेन पक्षिणा, उत्क्षिप्ते ऊर्द्धे नीते। सङ्गमनीयेन प्रशस्ता। सङ्गमितः सङ्गं प्रापितः। आर्य्या वृत्तम्।

[ततः प्रविशति सशरं मांसमादाय कञ्चुकी]।

कञ्चुकी। जयति जयति देवः।—

अनेन निर्भिन्नतनुः स बध्यो रोषेण ते मार्गणतां गतेन।
प्राप्तापराधोचितमन्तरीक्षात् समौलिरक्तः पतितः पतत्री॥ (१४)

सर्वे। [विस्मयं रूपयन्ति]।

कञ्चु। अभिप्रक्षालितोऽयं (१५) मणिः कस्मै प्रदीयताम्?।

राजा। रैचक! गच्छ, कोषपेटके (१६) स्थापयैनम्।

किरातः। जं भट्टा आणवेदि त्ति। (अ)

[इति मांसमादाय निष्क्रान्तः]।

राजा। [तालव्यं प्रति]। आर्ये! जानाति भवान् कस्य अयं बाण इति?।

कञ्चु। नामाङ्कितो दृश्यते; नात्र मे वर्णविभावनसज्जा दृष्टिः।

राजा। तदुपश्लेषय शरं यावत् निरूपयामि।

विदू। किं भवं विआरेदि?। (ट)

राजा। शृणु तावत् प्रहर्तुर्नामाक्षराणि।

विदू। अवहिदोम्हि। (ठ)

(अ) यद्भर्त्ता आज्ञापयति इति।

(ट) किं भवान् विचारयति?।

(ठ) अवहितोऽस्मि।

---

(१४) अनेनेति।—बधमर्हतीति वध्यः स पतत्री पक्षी मार्गणतां गतेन बाणत्वं प्राप्तेन तव अनेन रोषेण निर्भिन्नतनुः विदारितशरीरः सन्, प्राप्तापराधोचितं यथा स्यात् तथा प्राप्तचौर्यापराधसदृशदण्डं यथा तथेत्यर्थः, अन्तरीक्षात् समौलिरक्तः मौलितः। अत्र क्रोधस्यैव शरत्वसम्भावनयोत्प्रेक्षालङ्कारः। उपजातिः छन्दः।

(१५) अभिप्रक्षालितः परिधौतः।

(१६) कोषपेटके भाण्डागारान्तर्वर्तिनि वंश्यादिनिर्मिते पेटिकाख्ये पात्रे।

राजा। [वाचयति]।—

उर्वश्री-सम्भवस्यायमैलसूनोर्धनुष्मतः ।
कुमारस्यायुषो बाणः संहर्त्ता द्विषदायुषाम् ॥ (१७)

विदू। दिट्ठिआ संताणेण वड्ढदि भवं। (ड)

राजा। कथमेतत् ! सखे ! अन्यत्र नैमिषेयसत्त्वादविद्युक्तो-ऽङ्गमुर्वश्या ; (१८) न कदाचिदपि तत्रभवती गर्भाविर्भूत-दोहदा अपि उपलक्षिता ; कुत एव प्रसूतिः ! किन्तु,—

आनील-चूचुकाग्रं लवलीफल-पाण्डुराननच्छायम् ।
कतिचिदहानि शरीरं स्रथवलयमिवाभवत्तस्याः ॥ (१९)

विदू। मा भवं माणुसीधम्मं उव्वसीए संभावेदु। प्पभाव-गूढाइं देवचरिदाइं। (ढ)

राजा। अस्तु तावदेवं यथाऽऽह भवान्। पुत्रसंवरणे (२०) किमिव कारणं तस्याः ?।

(ड) दिष्ट्या सन्तानेन वर्द्धते भवान ।

(ढ) मा भवान् मानुषीधर्मम् उर्वश्यां सम्भावयतु। प्रभावमूढानि देव-चरितानि ।

---

(१७) उर्वशीति।—अयं कुमारस्य युवराजस्य आयुषः आयुर्नामधेयस्य बाणः। आयुषः किम्भूतस्य ? उर्वशीसम्भवस्य उर्वशीगर्भजातस्य, ऐलसूनोः इलानाम्नी बुधेन परिग्रहीता मनोः कन्या तस्या अपत्यं पुमान् ऐलः पुरूरवाः, तस्य सूनोः पुत्रस्य, तथा धनुष्मतः प्रशस्तधनुर्धारिणः इत्यर्थः। बाणः किम्भूतः ? द्विषतां शत्रूणां ["द्विषोऽमित्रे" (३।४।१२१पा०) इति शतृ:] आयुषां संहर्त्ता। अनुष्टुप् वृत्तम्।

(१८) "अनिमिष्याविद्युक्तोऽङ्गमुर्वश्या" इति पाठे—अनिमिषी देववनिता।

(१९) आनीलेति।—आनीलम् ईषत् कृष्णवर्णं चूचुकाग्रं कुचाग्रदेशः यत्र तादृशम्, "आविलपयोधराग्रम्" इति पाठे—आविल मलिनम्। लवली 'नोयाड' इति भाषा, तस्याः फलवत् पाण्डुरा आननच्छाया यत्र तादृशम्। स्रथं शिथिलं वलयं करभूषणं यत्र तादृशम्। आर्य्या वृत्तम।

(२०) संवरणं सङ्गोपनमिति यावत्।

विदू। मा बुड्ढं मं राआ परिहरिस्सदि त्ति। (ध)

राजा। कृतं परिहासेन ; चिन्त्यताम्।

विदू। को देवरहस्साइं चिंतिस्सदि ?। (त)

कञ्चुकी। [प्रविश्य]। जयति जयति देवः। देव ! एषा खलु चवनाश्रमात् भार्गवी कुमारमादाय आयाता तापसी देवं द्रष्टुमिच्छति।

राजा। उभयमपि अविलम्बितं प्रवेशय।

कञ्चुकी। तथा। [इति निर्गम्य तापसीसहितं कुमारमादाय प्रविष्टः]।

विदू। णं क्खु एसो खत्तिअ-कुमारो, जस्स णामांकिदो गिद्धलक्खवेही णाराओ (२१) उअलद्धो। तधा हि भवदो बहु अणुकरेदि। (थ)

राजा। एवमेतत्।—

बाष्पायते निपतिता मम दृष्टिरस्मिन्
वात्सल्यबन्धि हृदयं मनसः प्रसादः।
सञ्जातवेपथुभिरुज्झितधैर्य्यवृत्त-
मिच्छामि चैनमदयं परिरब्धुमङ्कैः॥ (२२)

(ध) मा खलु मां राजा परिहरिष्यतीति।

(त) को देवरहस्यानि चिन्तयिष्यति ?।

(थ) ननु खलु एष क्षत्रियकुमारः, यस्य नामाङ्कितो गृध्रलक्ष्यवेधी नाराच उपलब्धः। तथा हि भवती बहु अनुकरोति।

---

(२१) नाराचः बाणभेदः।

(२२) बाष्पायते इति।—मम दृष्टिरस्मिन् बालके निपतिता सती बाष्पायते बाष्पमुद्गमति इत्यर्थः, प्रगाढबाष्पोदयेन आकुलीभवतीति यावत्। हृदयं चेतः वात्सल्यं बध्नातीति वात्सल्यबन्धि प्रेमातिशय्ययुक्तम। मनसः प्रसादः ; तथा अहम् उज्झितं त्यक्तं धैर्य्यवृत्तं येन तादृशं चपलमित्यर्थः. एनं कुमारम् अदयं निर्दयं यथा स्यात् तथा सञ्जात-वेपथुभिः कम्यमानैः अङ्कैः परिरब्धुम् आलिङ्गितुमिच्छामि। वसन्ततिलकं वृत्तम्।

कञ्चुकी। भगवति ! एवं स्थीयताम्।

तापसीकुमारौ। [यथोचितं स्थितौ]।

राजा। [उपसृत्य]। भगवति ! अभिवादये।

ताप। महाराअ ! सोमवंसं धारअंतो होहि। [आत्मगतम्]। भो ! इमिणा अक्कधिदोवि विस्सादो ज्जेव इमस्स राएसिणो अत्तणो आऊसो अ ओरसो संबंधो। [प्रकाशं कुमारं प्रति]। जाद ! प्पणम गुरुं। (द)

कुमारः। [वाष्पगर्भमञ्जलिं बद्ध्वा प्रणमति]।

राजा। वत्स ! आयुष्मान् भव।

कुमा। [स्पर्शं रूपयित्वा स्वगतम्]।—

यदि हार्दमिदं श्रुत्वा पिता ममायं सुतोऽहमस्येति।
उत्सङ्गे बृद्धानां गुरुषु भवेत् कौटश्यः स्नेहः ! ॥ (२३)

राजा। भगवति ! किम् आगमन-प्रयोजनम् ?।

ताप। सुणादु महाराओ,—एसो दीहाऊ आऊ उब्भवीए जादमेत्तो ज्जेव किंपि णिमित्तं अवेक्खिअ मम हत्थे णासीकिदो। जधा (जं) खत्तिअस्स कुलोणस्स जादकम्मादिविहाणं, तं से तत्तभवदा चवणेण सव्वं अणुट्ठिदं ; दाणिं गिहोदबिज्जो धनुब्भेए अ बिणीदो। (ध) (२४)

(द) महाराज ! सोमवंशं धारयन् भव। भोः ! अनेन अकथितोऽपि विज्ञात एवास्य राजर्षेरात्मन आयुषश्च औरसः सम्बन्धः। जात। प्रणम गुरुम्।

(ध) शृणोतु महाराजः,—एष दीर्घायुरायुर्वंश्या जातमात्र एव किमपि निमित्तम् अपेक्ष्य मम हस्ते न्यासीकृतः। यथा (यत) क्षत्रियस्य कुलीनस्य जात-

---

(२३) यदि हार्दमिदमित्यादि।—अयं मम पिता, अहमस्य सुतः इति, वचनमिति शेषः, श्रुत्वैव यदि इदम् ईदृशं, हार्दं स्नेहः, ("प्रेमा ना प्रियता हार्दं प्रेम स्नेहः" इत्यमरः), सञ्जायेत इति शेषः, अनिर्वचनीयानन्दोदयः स्यादिति भावः, तदा उत्सङ्गे बृद्धानां क्रोडे इत्थं गतानामात्मजानां गुरुषु पित्रादिषु कीदृशः स्नेहो भवेत् ! इति विचारयितुमपि न शक्नोमीति भावः। आर्य्या वृत्तम्।

राजा। सनाथः (२५) खलु संवृत्तः।

तापः। अज्ज पुप्फ-फल-समिध्-कुस-णिमित्तं इसिकुमार-एहिं सह गदेण इमिणा अस्समवास-विरुद्धं समाअरिदं। (न)

विदू। कधं विअ?। (प)

तापः। गहिदामिसो किल गिद्धो अस्सम पादव-सिहरे णिलीयमाणो लक्खीकिदो बाणस्स। (फ)

राजा। ततस्ततः?।

तापः। तदो उअलद्ध-वुत्तंतेण भअवदा चवणेण अहं समादिट्ठा,—"णिज्जादेहि एदं उव्वसीहत्थे सासं" त्ति। (२६) ता इच्छामि उव्वसीं पेक्खिदुं। (ब)

राजा। तेन हि आसनमनुगृह्णातु भगवती।

[प्रेष्योपनीतयोरासनयोरुपविष्टौ]।

कर्मादिविधानं, तदस्य तवभवता च्यवनेन सर्वमनुष्ठितम्; इदानीं गृहीतविद्यो धनुर्वेदे च विनीतः।

(न) अद्य पुष्प-फल-समित-कुश-निमित्तम् ऋषिकुमारकैः सह गतेन अनेन आश्रमवासविरुद्धं समाचरितम्।

(प) कथमिव?।

(फ) गृहीतामिषः किल गृध्रः आश्रमपादपशिखरे निलीयमानो लक्ष्यीकृतो बाणस्य।

(ब) तत उपलब्ध-वृत्तान्तेन भगवता च्यवनेन अहं समादिष्टा,—"निर्यातयैनम् उर्वशीहस्ते न्यासम्" इति। तदिच्छामि उर्वशीं प्रेक्षितुम्।

---

(२४) विनीतः शिक्षितः।

(२५) सनाथः सप्रभुकः प्राप्तोपयुक्तास्त्रय इत्यर्थः, धनुर्वेदो हि इदानीमुपयुक्तास्त्रयप्राप्त्या नाथवान् सञ्जात इति भावः।

(२६) निर्यातय प्रत्यर्पय। "दाने न्यासापंणे वैरशुद्धौ निर्यातनं मतम्" इति मुक्तावली। न्यासं निक्षेपम्। "णिज्जादेहि" इत्यत्र "णिप्पादेहि" (प्रा) "निर्यादय" (सं) इति पाठे—निक्षिप इत्यर्थः।

राजा। आर्य्य तालव्य! आह्वयताम् (२७) उर्वशीं।

कञ्चु। यदाज्ञापयति देवः। [इति निष्क्रान्तः]।

राजा। [कुमारमवलोक्य]। एह्येहि वत्स!—

सर्वाङ्गीणः स्पर्शः सुतस्य किल तेन मामुपनतेन।
प्रह्लादयस्व तावच्चन्द्रकरश्चन्द्रकान्तमिव॥ (२८)

माध। जाद! णंदेहि पिदरं। (भ)

कुमारः। [राजानमुपसर्पति]।

राजा। [आलिङ्ग्य]। वत्स! प्रियसखं ब्राह्मणमविशङ्कितो वन्दस्व।

विदू। किं त्ति मे संकदि? अस्समम-वास-परिचिदा ण किं एदस्स साहामिआ?। (म) (२९)

कुमा। [सव्रीडम्]। तात! वन्दे।

विदू। सोत्थि भवदो, वड्ढदु भवं। (य)

[ततः प्रविशति उर्वशी कञ्चुकी च]।

कञ्चु। इत इतो भवती।

(भ) जात। नन्दय पितरम्।

(म) किमिति मे शङ्कते? आश्रमवासपरिचिताः न किम् एतस्य शाखामृगाः?।

(य) स्वस्ति भवते, वर्द्धतां भवान्।

---

(२७) "आह्वयताम्" इत्यत्र "उच्यताम्" इति क्वचित् पाठः।

(२८) सर्वाङ्गीण इति।—सुतस्य तनयस्य स्पर्शः सर्वाङ्गीणः किल निश्चये, सर्वाङ्गव्यापी इत्यर्थः, सर्वदेहे पुलकसञ्चारकारीति यावत्। उपनतेन दत्तेनेत्यर्थः, तेन स्पर्शेन चन्द्रकरश्चन्द्रकान्तमिव मां प्रह्लादयत्व सामानन्दितं कुरु इत्यर्थः। अत्र उपमालङ्कारः, आर्य्या वृत्तम्।

(२९) आश्रमवासकालीनेन बहवो वानरा दृष्टाः, तदस्य मामालोक्य कथं शङ्किष्यते? येन हि बहुशो सङ्कटाः प्रत्यक्षीकृताः, तस्य किं सहसैनेन भीतिरुत्पत्स्यते?।

उर्वशी। [प्रविश्य अवलोक्य च]। को णु क्खु एसो कणअ-
बीठोवविट्ठो महाराएण संजमीअमाण सिहंडओ चिट्ठदि? (२०)
[तापसौ दृष्ट्वा]। अम्हहे! सच्चवदीसहिदो पुत्तओ मे आऊ!
महंतो क्खु संवुत्तो!। (र)

राजा। [विलोक्य]। वत्स!—

इयं ते जननी प्राप्ता त्वदालोकनतत्परा।
स्नेहप्रस्रव-निर्भिन्नमुद्वहन्ती स्तनांशुकम्॥ (२१)

ताप। जाद! एहि, पच्चुवगच्छ मादरं। (ल)

[इति कुमारेण सह उर्वशीमुपसर्पति]।

उर्व। अज्जे! पादवंदणं करेमि। (व)

ताप। बच्छे! भत्तुणो बहुमदा होहि। (श)

कुमा। अम्ब! अभिवादये।

उर्व। बच्छ! पिदरं आराधअंतो होहि। [राजानं प्रति]।
जेदु जेदु महाराओ। (ष)

राजा। स्वागतं पुत्रवत्यै? इत आस्यताम्।

(र) को नु खलु एष कनकपीठोपविष्टो महाराजेन संयम्यमानग्रिखण्डक-
स्तिष्ठति! अहो! सत्यवतीसहितः पुत्रको मे आयुः! महान् खलु संवृत्तः।।

(ल) जात! एहि, प्रत्युपगच्छ मातरम्।

(व) आर्ये! पादवन्दनं करोमि।

(श) वत्से! भर्तुर्बहुमता भव।

(ष) वत्स! पितरमाराधयन् भव। जयति जयति महाराजः।

---

(२०) महाराजेन संयम्यमानग्रिखण्डकः महाराजेन सञ्चाल्यमानबालकपक्षः, विचल्यमानग्रिखण्डक इत्यर्थो वा, ("बालकपक्षः ग्रिखण्डकः" इत्यमरः)।

(२१) इयमिति।—वत्स! त्वदालोकनतत्परा अत एव स्नेहात् यः प्रस्रवः दुग्धसरणं तेन निर्भिन्नं स्तनांशुकमुद्वहन्ती धारयन्ती इयं ते जननी उर्वशी प्राप्ता। अनुष्टुप् वृत्तम्।

उवं। अज्जा ! उअविसध। (स)

सवे। [यथोचितम् उपविष्टाः]।

ताप। वच्छे ! गिहीदविज्जो आऊ संपदं आउधकवचारुहो संवुत्तो। एसो भत्तुणो समक्खं णिज्जादिदो सहिहत्थणिक्खेवो (मए तुह हत्थे णिक्खेवो) ता तुह्मेहिं विसज्जिदं अत्ताणं इच्छामि ; उअरुज्झइ मे अस्समम (वास) धम्मो। (च)। (३२)

उवं। कामं चिरस्स (पेक्खिअ विरहुक्कंठिदम्हि ण उणा धम्मावरोहे वट्टिदुं) अज्जउत्तं पेक्खिअ अवहिदहिअएण जुज्जदि पुणो अस्समधम्मं विभाविदुं। ता गच्छदु अज्जा पुणो विदंसणाअ। (छ)

राजा। आर्ये! तत्रभवते च्यवनाय मम प्रणामम् आवेदयिष्यसि।

ताप। एव्वं भोदु। (ज)

कुमा। आर्ये! सत्यमेव निवर्त्तनम्? इतो मामपि नेतुमर्हसि।

(स) आर्याः! उपविशत।

(ह) वत्से! गृहीतविद्यः आयुः साम्प्रतम् आयुधकवचार्हः संवृत्तः। एष भर्तुः समक्षं निर्यातितः सखीहस्तनिक्षेपः (मया तव हस्ते निक्षेपः) तत् युष्माभिर्विसर्जितमात्मानमिच्छामि ; उपरुध्यते मे आश्रम (वास) धर्मः।

(च) कामं चिरस्य (प्रेक्ष्य विरहोत्कण्ठिताऽस्मि न पुनर्धर्मावरोधे वर्त्तितुम्) आर्यपुत्रं प्रेक्ष्यावस्थितहृदयेन युज्यते पुनरात्रमधर्म्मे विभावयितुम्। तत् गच्छतु आर्या पुनरपि दर्शनाय।

(ज) एवं भवतु।

---

(३२) विसर्ज्जितमात्मानमिच्छामि।—विसर्ज्जितं त्यक्तं, ममनाथ अनुमतमित्यर्थः, भवदनुज्ञया पुनः वनं गन्तुमिच्छामि इति भावः। आश्रमधर्म उपरुध्यते बहुक्षणमाश्रमपरित्यागात् आश्रमोचितधर्मस्य व्याघातो भवति इत्यर्थः।

राजा। अयि वत्स! उषितं त्वया पूर्वस्मिन्नाश्रमपदे, तव द्वितीयमपि अध्यासितुं समयः। (२३)

ताप। जादे! गुरुणो वअणं अणुचिट्ठ। (ख)

कुमा। तेन हि।—

यः सुप्तवान् मदङ्के शिखण्ड-कण्डूयनोपलब्धसुखः।
तं मे जातकलापं प्रेषय शितिकण्ठकं शिखिनम्॥ (२४)

ताप। एव्वं करेमि। (ग)

उर्व। भअवदि! पादवंदणं करेमि। (घ)

राजा। भगवति! प्रणमामि।

ताप। सोत्थि सव्वाणं (भोदु तुह्माणं)। (ङ)

[इति निष्क्रान्ता]।

राजा। सुन्दरि!—

अद्याहं पुत्रिणामग्रः सुपुत्रेण तवामुना।
पौलोमीसम्भवेनेव जयन्तेन पुरन्दरः॥ (२५)

उर्वशी। [श्रुत्वा रोदिति]।

(ख) जात! गुरोर्वचनमनुतिष्ठ।

(ग) एवं करोमि।

(घ) भगवति! पादवन्दनं करोमि।

(ङ) स्वस्ति सर्वेभ्यः। (भवतु युष्मभ्यम्)।

---

(२३) त्वया पूर्वस्मिन् आश्रमपदे उषितं त्वया ब्रह्मचर्य्याश्रमवासः कृत इत्यर्थः। इदानीं तव द्वितीयमपि अध्यासितुं समयः गार्हस्थ्याश्रमप्रवेशावसरः संवृत्त इत्यर्थः।

(२४) य इति।—मदङ्के मम क्रोडे। शिखण्डकण्डूयनेन चूडाकण्डूयन-व्यापारेण उपलब्धं सुखं येन तादृशः। जातकलापम् उद्गतपिच्छम्। शितिकण्ठकं नीलकण्ठम्। आर्य्या वृत्तम्।

(२५) अद्येति।—पुत्रिणां पुत्रवतामग्रः मुख्यः श्रेष्ठः इत्यर्थः। पौलोमी-सम्भवेन शचीगर्भजातेन, जयन्तेन तदाख्यदेवेन्द्रतनयेन। अनुष्टुप् वृत्तम्।

विदू। भो! किं णु क्खु संपदं तत्थभोदी अस्सुमुही संवुत्ता ?। (च)

राजा।—

किं सुन्दरि! प्ररुदिताऽसि ममोपनीतें
वंशस्थितेरधिगमात् स्फुरति प्रमोदे।
पीनस्तनोपरि निपातिभिरर्पयन्ती
मुक्तावली-विरचनं पुनरुक्तमश्रैः ?॥ (३६)

उर्व। सुणादु महाराओ,—पढमं उण पुत्त-दंसण-समुत्थिदेण आणंदेण विसुमरिदम्हि; दाणिं महेंदसंकित्तणेण सो अवधी मम हिअएण सुमरिदो। (छ)

राजा। कथ्यतां समयः।

उर्व। सुणादु महाराओ,—अहं पुरा महाराअ-गहिद-हिअआ गुरुसाव-संमूढ़ा महेंदेण अवधिं कदुअ अब्भणुण्णादा। (ज)

(च) भोः! किं नु खलु साम्प्रतं तवभवतो अश्रुमुखी संवृत्ता ?।

(छ) शृणोतु महाराजः,—प्रथम पुनः पुत्रदर्शनसमुत्थितेन आनन्देन विस्मृताऽस्मि; इदानीं महेन्द्रसङ्कीर्तनेन सोऽवधिः मम हृदयेन स्मरितः।

(ज) शृणोतु महाराजः,—अहं पुरा महाराजगृहीतहृदया गुरुशापसम्मूढा महेन्द्रेण अवधिं कृत्वा अभ्यनुज्ञाता।

---

(३६) किं सुन्दरीत्यादि।—हे सुन्दरि! वंशस्य कुलस्य ("वंशो वेणौ कुले वर्गे पृष्ठस्थावयवास्थनि। नासाबिवरदेशेऽपि वाद्यभाण्डान्तरेऽपि च॥" इति कोषः) स्थितिः रक्षा येन तादृशस्य पुत्रस्य अधिगमात् लाभात्, पुत्रेण सह मेलनात् इत्यर्थः, उपनीते मम प्रमोदे स्फुरति वर्द्धमाने सति पीनस्तनोपरि निपातिभिः अक्षभिर्नयनजलैः पुनरुक्तं यथा स्यात् तथा मुक्तावलीविरचनम् अर्पयन्ती मुक्ताहारविन्यासं कृतवती, मुक्ताफलसदृशानि अश्रूणि पातयन्ती इत्यर्थः, किं प्ररुदिताऽसि ? पुत्रसमागमजनिते आनन्दावसरे किं शोकस्य कारणम् ? इति भावः। वसन्ततिलकं वृत्तम्।

राजा। कथय किमिति ?।

उर्वं। "जदा सो मम पिअसहो राएसी तुइ समुप्पण्णस्स पुत्तअस्स मुहं पेक्खिस्सदि, तदा मम समीवं तुए आअंतव्वं"त्ति। तदा मए महाराअ-बिआअ-भीरुदाए (जातमेत्तो एव्व विज्जा-गमणिमित्तं अ) (चिरआल-संगमणिमित्तं अ) भअवदो चवणस्स अस्समपदे एसो पुत्तओ अज्जाए संचवदीए हत्थे अत्तणा णिक्खित्तो। अज्ज उण पिदुणो आराहण-समत्थो संवुत्तो त्ति कदुअ णिप्पादिदो एसो दीहाऊ आऊ। एत्तिको मे महाराएण सह संवासो। (झं)

सर्वे। [विषादं नाटयन्ति]।

राजा। [मोहमुपगच्छति]।

सर्वे। आः ! समस्समदु समस्ससदु महाराओ। (ञ)

कञ्चु। संसाध्वसितु महाराजः।

विदू। अब्बम्हसं अब्बम्हस !! (टं)

राजा। [समाश्वस्य]। अहो ! सुखप्रतिबन्धिता दैवस्य।—

आश्वासितस्य मम नाम सुतोपलब्ध्या
सद्यस्त्वया सह कृशोदरि ! विप्रयोगः।
व्यावर्त्तितातपकृजः प्रथमाम्बुदृष्ट्या
दृक्षस्य वैद्युत इवाग्निरुपस्थितोऽयम् ॥ (१७)

(झं) "यदा स मम प्रियसखो राजर्षिस्त्वयि समुत्पन्नस्य पुत्रकस्य मुखं प्रेक्षिष्यते, तदा मम समीपं त्वया आगन्तव्यम्" इति। ततो मया महाराजवियोग-भीरुतया (जातमात्र एव विद्यागमननिमित्तञ्च) (चिरकालसङ्गमनिमित्तञ्च) भगवतश्चवनस्याश्रमपदे एष पुत्रक आर्य्यायाः सत्यवत्या इस्ते आत्मना निक्षिप्तः। अस्य पुनः पितुराराधनसमर्थः संवृत्त इति ज्ञात्वा निष्पादित एष दीर्घायुः आयुः। एतावानेव मे महाराजेन सह संवासः।

(ञ) आः ! समाश्वसितु समाश्वसितु महाराजः।

(ट) अब्रह्मण्यम् अब्रह्मण्यम् !!

विदू। अयं सो अत्थो अणत्थाणुबंधओ त्ति तक्केमि (अत्थभवं देवराओ सअं अणुग्गाहदव्वो)। (ठ) (३८)

उर्व। हा ! हदम्हि मंदभाइणी। किद-विणअस्स तणअस्स लंभाणंतरं सग्गारोहणेण अवसिद-कज्जां विप्पओअ-मुद्दीं मं महाराओ समत्थइस्सदि। (ड)

राजा। सुन्दरि ! मा मैवम्।—

न हि सुलभ-वियोगा कर्तुमात्मप्रियाणि
प्रभवति परवत्ता शासने तिष्ठ भर्तुः।
अहमपि तव सूनावद्य विन्यस्य राज्यं
विचरितमृगयूथान्याश्रयिष्ये वनानि ॥ (३९)

(ठ) अयं सोऽर्थोऽनर्थानुबन्धक इति तर्कयामि (भवभवान् देवराजः स्वयमनुग्राह्यितव्यः)।

(ड) हा ! हताऽस्मि मन्दभागिनी। कृतविनयस्य तनयस्य लम्भानन्तरं स्वर्गारोहणेनावसितकार्य्या विप्रयोगमुखीं मां महाराजः समर्थयिष्यते।

---

(३७) आश्वासितस्येति।—हे कृशोदरि ! सुतोपलब्ध्या पुत्रप्राप्त्या, आश्वासितस्य वंशस्थितिसम्भावनया प्राप्ताश्वासस्य मम त्वया सह अयं सद्यः विप्रयोगः नाम सम्भावितवियोगः, नामेति सम्भावनायां, ("नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने" इति कोषः), प्रथमाम्बुहृष्या व्यावर्त्तितातपरुजः निवृत्तातपक्लेशस्य तिरोहितरौद्रसन्तापगदःस्वस्येत्यर्थः, ("आतपो रश्मिमात्रे स्यात् सूर्यरश्मौ च दृश्यते" इति कोषः), वृक्षस्य वैद्युतः विद्युत्सम्बन्धी अग्निरिव उपस्थितः प्राप्तः। अत्र एकवाक्ये उपमानोपमेययोः साहश्यादुपमालङ्कारः। वसन्ततिलकं वृत्तम्।

(३८) "तत्थभवदा वक्कलं गेण्हिअ तवोवणं गदव्वं त्ति" इति पाठे—"तत्रभवता वल्कलं गृहीत्वा तपोवनं गन्तव्यमिति" इति सं।

(३९) नेति।—सुलभो वियोगो विरहो यस्यां सा सुलभवियोगा परवत्ता पराधीनता आत्मप्रियाणि आत्मनः अभिलषितानि कर्तुं न प्रभवति, अतः भर्तुः इन्द्रस्य शासने तिष्ठ। अहमपि अद्य तव सूनौ तव पुत्रे राज्यं विन्यस्य विचरितमृगयूथानि वनानि आश्रयिष्ये, वनेषु गमिष्यामि इत्यर्थः। मालिनी वृत्तम्।

कुमारः। नार्हति तातो महोक्ष-धारितायां धुरि दम्यं नियोजयितुम्।

राजा। अयि वत्स! मामेवम्।—

शमयति गजानन्यान् गन्धद्विपः कलभोऽपि सन्
प्रभवतितरां वेगोदग्रं भुजङ्गशिशुर्विषम्।
भुवमधिपतिर्बालावस्थोऽप्यलं परिरक्षितुं
न खलु वयसा ज्ञात्यैवायं स्वकार्यसहो गुणः॥ (४०)

आर्ये तालव्य!—

कञ्चु। आज्ञापयतु देवः।

राजा। मद्वचनादमात्यपर्वतं ब्रूहि,—"सम्भ्रियताम् आयुष्मतो राज्याभिषेकः।"

कञ्चुकी। [दृष्ट्वा निष्क्रान्तः]।

सर्वे। [दृष्टिविघातं रूपयन्ति]।

राजा। [आकाशमवलोक्य]। कुतो नु खलु भोः! विद्युत्सम्पातः? [निपुणमवलोक्य]। अये! भगवान् नारदः!—

---

(४०) शमयति गजानन्यानित्यादि।—गन्धद्विपः कलभोऽपि सन् शिशुरपि सन् अन्यान् गजान् शमयति निवारयति, परिभवति इत्यर्थः। गन्धगजलक्षणं यथा,—"यस्य गन्धं समाघ्राय न तिष्ठन्ति प्रतिद्विपाः। स वै गन्धगजो नाम नृपतेर्विजयावहः॥" इति। तथा भुजङ्गशिशोः सर्पशिशोर्विषं वेगोदग्रं वेगैर्विषवेगैः "धातोर्धात्वन्तरप्राप्तिर्विषवेग इति स्मृतः"। धातवश्च सप्त। यथा—"रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः" इति। एवञ्च सप्तैव विषवेगा अपि भवन्ति। तल्लक्षणानि च विषतन्त्रे यथा,—"वेगो रोमाञ्चमाधो रचयति विधुरः स्वेदवक्त्रोपशोषौ। तस्योर्ध्वत्वपरो वो वपुषि जनयतो वर्णभेद-प्रवेपौ॥ यो वेगः पञ्चमोऽसौ नयनविवृततां कण्ठभङ्गञ्च हिक्काम्। षष्ठो जिह्माक्षमोहौ वितरति च मतिं सप्तमो भञ्जकस्य॥" इति। उदग्रं क्रूरम् अतितीक्ष्णमित्यर्थः, सन् प्रभवतितरां मारणसमर्थं भवति। अधिपतिः राजा बालावस्थोऽपि सन् भुवं पृथिवीं परिरक्षितुं पालयितुमलं समर्थः खलु। अयं स्वकार्यसहः स्वकार्यसाधनसमर्थो गुणः न वयसा न वयोऽवस्थानेन; परन्तु ज्ञात्यैव। ज्ञातिभ्यो जातम्।

गोरोचना-निकष-पिङ्ग-जटाकलापः
संलक्ष्यते मणिकलाऽमल-वीतसूत्रः ।
मुक्तागुणातिशय-सम्भृत-मण्डनश्री-
र्हैम-प्ररोह इव जङ्गम-कल्पवृक्षः ॥ (४१)

अर्घोऽर्घस्तावत् ।

उर्व० । इदं भगवतो अग्घं । (ढ)

[ततः प्रविशति नारदः] ।

नारदः । विजयतां विजयतां मध्यमलोकपालः । (४२)

राजा । भगवन् ! अभिवादये ।

उर्व० । भगवं पणमामि । (ण)

नारदः । अविरहितौ दम्पती भूयास्ताम् ।

राजा । [अनान्तिकम्] । अपि नामैवं स्यात् ? [प्रकाशम्] ।

और्वशेयः पुत्त्रो वः प्रणमति ।

नारदः । आयुष्मान् आस्तामयम् (एधि) ।

राजा । अयं विष्टरोऽनुगृह्यताम् । (४३)

(ढ) एतत् भगवतोऽर्घ्यम् ।

(ण) भगवन् । प्रणमामि ।

---

(४१) गोरोचनेति ।—गोरोचना तथा निकषः कषणोपलः, लक्षणया निकषपाषाणोपरि घृष्टकनकरेखा तयोरिव पिङ्गः कपिशो जटाकलापो यस्य सः । तथा मणिकलावदमलं शुभं वीतसूत्रं यज्ञोपवीतं यस्य सः, भगवान् नारदः इति शेषः मुक्तागुणैः मुक्ताहारैः अतिशयं सम्भृता अत्यर्थं वर्द्धिता मण्डनश्रीर्यस्य तादृशः, कल्पवृक्षस्य सर्वप्रसूत्वात् तत्र मुक्तागुणसद्भावो बोध्यः ; हैमप्ररोहः सञ्जातस्वर्णाङ्कुरः जङ्गमः गमनशीलः कल्पवृक्ष इव संलक्ष्यते । अत्रोपमाऽलङ्कारः । वसन्ततिलकं वृत्तम ।

(४२) मध्यमलोकः मर्त्यलोकः, ("पुंसि स्मृतौ मध्यमलोकमर्त्यौ" इति कोषः) ।

(४३) विष्टरः आसनम, ("विष्टरः कुशमुष्टौ स्यादासनेऽपि महीरुहे" इति कोषः), "वृक्षासनयोर्विष्टरः" (८।३।९३ पा०) इति निपातः ।

नारदः। [तथोपविष्टः]।

सर्वे। [नारदमनुपविशन्ति]।

राजा। [सविनयम्]। भगवन्! किमागमनप्रयोजनम्?।

नारदः। राजन्! श्रूयतां महेन्द्रसन्देशः।

राजा। अवहितोऽस्मि।

नारदः। प्रभावदर्शी भवान् वनगमनाय कृतबुद्धिं भवन्तमनुशास्ति।

राजा। किमाज्ञापयति?।

नारदः। "त्रिकालदर्शिभिः आदिष्टः, सुरासुरविमर्दो भावी; भवांश्च सांयुगीनः सहायः; तेन न त्वया शस्त्रन्यासः कर्त्तव्यः। इयञ्च उर्वशी यावदायुस्ते सहधर्मचारिणी भवतु" इति। (४४)

उर्वशी। [अपवार्य]। अम्हो! सल्लं विअ हिअआदो अवणीदं। (त)

राजा। परमनुगृहीतोऽस्मि परमेश्वरेण।

नारदः। युक्तम्।—

तव कार्य्यमसौ कुर्य्यात् त्वञ्च तस्येष्टकार्य्यकृत्।
सूर्य्यः संवर्द्धयत्यग्निमग्निः सूर्य्यं स्वतेजसा॥ (४५)

[आकाशमवलोक्य]। रम्भे! उपनीयतां मन्त्रेण सम्भृतः कुमारस्याभिषेकसम्भारः।

(त) अहो! शल्यमिव हृदयादपनीतम्।

---

(४४) त्रिकालदर्शिभिरित्यादि।—सुराणां देवानामसुराणां दैत्यानाञ्च विमर्दः सङ्ग्रामः। सांयुगीनः संयुगे युद्धे साधुः समरकुशलः। शस्त्रन्यासः शस्त्रत्यागः।

(४५) तवेति।—असौ महेन्द्रः। "तव कार्य्यमसौ" इत्यत्र "त्वत्कार्य्यं वासवः" इति पाठान्तरम्। तस्य महेन्द्रस्य, इष्टकार्य्यकृत् प्रियकार्य्यसम्पादकः, भव इति शेषः। सूर्य्याग्नी यथा परस्परं संवर्द्धयतः तथा भवन्तावपि भवतामिति भावः। अनुष्टुप् छन्दः।

रम्भा। [illegible]यं से [illegible]म-संभारो। (थ) (४६)

नारदः। [illegible]यमायुष्मान् भद्रपीठे। (४७)

रम्भा। [illegible]द्रपीठे उपवेशयति]।

नारदः। [कुमारस्य शिरसि कलसमावर्ज्य]। रम्भे! निर्वर्त्यतामस्य शेषो विधिः।

रम्भा। [यथोक्तं निर्वर्त्य]। वच्छ! प्पणम भग्रवंतं पिदरौ अ। (द)

कुमारः। [सर्वान् प्रणमति]।

नारदः। स्वस्ति भवते।

राजा। वंशवर्द्धनो (कुलधुरन्धरो) भव।

उर्व। पिदुणो दे वअणाणि होंतु। (ध)

वैतालिकद्वयम्। [नेपथ्ये]।

प्रथमः। विजयतां विजयतां युवराजः।—

अमरमुनिरिवात्रिः स्रष्टुरत्रेरिवेन्दु-
र्बुध इव शिशिरांशोर्बोधनस्येव देवः।
तव पितुरनुरूपस्त्वं गुणैर्लोककान्ते·
रतिशयिनि समस्ता वंश एवाशिषस्ते॥ (४८)

(थ) अयमस्याभिषेकसम्भारः।

(द) वत्स! प्रणम भगवन्तं पितरौ च।

(ध) पितुस्ते वचनानि भवन्तु।

---

(४६) सम्भारः विल्वश्लोकमृत्तिकादिसामग्री।

(४७) भद्रपीठे हैमादिमये आसने; तदुक्तं देवीपुराणे,—"हैमञ्च राजतं ताम्रं क्षौरद्रुमयं च वा। भद्रासनं प्रकर्त्तव्यं सार्द्धहस्तसमुच्छ्रितम्॥"

(४८) अमरेति।—बोधनो बुधः। "हैमा विज्ञो बोधनश्चेन्दुपुत्रः" इति हलायुधः। देवो राजा, पुरूरवा इत्यर्थः, ("राजा भट्टारको देवः" इत्यमरः)। अनुरूपो योग्यः, भव इति शेषः। अतिशयिनि सर्वोत्कर्षशालिनि ते वंशे कुले एव समस्ता आशिषः, सन्तीति शेषः। मालिनी वृत्तम्।

द्वितीयः।—

तव पितरि पुरस्ताद्भक्तभावा स्थितेयं
स्थितिमति च विभक्ता त्वय्यनाकल्पधैर्ये।
अधिकतरमिदानीं राजते राजलक्ष्मी-
र्हिमवति जलधौ च प्राप्ततोयेव गङ्गा॥ (४९)

रम्भा। दिट्ठिआ सही पुत्तअस्स जुअराअ-सिरीं पेक्खिअ भत्तुणो विरहे ण वट्टदि। (न)

उर्वं। साहारणो ज्जेव णो अब्भुदओ। [कुमारं इक्के गृहीत्वा]। जाद! जेट्ठमादरं वंदेहि। (प)

राजा। तिष्ठ, सममेव तत्रभवत्याः समीपं यास्यामस्तावत्।

नारदः।—

आयुषो यौवराज्यश्रीः स्मारयत्यात्मजस्य ते।
अभियुक्तं महासेनं सेनापत्ये मरुत्वता॥ (५०)

राजा। अनुगृहीतोऽस्मि मघवता।

नारदः। भो राजन्! किं ते भूयः प्रियं करोतु पाकशासनः?।

(न) दिष्ट्या सखी पुत्रकस्य युवराजश्रियं प्रेक्ष्य भर्तुर्विरहे न वर्तते।

(प) साधारण एव नोऽभ्युदयः। जात! ज्येष्ठमातरं वन्दस्व।

---

(४९) तवेति।—पुरस्तात् पूर्वं तव पितरि भक्तभावा जातानुरागा सती स्थिता इयं राजलक्ष्मीः इदानीं पुनः स्थितिमति लोकमर्यादाऽभिज्ञे अनाकल्पधैर्ये अपरिमेयधैर्यशालिनि त्वयि विभक्ता सती हिमवति हिमालये जलधौ च समुद्रे च प्राप्ततोया गङ्गेव अधिकतरं राजते शोभते, गुणवत एकस्य तव पितुराश्रये स्थिता राजलक्ष्मीः प्राक् यथा अशोभत, इदानीं त्वामपि गुणवत्तनामाश्रयं प्राप्य गुणवदाश्रय-क्षयप्राप्ता ततोऽप्यधिकतरं शोभते इति भावः। "भक्तभावा" इत्यत्र "भक्ततानां" तथा "स्थितेयम्" इत्यत्र "स्थितेऽस्मिन्" इति पाठान्तरम्। मालिनी वृत्तम्।

(५०) आयुषो यौवराज्येति।—ते आत्मजस्य आयुषो आयुर्नामधेयस्य

राजा। अतः परमपि [illegible]? यदि पाकशासनः प्रसादं करोतु ततः,—

[भरतवाक्यम्]।—

परस्पर-विरोधिन्योरेकसंश्रय-दुर्लभम्।
सङ्गतं श्री-सरस्वत्योर्भूयादद्भुतये सताम्॥ (५१)

अपि च।—

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु॥ (५२)

[इति निष्क्रान्ताः सर्वे]।

इति श्रीकालिदासकृते विक्रमोर्वशीनामनाटके पञ्चमोऽङ्कः।

यौवराज्यश्रीः यौवराज्यशोभा, मरुत्वता इन्द्रेण सेनापतेर्भावः सेनापत्यं तव अभियुक्तं नियुक्तं, महासेनं कार्त्तिकेयं, स्मारयति स्मृतिगोचरीकरोति। अत्र स्मरणालङ्कारः। अनुष्टुप् छन्दः।

(५१) परस्परेति।—सतां साधूनामद्भुतये हर्षाय परस्परविरोधिन्योः श्रीसरस्वत्योरेकसंश्रये एकाधारे दुर्लभं सङ्गतं मेलनं भूयात्, विद्वांसो धनिनो भवन्तु इत्यर्थः।

(५२) सर्व इति।—दुर्गाणि दुःखानि। भद्राणि कल्याणानि। कामान् अभिलाषान्। सर्वत्र सर्वस्मिन् स्थले सर्वस्मिन् समये च नन्दतु आनन्दं प्राप्नोतु।

इति पण्डितकुलपतिना श्रीमज्जीवानन्दविद्यासागर-भट्टाचार्येण विरचिता विक्रमोर्वशीव्याख्या।

समाप्तोऽयं ग्रन्थः।